In Public domain. Digitization Muthulakshmi Research Academy

संस्कृत-अकाडमी-षष्ठ्यब्दग्रन्थमाला - 9

ब्रह्मश्रीः वेङ्कटशास्त्रिणा विरचितः

युधिष्ठिराश्वमेधचम्पूप्रबन्धः

(केन्द्रीयसंस्कृतविश्वविद्यालयस्य अष्टादशीपरियोजनायाः दुर्लभग्रन्थपुनर्मुद्रणपरियोजनान्तर्गतत्वेन प्रकाश्यते)

प्रधानसम्पादकः
आचार्य के नीलकण्ठम्
निदेशकः

सम्पादिका
डा के वरलक्ष्मीः
उपनिदेशिका

सहसम्पादकौ परियोजना-अनुसन्धातारौ च
डा वि सुब्रह्मण्यम् उपनिदेशकः
डा जोशी सन्तोषकुमारः शोधसहायकः

संस्कृत अकाडमी
(केन्द्रीयसंस्कृतविश्वविद्यालयेन मानिता आदर्शशोधसंस्था)
उस्मानियाविश्वविद्यालयः, हैदराबाद् - 07
2022

In Public domain. Digitization Muthulakshmi Research Academy

In Public domain. Digitization Muthulakshmi Research Academy

संस्कृत-अकाडमी-षष्ठ्यब्दग्रन्थमाला - 9

ब्रह्मश्रिया वेङ्कटशास्त्रिणा विरचितः

युधिष्ठिराश्वमेधचम्पूप्रबन्धः

(केन्द्रीयसंस्कृतविश्वविद्यालयस्य अष्टादशीपरियोजनायाः दुर्लभग्रन्थपुनर्मुद्रणपरियोजनान्तर्गतत्वेन प्रकाश्यते)

प्रधानसम्पादकः
आचार्य के नीलकण्ठम्
निदेशकः

सम्पादिका
डा के वरलक्ष्मीः
उपनिदेशिका

सहसम्पादकौ परियोजना-अनुसन्धातारौ च
डा वि सुब्रह्मण्यम्, उपनिदेशकः
डा जोशी सन्तोषकुमारः, शोधसहायकः

संस्कृत अकाडमी
(केन्द्रीयसंस्कृतविश्वविद्यालयेन मानिता आदर्शशोधसंस्था)
उस्मानियाविश्वविद्यालयः, हैदराबाद् - 07
2022

In Public domain. Digitization Muthulakshmi Research Academy

Yudhiṣṭhirāśvamedhacampū prabandhaḥ
(Re-printing of rare book project)
This Publication is published with the financial support under Ashtadashi Scheme of Central Sanskrit University, New Delhi)

Publisher
Director, Sanskrit Academy

Copies can be had from:
Director
Sanskrit Academy
Adarsha Shodha Sansthan
Osmania University Campus,
Hyderabad – 500 007

Contact of Sales In charge:
+919866498906

Email:
sanskritacademyhyd@gmail.com

Web:
https://sanskritacademy.net/

Data Entry by
Smt. Bhavanam Shridevi

Printed at
Karshak Art Printers,
Vidyanagar, Hyderabad

Yudhiṣṭhirāśvamedhaca mpū prabandhaḥ
ISBN – 978-93-80171-64-7

© Sanskrit Academy

Year	:	2022
Copies	:	300
Pages	:	xxviii+155
Price	:	Rs 250
		$ 25

In Public domain. Digitization Muthulakshmi Research Academy

Sanskrit Academy Shashtyabda Granthamala - 9

brahmaśrīḥ veṅkaṭaśāstriṇā viracitaḥ

Yudhiṣṭhirāśvamedhacampū Prabandhaḥ

(Published under 'Re-printing rare books project' of Ashtadashi Scheme of Central Sanskrit University, New Delhi)

Chief Editor
Prof K Neelakantham
Director

Editor
Dr K Varalakshmi
Deputy Director

Associate Editors and Project Investigators
Dr. V. Subrahmanyam, Deputy Director
Dr. Joshi Santosh Kumar, Research Assistant

Sanskrit Academy
Adarsha Shodha Sansthan
(Recognised by Central Sanskrit University, New Delhi)
Osmania University Campus, Hyderabad – 500 007
2022

In Public domain. Digitization Muthulakshmi Research Academy

Yudhiṣṭhirāśvamedhacampū prabandhaḥ
(Re-printing of rare book project)

This Publication is published with the financial support under Ashtadashi Scheme of Central Sanskrit University, New Delhi)

Publisher
Director, Sanskrit Academy

Copies can be had from:
Director
Sanskrit Academy
Adarsha Shodha Sansthan
Osmania University Campus,
Hyderabad – 500 007

Contact of Sales In charge:
+919866498906

Email:
sanskritacademyhyd@gmail.com

Web:
https://sanskritacademy.net/

Data Entry by
Smt. Bhavanam Shridevi

Printed at
Karshak Art Printers,
Vidyanagar, Hyderabad

Yudhiṣṭhirāśvamedhacampū prabandhaḥ
ISBN – 978-93-80171-64-7

© Sanskrit Academy

Year : 2022
Copies : 300
Pages : xxviii+155
Price : Rs 250
$ 25

In Public domain. Digitization Muthulakshmi Research Academy

ओम् श्री गुरुभ्यो नमः

।।श्रीशङ्करभगवत्पादाः विजयन्ते।।

Preface

'Composition in mixed prose and verse in Sanskrit is called as Champu'. The admixture of prose and verse can be traced in the Vedic literature particularly in the Brahmanas. Many prose passages have been seen in the midst of the verses in the Puranas, but there is not any instance of classical poetry of this recognized class known earlier. And later in the writings of Subandhu and Bana and also in some inscriptions we find stray verses, until much later the mingling of prose and verse became a singular characteristic of a different section of literature. And "this variety of composition enlarges the scope and ease of the poet's expression and entertains the reader by the presentation of combinative of varying melodies" said by Bhojaraja in *ChampuRamayana* गद्यानुबन्धरसमिश्रितपद्यसूक्तिः हृद्या हि वाद्यकलया कलितेव गीतिः।। The rhetoricians of Sanskrit literature from Bhamaha of 6th century A. D. have given the definition to *ChampuKavya*. Hence it can be said that Kavyas in the form *Champu* must have been composed even before the 6th A.D. "But the earliest works of such class are found only after the 10th century A.D. And then on wards *Champus* became very popular and particularly they were composed largely in South India" said by M. Krishnamachariar, Sri Baladev Upadhyaya and other authors of history of Classical Sanskrit Literature. According to these, 257 *ChampuKavyas* have been traced out till now and some of them were published from various institutes and especially most of the *ChampuKavyas* were written by the poets belonged to Telangana, Andhra Pradesh, Tamilnadu, Karnataka and Kerala. And after careful study of

In Public domain. Digitization Muthulakshmi Research Academy

Champu literature it is observed that the employment of prose and verse in *Champu* need not follow any fixed principle. Authors of *Champu* used prose and verse quite indifferently for the same purpose.

Coming to the present publication of श्री युधिष्ठिराश्वमेधचम्पू composed by Sri *Venkata Shastry* (Venkayya Shastry) who was a well-versed scholar of various shastras had command over the languages like Sanskrit, Prakrit, Telugu and Kannada. He was prominent among the *shataavadhaanis* of that time and honoured with a title *Kavisaarvabhauma*. He was court poet of *Kosala Venkatanayaka* of *Surapura* province which was under the rule of Nizams of Hyderabad. According to the history this *Venkatanayaka* is said to have ruled *Surapurasamsthaanam* during 1773 to 1802 A D.

Sri Venkata Shastry has taken the theme from *Ashwamedhaparva* of Mahabharata and composed this *champu prabandha* beautifully in ten chapters called *stabakas*. Apart from the general descriptions, Sri Venkata Shastry concentrated more on the story-line using beautiful Sanskrit Language. As quoted in the beginning of this preface गद्यानुबन्धरसमिश्रितपद्यसूक्तिः हृद्या हि वाद्यकलया कलितेव गीतिः this poet has pleasant prose passages with full of different sentiments and delightful *shlokas* in various meters along with *alankaras* suitable to the situations.

I appreciate the honest efforts Dr K. Varalakshmi, Deputy Director of the academy, who made a thorough study of this श्री युधिष्ठिराश्वमेधचम्पू and made this book ready for publication within a month. The original book was published in 1891 in Telugu script and it was very difficult to differentiate between prose and poems in the book. Now, Varalakshmi took every care to make it reader friendly. She has published a book

In Public domain. Digitization Muthulakshmi Research Academy

सुरपुरसंक्षिप्तराजकीयेतिहासः in Sanskrit from our academy. Here following the decision taken in the research committee of the academy, she has added good introduction to this book and wrote the chapter wise story briefly in simple Sanskrit. She has also given the index of *slokas* in the end. I congratulate her.

I also congratulate and acknowledge the integrity and determination of amicable deputy director Dr V. Subrahmanyam in charge of project of reprinting of rare books and a faithful researcher Dr Joshi Santosh Kumar, research assistant in the academy for their valuable assistance in getting this श्री युधिष्ठिराश्वमेधचम्पू published. I also thank Sri K. V. Suryaprakash senior research assistant for his continuous help in publications of Academy.

I thank Prof Srinivasa Varkhedi Hon'ble V.C. and Prof. Ranjit Kumar Barman Registrar I/c Central Sanskrit University, New Delhi for their continuous encouragement and for sanctioning such projects to Sanskrit Academy. I thank our chairman Prof. D. Ravinder Hon'ble V. C. and Prof. P. Lakshminarayana Registrar of Osmania University for their amicable support for the development of Sanskrit Academy.

I thank Karshak Art Printers Vidyanagar, Hyderabad for printing the book on time.

सुधीजनविधेयः

Prof. K. Neelakantham

Director

In Public domain. Digitization Muthulakshmi Research Academy

प्रस्तावना

"इतिहासकथोद्भूतमितरद्वा सदाश्रयम्।

चतुर्वर्गफलायत्तं चतुरोदात्तनायकम्"।। 1.15 का.द. इति दण्डिकविवचनमनुसृत्य महाभारतस्य अष्टादशपर्वसु अन्यतमस्य चतुर्दशस्य अश्वमेधपर्वणः इतिवृत्तम् आश्रित्य कविसार्वभौमबिरुदाञ्चितेन शतावधानिना संस्कृतान्ध्रप्राकृतकर्णाटान्ध्रादि-भाषाकवित्वचणेन श्रीवेङ्कटशास्त्रिणा दशस्तबकमण्डितः चम्पूप्रबन्धोऽयं व्यरचि। दशमस्तबकस्य आरम्भे अन्ते च ग्रन्थकर्तुः पुत्रः नृसिंहशास्त्री गद्येन ग्रन्थविस्तारं चाकरेति उल्लिखितः।

"अत्र ग्रन्थकर्तुः पुत्रो नृसिंहशास्त्रीत्थं गद्येन ग्रन्थं विस्तारयति"। यु.अ.च.10

"मङ्गलादीनि मङ्गलमध्यानि मङ्गलान्तानि हि शास्त्राणि प्रथन्ते वीरपुरुषाणि च भवन्त्यायुष्मत्पुरुषाणि चाध्येतारश्च मङ्गलयुक्ता यथा स्युरिति"। (महा.भा.1) इति पतञ्जलिमहाभाष्यवचनमनुसृत्य मङ्गलश्लोकैः प्रबन्धः आरब्धः। "आशीर्नमस्क्रिया वस्तुनिर्देशो वापि तन्मुखम्"।। (1.14 का.द.) इति मङ्गलं त्रिधा भवितुमर्हतीति काव्यशास्त्रोक्तसम्प्रदायमनुसृत्य रचयिता ब्रह्मश्री वरकूरु शतावधानी वेङ्कय्यशास्त्री आदौ अद्वैतमतप्रवर्त्तकं शङ्कराचार्यं तदनु परमेश्वरं विघ्नराजं भारतीञ्च नमस्क्रियारूपकमङ्गलश्लोकत्रिकेन अभिवन्द्य पश्चात् सप्तभिः श्लोकैः स्ववंशचरित्रवर्णनं प्रास्तुवत्।

- वंशस्तुतिः - श्रीवत्ससगोत्रे समुत्पन्नस्य रचयितुः विद्यागुरुः श्रीनिवासार्यवर्यः यः सुरुपुरसंस्थानस्य आचार्यः। स्वार्वेलवंशजः तिम्मपः तस्य पत्नी च भीममाम्बा। तयोः दम्पत्योः पुत्रः चन्नयदीक्षितः। चन्नयदीक्षितस्य पत्नी रामाम्बिका यस्याः गर्भात् समुत्पन्नः सार्थकनामधेयसहितः आन्ध्रप्राकृतसंस्कृतादिभाषाकवित्वचातुरीवितन्द्रः नागेश्वरः। अस्य विबुधस्य पत्नी

In Public domain. Digitization Muthulakshmi Research Academy

अनन्ताम्बिका पुत्रौ प्रासूत। ज्येष्ठपुत्रः भास्करसूरिः श्रीमत्कोसलवेङ्कटक्षितिपतेः धर्माधिकारी आसीत्। भास्करसूरेः अनुजः एषोऽहं वेङ्कटशास्त्रीति कविः स्ववंशपरम्परां वर्णितवान्।

● कृतिकर्तृस्तुतिः – श्रीयुधिष्ठिराश्वमेधचम्पूप्रबन्धं दशस्तबकेषु विभज्य स्तबकान्ते स्वपाण्डित्यमहत्त्ववर्णनपरकं गद्यं व्यरचयत् कविः। "इति श्रीमद्भूमण्डलसरः पुण्डरीकायमानसुरपुरपरिवृढ श्रीमद्राजाधिराज कोसलवेङ्कटक्षमारमणकरोद्धृतान्दोलिकपार्श्वभागेन चत्वारिंशदवधान-समयैतत्प्रभुग्रथितवज्रमौक्तिकस्थगितबिरुदघण्टामणिशोभितकरेणान्ध्रप्राकृतसंस्कृत कर्णाटादिभाषाकवित्वमहत्त्वशोभितनागेश्वरसुधीन्द्रतनुजेन भास्करविपश्चिदनुजेन वेङ्कटशास्त्रिणा कविसार्वभौमेन विरचिते युधिष्ठिराश्वमेधचम्पूप्रबन्धे दशमस्तबकः" यु.अ.च.10

पञ्चमस्तबकान्ते सुरपुरसंस्थानशासकस्य आश्रयप्रदातुः कोसलवेङ्कटप्रभोः बिरुदान्यपि उल्लितवान् कविः। "इति श्रीमद्राजाधिराज राजा बलवन्तबहिरीरवाबजङ्गमुतहवर् दौलाबबरुल् मुलक् बहादर कोसलवेङ्कटक्षमारमण करोद्धृतान्दोलिकापार्श्वभागेन ....वेङ्कटशास्त्रिणा....."

अनेन आत्मप्रशंसापरकगद्यभागेन रचयिता वेङ्कटशास्त्री सुरपुरसंस्थानस्य श्रीमद्राजाधिराज राजा बलवन्त बहिरी बहादरादि बिरुदजेगीयमानवैभवस्य श्रीमद्वेङ्कटधरारमणस्य आस्थानम् अलञ्चकार। कविसार्वभौम इति बिरुदेन सम्मानितश्च। शतावधानी संस्कृतान्ध्रप्राकृतकर्णाटान्ध्रादि-भाषाकवित्वचणः इति ज्ञायते। तेलुगुलिप्यां एतत्प्रबन्धस्य प्रथममुद्रणं चेन्नपुर्यां 1891 तमे वर्षे श्रीमद्विकृतिवत्सरपुष्यशुक्लप्रतिपदि सञ्जातम्। मुद्रणावसरे कृतिकर्तुः वेङ्कटशास्त्रिणः जामाता यलमकूरु वेङ्कप्पः प्रकटीचकार कानिचन विवरणानि। एतद्विवरणानुसारं अस्य प्रबन्धस्य कर्ता ब्रह्मश्री वरकूरु शतावधानी वेङ्कय्यशास्त्री। अयं कविपण्डितः

In Public domain. Digitization Muthulakshmi Research Academy

सुरपुरसंस्थानस्य राजविद्यागुरुश्च। 1891 तमे वर्षे यदा अस्य प्रबन्धस्य प्रथमं मुद्रणं जातं तदा सुरपुरसंस्थानं हैदराबदसंसाथनान्तर्गतम् आसीदिति मुद्रितपुस्तकस्थविवरणेन ज्ञायते।

- **सुरपुरसंस्थानम्** - डां. वि. राघवन् इति संस्कृतविमर्शकाग्रणीः सुरपुरसंस्थानचरित्रं लिलेख। श्रीमान् सुरवरं प्रतापरेड्डिमहोदयः गोलकोण्डकवुलु इति सञ्चिकायामपि सुरपुरपण्डितानां पाण्डितीगरिमाणं प्रशशंस। पेरुमालगुण्डाचार्येण प्रवरनाम्ना श्रीनिवसेन कविपण्डितेन विरचितं **"सूरिविजयः"** (2010) **"सुरपुरसङ्क्षिप्तराजकीयेतिहासः"** (2013) इति संस्कृत अकाडमी संस्थया मुद्रितं ग्रन्थद्वयं सुरपुरसंस्थानस्य अस्य प्रबन्धकर्तुः वेङ्कटशास्त्रिणः आश्रयप्रदातुः सुरपुरपालकस्य कोसलवेङ्कटभूपालस्य च चरित्रं वर्णयति।

- **सुरपुरसंस्थानाधीशः कोसलवेङ्कटप्पनायकः** – पामिनायकस्य (1752-1773 A.D.) पुत्रः वेङ्कटनायकः अथवा वेङ्कटप्पः (1773-1802 A.D.) सुरपुरस्य द्वाविंशतितमः पालकः। एषः अष्टाविंशतिः वर्षाणि यावत् सुरपुरं शशास। अस्य शासनकालः संस्कृतविद्यायाः स्वर्णिमकाल इति विमर्शकाः परिगणयन्ति।

निजाम् अलि खान् इति हैदराबादसंस्थानपालकेन बलवन्त बहिरि रवा बजङ्ग् मुतहवर् दौलाबबरुल् मुलक् बहादर इत्यादिभिः बिरुदैः प्रतापशौर्ययशोविभूषितः कोसलवेङ्कटनायकः सम्मानितः। कविः स्वप्रबन्धस्य सर्वस्य स्तबकस्यान्ते एतानि **कोसलवेङ्कटप्पनायकस्य** बिरुदानि उल्लिख्य स्वाश्रयप्रदातुः महत्त्वं वर्णितवान् । नैके संस्कृतविद्वांसः कलाकाराः सुरपुरसंस्थानम् आश्रित्य संस्कृतस्य संस्कृतेश्च सेवां चक्रुः। सुरपुरसंस्थानस्य पालकं कोसलवेङ्कटनायकम् आश्रितेषु बहुषु कविपण्डितेषु अन्यतमोऽस्ति अस्य प्रबन्धस्य कर्ता ब्रह्मश्री वरकूरु शतावधानी वेङ्कय्यशास्त्री।

In Public domain. Digitization Muthulakshmi Research Academy

सुरपुरसंस्थानस्य अन्तिमशासकः वेङ्कटनायकः (1853-1858) आङ्ग्लसाम्राज्यं विरुद्ध्य युद्धं चकार। निजामस्य कुटिलनीत्या वेङ्कटनायकः बन्दीकृतः सिकिन्दराबादकारागारे निक्षिप्तश्च। तदनु सैनिकन्यायालये विचरणानन्तरं मद्रासनगरस्थं कारागारं प्रति वेङ्कटनायकः प्रेषणीय इति निर्णयः स्वीकृतः। किन्तु मध्येमार्गमेव वेङ्कटनायकः आत्मार्पणं चकार। 1872 तम वर्षपर्यन्तं आङ्ग्लसर्वकाराधीने आसीत् सुरपुरसंस्थानम्। तदनु भारतमातुः स्वराज्याधिगमं यावत् निजामसर्वकारस्य **"सर्फेंखास्"** अभवत् इति सुरपुरसंस्थानम् इति पेरुमाल् गुण्डाचार्यः सुरपुरसङ्क्षिप्तराजकीयेतिहासे उल्लिलेख। स्वराज्याधिगमानन्तरं कर्णाटकस्य बीजापुरे विलीनमभूत् सोरपुरमिति अभिधीयते चाधुना।

- कृतिकर्तृजीवनकालः - सुरपुरसंस्थानपालकस्य कोसलवेङ्कटनायकस्य शासनकालं मनसि निधाय एतत्प्रबन्धकर्तुः ब्रह्मश्री वरकूरु शतावधानी वेङ्कय्यशास्त्रिणः कालः सप्तदशशतकस्य उत्तरार्धे अष्टादशशतकस्य पूर्वार्धे च आसीदिति प्रमाणयितुं शक्यते। अस्य प्रबन्धस्य रचनाकाले सुरपुरसंस्थानं हैदराबादसंस्थाधीनम् आसीदित्यतः तेलङ्गाणासंस्कृतवाङ्मयेतिहासे श्रीयुधिष्ठिराश्वमेधचम्पूप्रबन्धः अन्तर्भवतीति निश्चप्रचं वक्तुं शक्यते।

- कृतिविमर्शः - **"पद्यं गद्यं च मिश्रं च तत्त्रिधैव व्यवस्थितम्। गद्यपद्यमयी काचिच्चम्पूरित्यभिधीयते"। (का.द.1.11, 31)** इति दण्डिना चम्पूकाव्यलक्षणं प्रोक्तम्। चम्पूत्वं वैदिकसाहित्य एव दरीदृश्यते। चम्पूकाव्यपरम्पराप्रवर्तकस्तु दशमशताब्दीयः नलचम्पूकारः त्रिविक्रमभट्टः इति संस्कृतसाहित्येतिहासकाराणाम् अभिप्रायः। सोमदेवसूरिकृतयशस्तिलकचम्पूः भोजराजकृतचम्पूरामायणं कविकर्णपूरकृतानन्दवृन्दावनं जीवगोस्वामिकृतगोपालचम्पूः नीलकण्ठदीक्षितकृतनीलकण्ठचम्पूः

In Public domain. Digitization Muthulakshmi Research Academy

अनन्तकविकृतचम्पूभारतञ्चेति कानिचन प्रथितचम्पूकाव्यानि सन्ति। सप्तदशशतकस्य उत्तरार्धे अथवा अष्टादशशतकस्य पूर्वार्धे वा विरचितं स्यादयं प्रबन्धः।

- छन्दोवैशिष्ट्यम् - अनुष्टुप् इन्द्रवज्रा उपेन्द्रवज्रा वसन्ततिलकम् शार्दूलविक्रीडितम् स्रग्धरा मालिनीत्यादिभिः वृत्तैः प्रबन्धस्यास्य श्लोकाः ग्रथिताः। वर्णनानुगुणं रसानुगुणञ्च वृत्तं चित्वा श्लोकाः ग्रथिताश्चेति अवगम्यते। वीररसपरिपूर्णाः श्लोकाः स्रग्धरा शार्दूलविक्रीडितम् इत्यादिभिः वृत्तैः गुम्फिताः। भक्तिरसपरकाः संवादपरकाः श्लोकाः अनुष्टुप् इन्द्रवज्रादिभिः वृत्तैः ग्रथिताः।

- अलङ्कारसौन्दर्यम् - अनुप्रासयमकश्लेषादिभिः शब्दालङ्कारैः उपमारूपकोत्प्रेक्षातिशयोक्ति-अर्थान्तरन्यासादिभिः अर्थालङ्कारैश्च मण्डितोऽयं प्रबन्धः सहृदयहृदयान् नूनं रञ्जयति।

- छेकानुप्रासालङ्कारः -

  जैत्रेण मित्रपौत्रेण योजितान् राजितान् शरैः।
  विशिखानशिखान् कुर्वन् रेजे राजा स धीरधीः।। यु.अ.च.2.48

  जैत्रेण पौत्रेण योजितान् राजितान् विशिखान् अशिखान् धीरधीः इति वर्णानां द्विरावृत्तिः अस्ति। अतः छेकानुप्रासः।

- वृत्त्यनुप्रासालङ्कारः

  "तदनु स वाजिमेधवाजिराज उदन्याजन्यदैन्यो वन्यौघमुल्लङ्घ्य माहिष्मतीराजन्यतन्तन्यमानारामजञ्जन्यमानविटपितटीपनीपतत्सुमालिमधूलिरिञ्छोलिगन्धबन्धुरोर्मिकाचाचल्यमानजलगजोच्चैर्मदां स्वस्नायिदुष्कर्मवर्ममर्मनिर्मूलन-कर्मदं पान्थजनशर्मदां नर्मदां समाससाद"।

In Public domain. Digitization Muthulakshmi Research Academy

नकारस्य लकारस्य रकारस्य मकारस्य टकारस्य दकारस्य असकृत् आवृत्तिः अस्ति इत्यतः वृत्त्यनुप्रासः।

- अन्त्यानुप्रासालङ्कारः

परस्परजयेषणौ पठितवीरसम्भाषणौ
विपक्षजनपेषणौ विबुधसुन्दरीतोषणौ।
नियुद्धकृतिरोषणौ निशितविक्रमोन्मेषणौ
व्यशोष्यतरघोषणौ व्यलसतामुभौ भीषणौ।। इत्यस्मिन् पद्ये षणौ इति वर्णौ पादान्ते स्तः। अतः अन्त्यानुप्रासः।

- यमकालङ्कारः

विराजन्तं विराजन्तं वीक्ष्य गम्भीरमानसम्।
धर्मजातं मुनिर्ज्ञातधर्मजातमभाषत।। यु.अ.च. 1.22

विराजन्तं धर्मजातं इत्यनयोः शब्दयोः भिन्नार्थकतया द्विरावृत्तिः जाता। अतः यमकालङ्कारः।

उभयश्लेषः

सभङ्ग-अभङ्ग-उभयात्मकश्चेति श्लेषः त्रेधा भवति। त्रविधश्लेषा अपि काव्येस्मिन् दरीदृश्यन्ते।

त्रिविक्रमभट्टस्य नलचम्पूप्रबन्धस्य प्रभावः अस्मिन् प्रबन्धे प्रचुरतया दृष्टिगोचरीभवति। सभङ्गाभङ्गश्लेषप्रयोगे निपुणोस्ति त्रिविक्रमभट्टः। तद्वत् सभङ्गाभङ्गश्लेषप्रयोगेण काव्यं विरचय्य चेतः चमत्करोति कविः शतवधानी वेङ्कय्यशास्त्री।

परमसुदानं कृत्वा तातस्ते दातृलोकमान्योभूत्।
परमसुदानं कर्वन्नभवस्तस्मादहो त्वमप्यधिकः।। यु.अ.च.2.53

In Public domain. Digitization Muthulakshmi Research Academy

परम-सुदानं इति पदभङ्गेन कर्णस्य दातृत्वं कीर्त्यते। परम्-असुदानं इति पदभङ्गेन कर्णसूनोः वृषकेतोः वीरत्वं श्लाघ्यते इति विशेषः।

- **उपमालङ्कारः**

  अर्थालङ्काराः अपि विपुलतयास्मिन् प्रबन्धे दरीदृश्यन्ते।

  ईषत्फुल्लसरोजानामूर्ध्वाधश्चारिणोऽलिनः।

  भान्तीन्द्रजालकृत्पाणौ धमन्याङ्गुलिका इव।। यु.अ.च.2.11

  अलिनः उपमेयं धमन्याङ्गुलिकाः उपमानम् इव उपमावाचकम् शोभन्ते इति साधारणधर्मः अतोत्र पूर्णोपमा। इत्थं नैके शब्दार्थालङ्काराः प्रबन्धे वरीवर्त्तन्ते।

- **रसपरिपोषणम् -** युधिष्ठिराश्वमेधचम्पूप्रबन्धे वीररसः अङ्गीरसः वर्त्तते। शृङ्गाररौद्रभयानकबीभत्साद्भुतरसाः अङ्गरसाश्च सन्ति। सुधन्वाधिपस्य प्रतापं वीररसगर्भितश्लोकेन कविरित्थं वर्णयति -

  वाहान् मोहगतान् रथं प्रवितथं केतुञ्च वीतांशुकम्

  सूतं पीतभुवं गुणं कणसमञ्चापं विरूपं वरम्।

  तूणं बाणधुतं शरैः खरतरैश्छत्रं विनेत्रं क्रुधा

  तन्वानोऽस्य तदाट्टहासमकरोद्वीरस्सुधन्वाधिपः।। यु.अ.च. 5.18

पार्थेन खण्डितं सुरथस्य शीर्षं गरुडः यदा क्षेत्रस्य वाट्यामधः अक्षिपत् तदा नन्दिकेश्वरः तच्छीर्षं गृहीत्वा शङ्कराय ददौ। अद्भुतरसभरितः श्लोकोऽयं सहृदयचेतः नूनं चमत्करोति।

भीतस्सन्परिधाव्य पत्ररथराट् क्षिप्रं सुपर्णार्थितां

ख्यातीकर्तुमिवाक्षिपद्वरशिरः क्षेत्रस्य वाट्यामधः।

शैलादिस्त्वनुधाव्य शीर्षममलं गृह्णन् ददौ शम्भवे

सोयं तत्तरलीचकार नगराट् कन्यायितार्थाङ्गकः।। यु.अ.च.5.68

In Public domain. Digitization Muthulakshmi Research Academy

श्रीकृष्णः हस्तिनापुरं प्रति प्रयाणं कुर्वन् अष्ट महिषीभिस्सह सरससल्लापान् चकार। शृङ्गाररसभरिताः श्लोकाः कर्णरसायनायन्ते।

त्वन्नाभ्या जितया भिया सहितया कान्ते सरस्यानया
बालालोलमृणालबाहुविलसत्कञ्जाञ्जलीनां ततौ।
दीनारप्रकरा विधातुमुपदामस्याः प्रसादेच्छया
निक्षिप्ता इव विस्फुरन्ति नितरां सद्वर्णकाः कर्णिकाः।। **यु.अ.च.2.18**

- कल्पनाचातुर्यम् - महाभारतम् इति इतिहासग्रन्थात् अश्वमेधयागमिति अनपूर्वामपि कथाम् आश्रित्य कविः स्वकल्पनाचातुर्येण असमानपाण्डित्येन च चम्पूप्रबन्धमिमं रचयामास। भद्रावतीनगरे अश्वमेधयागानुकूलस्य अश्वस्य ग्रहणं श्रीकृष्णस्य अष्टमहिषीभिस्सह सरससल्लापः ऋतुवर्णनं युद्धवर्णनं पुरनगरवनोपवनसूर्योदय-चन्द्रोदयपर्वतसरोवरादीनां वर्णनं कविकल्पना-चातुर्येण नितरां पाठकचित्तमाकर्षति।

चण्डाल्यञ्चितपद्मिनीकरपरामर्शाद्दिनान्ते रविः
प्रायश्चित्तकृते शिखावति पतन् प्रातः पुना रज्यते।
मासं मासमसौ सुधानिधिगतेजैंवातृकत्वं भज
त्यभ्यस्तं किल कर्मगर्ह्यमपि तन्मुञ्चन्ति नो रागिणः।। **यु.अ.च.2.4**

- वर्णनावैदुष्यम्

नन्दनवनमिव राजति वनमिह चलदूर्मिकाप्सरःपूर्णम्।
विलसद्धरिचन्दनगं सुन्दरमन्दारसूनसन्तानम्।। **यु.अ.च.2.10**

सहजतया कृतमिदं प्रकृतिवर्णनं सहृदयहृदयपटले चित्रमिव आविष्क्रियते।

In Public domain. Digitization Muthulakshmi Research Academy

- शास्त्रवैदुष्यम् - सकलशास्त्रपारङ्गतोऽयं कविः सन्दर्भानुसारं स्वकं तत्तच्छास्त्रवैदुष्यं श्लेषगर्भितवचोभिः प्रदर्शयामास।

- व्याकरणशास्त्रवैदुष्यं - व्याकरणशास्त्रविशेषाः काव्ये सर्वत्र दरीदृश्यन्ते। विशेषव्याकरणप्रयोगाः कवेः व्याकरणपाण्डित्यगरिमाणं निरूपयन्ति।

यङ्लुक् प्रत्ययान्तरूपाणि

बरीभरीति स्म रुषं वृषात्मजो जरीहरीति स्म शरैररीश्वरान्।
चरीकरीति स्म मुदं बुधस्त्रिया वरीवरीति स्म जयश्रियं स्वयम्।।

- युु.अ.च.3.19

इत्यस्मिन् श्लोके बरीभरीति जरीहरीति चरीकरीति वरीवरीति यङ्लुक् प्रत्ययान्तरूपाणि सुचारुतया प्रयुक्तानि।

कर्तुमतद्धितवृत्तिं किरीटिनं नीलकेतनोरोजा
आगत्य सैन्यसहितस्तच्छरपातात्तदैकशेषोभूत्।।

अस्मिन् श्लोके तद्धितवृत्तिः एकशेषः इति व्याकरणशास्त्रगतपारिभाषिकपदद्वयं श्लोके प्रायुङ्क्त कविना।

- कामशास्त्रवैदुष्यम् - कामशास्त्रमर्माणि अन्यापदेशेन कविः तत्र तत्र उल्लिखति। यथा

एलालतावलितपादशिरःप्रदेशौ रम्यो लवङ्गतरुरुज्ज्वलति प्रवेकः।
कन्दर्पशास्त्रगतमर्मविदा रमण्या कान्तः किलागमचणः कृतनागबन्धः।।

- यु.अ.च.2.18

- योगशास्त्रवैदुष्यम्

विदुरोक्तिसहस्रारे हंसो वसति खल्विति।
प्रत्यक्षीकुरुते हंसं कमले चर्मचक्षुषाम्।। यु.अ.च.2.15

In Public domain. Digitization Muthulakshmi Research Academy

योगशास्त्रगतस्य सहस्रारचक्रस्य हंसस्य च वर्णनं करोति अस्मिन् श्लोके कविः।

तथैव आयुर्वेदस्य गजशास्त्रस्य अश्वशास्त्रस्य अन्यान्यशास्त्राणाञ्च मर्माणि तत्तत्सन्दर्भे आविष्करोति कवितल्लजोऽयम्।

- **नायकः**

श्रीकृष्णः युधिष्ठिरः भीमः अर्जुनः वृषकेतुः मेघवर्णः साल्वानुजः प्रद्युम्नः इत्यादयः बहवः नायकाः अस्मिन् प्रबन्धे दृश्यन्ते। अश्वमेधयागानुकूलम् अश्वमानेतुं नियुक्तः भीमः प्रथमद्वितीयस्तबकयोः प्रधाननायकः अस्ति। तृतीयस्तबकादारभ्य यागाश्वरक्षणं कृतवतः अर्जुनस्य प्रतापः प्रधानतया वर्णितः। अर्जुनः युद्धे नैकान् भूपालान् जित्वा अश्वमेधाश्वं कुशलतया हस्तिनापुरमानीय युधिष्ठिरस्य यागानुष्ठाने साहायकोऽभूदित्यतः पूर्णप्रबन्धाकलनेन अर्जुन एव धीरोदात्तनायकः प्रबन्धस्य प्रधाननायकश्चेति निश्चेतुं शक्यते।

- **युधिष्ठिराश्वमेधचम्पूप्रबन्धस्य सङ्क्षिप्तकथा**

आदि-सभा-अरण्य-विराट-उद्योग-भीष्म-द्रोण-कर्ण-शल्य-सौप्तिक-स्त्री-शान्ति-अनुशासनिक-अश्वमेध-आश्रमवास-मौसल-महाप्रस्थानिक-स्वर्गारोहण-हरिवंश इति अष्टादशपर्वसमन्वितमस्ति व्यासविरचितमहाभारतम्। आश्वासचतुष्टयोपेतस्य अश्वमेधपर्वणः प्रख्यातं इतिहासकथोद्भूतं कथावस्तु आश्रित्य स्वीयकल्पनाचातुर्येण दशभिः स्तबकैः युधिष्ठिराश्वमेधचम्पूप्रबन्धः कविना व्यरचि।

प्रथमस्तबकः – कुरुक्षेत्रयुद्धानन्तरं हस्तिनाख्यां कुरूणां राजधानीम् अधिष्ठाय युधिष्ठिरः राज्यं परिपालयति स्म। तदा व्यासः हस्तिनापुरम् आजगाम। दौवारिकः व्यासमहर्षेः आगमनवार्तां राजानं न्यवेदयत्। युधिष्ठिरः व्यासमहर्षिं समभ्युद्गम्य विध्युक्तधर्मेण अर्चां विधाय तं रत्नसिंहासने उपवेशितवान्। तदनु

In Public domain. Digitization Muthulakshmi Research Academy

व्यासमहर्षिः कुशलं पप्रच्छ। कुरुक्षेत्ररणे कर्णभीष्मद्रोणादिप्रमुखवीराणां मारणेन व्याकुलं वैराग्यसक्तं वनवासरक्तञ्च धर्मराजम् समाश्वासयन् अश्वमेधयागं कुरु इति व्यासमहर्षिः उपदिदेश। विश्वम्भराधीश्वरेण चिरपरिपाल्यमानायां भद्रवत्यां नाम नगर्यां विद्यमानं अश्वमेधाश्वं यौवनाश्वम् आनेतुं भीमः प्रेषणीय इति अपि महर्षिः मार्गदर्शनं चकार। रिक्तकोशः धर्मराजः यागनिर्वहणे असमर्थतां यदा प्रकटीचकार तदा मरुत्तधरा पुरन्दरेण अश्वमेधयागानुष्ठानानन्तरं बाडब्याय दत्तं दक्षिणारूपं द्रविणं तेन गृहीत्वा गन्तुम् अशक्यत्वात् तत्रैव हिमक्षोणीभृदुपत्यकायां निक्षिप्तमस्ति। तत् अद्यापि वरीवर्त्तते। तदानेतुम् अर्जुनः नियोजितव्य इति व्यासः उपायं सूचयामास। तत्क्षणं भीमः यागाश्वानयनाय प्रतिज्ञां चकार। तदनु व्यासमहर्षिः ततः निर्गतः। धर्मराजः भक्तितत्परमनसा कृष्णं चिन्तयामास। प्रत्यक्षं जातं हरिं वीक्ष्य पुलकितगात्रः बभूव धर्मराजः। पश्चात् कर्णघटोत्कचसुताभ्यां वृषकेतुमेघवर्णाभ्यां सह भीमः प्रस्थाय नानादेशान् गिरिनदीनदान् उल्लङ्घ्य भद्रावतीनगर्याः सीम्नि विराजमानम् उद्यानवनम् अभजत्।

द्वितीयस्तबकः – औषसिकीं सन्ध्यां भक्त्या अभिवन्द्य भीमः रमणीयप्रकृतिं वर्णयति। वृषकेतुरपि वनस्य रामणीयकतां वर्णयति। आरामे विलसन्तं सरोवरं भीमः परिवारं दर्शयति। सरोवरे निमज्जन्तः गजाः अवलोकिताः। समीपवर्त्तिनः गिरेः अधित्यकायां गुहाकुहरं विवेश भीमः। तत्र नानाविधाश्वानां मध्ये विराजन्तं हंसनामानं यज्ञाश्वं वृषकेतुः भीमं दर्शयामास। मेघवर्णः भीमस्य भ्रूसङ्केतेन तम् अश्वं लङ्घयामास। एदद्वृत्तं विज्ञाय भद्रावतीनगरपालः चतुस्सहस्रसङ्ख्याकान् रथिकान् रणपथिकान् प्रेषयामास। तां सेनां मेघवर्णवृषकेतू निरोधयामासतुः। पौण्ड्रकेन स्वकेन गदायुधेन भीमः सेनां विभेदयामास। भद्रावतीपालः यौवनाश्वः स्वयं युद्धक्षेत्रं प्रविश्य वृषकेतौ पर्वतास्त्रप्रयोगं चकार। वृषकेतुना प्रयुक्तः बाणः यौवनाश्वमुखाम्भोजे प्रविवेश। यदि अहं माधवस्य भक्तः अस्मि तर्हि नृपतिरयं जीवतु इति रथे पतितं विसज्ञं राधेयपुत्रं वृषकेतुं करेण स्पृष्ट्वा

In Public domain. Digitization Muthulakshmi Research Academy

समालिलिङ्ग। तदनु भीमममपि आदरेण समालिङ्ग्य यौवनाश्वः मेघवर्णं गजम् अधिरोप्य स्वयमपि गजमारुह्य तैस्साकं स्वपुरं प्रविवेश।

तृतीयस्तबकः – ते सर्वे हस्तिनापुरं प्राप्ताः। तदनु (षष्ठियोजनावत्यां सत्यां हस्तिनावत्यां) भीमः धर्मराजं निवेदयामास यत् यौवनाश्वः यज्ञाश्वेन साकम् आगतः। भवता अभिगन्तव्यः। कृष्णं पुरस्कृत्य युधिष्ठिरः सपरिवारं गत्वा यौवनाश्वं स्वागतीचकार। य़ौवनाश्वं स्वनिवासञ्च नीतवान्। पश्चात् कृष्णः द्वारकां प्रतिनिवृत्तः। ततः व्यासः हस्तिनापुरम् आगतः। भीमः कृष्णस्य आनयनाय द्वारकां गच्छेत्। अश्वोत्सर्गः अचिरेण भवेदिति इति व्यासः धर्मराजम् आदिदेश। युधिष्ठिराज्ञया भीमः द्वारकां ययौ। कृष्णः भीमं स्वागतीकृत्य भोजनार्थं तं शुद्धान्तं प्रवेशयामास। भोजनावसरे भीमकृष्णयोः चमत्कारपूर्णः हास्यसल्लापः वर्णितः। बलरामे द्वारकनगरधुरं निक्षिप्य सत्यभामा-मित्रविन्दा-यमुनादिभिः कान्ताभिः कृष्णः हस्तिनापुरं प्रस्थितः। हस्तिनापुरगमनावसरे कृष्णस्य तद्रमणीनाञ्च मध्ये सरससल्लापः जातः। रुक्मिणी-सत्यभामा-जाम्बवती-लक्षणा (यमुना)-मित्रविन्दा-कालिन्दी-सुदन्ता-भद्रा-चेति अष्टमहिषीभिः श्लोषगर्भितं सरससल्लापं कुर्वन् कृष्णः कालिन्दीतीरमासाद्य सैन्यम् अवतार्य युधिष्ठिराय स्वागमनवार्तां प्रेषयामास। यज्ञाश्वम् आदाय युधिष्ठिरः सत्वरमागत्य हरिम् आलिलिङ्ग। अनुसाल्वः स्वभ्रातृद्रुहम् हरिं हन्तुं ससैन्यमागत्य यज्ञाश्वं परिजग्राह। राजा उभयोस्सेनयोः कोलाहलं श्रुत्वा पुररक्षायै पार्थे न्यस्ताज्ञकोऽभवत्। तुमुलं युद्धमभूत्। साल्वसोदरं वृषकेतुः जग्राह। कृष्णः वृषकेतुं प्रशशंस। सर्वैस्सह कृष्णः हस्तिनापुरं प्रविवेश। चैत्रमासः समागतः। पूर्णिमायां अभिजिन्मुहूर्ते धर्मराजः यज्ञाश्वम् अलङ्कृत्य तस्य फाले स्वबिरुदाक्षरकुट्टिमं पट्टकम् आबध्य विसर्जयामास।

चतुर्थस्तबकः – तं यज्ञाश्वम् अनुसरन्ति स्म वृषकेतुः मेघवर्णः साल्वानुजः पार्थः सेना च। वसन्तलक्ष्मीम् ईक्षमाणाः एते महारथाः यज्ञाश्वेन साकं

In Public domain. Digitization Muthulakshmi Research Academy

नर्मदां समाससाद। तत्र प्रवीरो नाम नीलध्वजसूनुः निजसीमन्तिन्या मदनमञ्जर्या सह आरामवाटिकायां विहरन् यज्ञाश्वं ददर्श। यज्ञाश्वस्य निटालस्थं हेमपट्टकस्थं विवरणं पठित्वा रुष्टः प्रवीरः तं कुटे निरुध्य युद्धाय रथमारुरोह। वृषकेतुः (वृषध्वजः) यज्ञाश्वमोचनाय प्रवीरम् आदिदेश। प्रवीरः सैनिकेषु बाणप्रहारं चकार। साल्वानुजः बाणैः प्रवीरं पातयामास।

नीलकेतुः ससैन्यं युद्धक्षेत्रमवाप। प्रद्युम्नः वैरिवरान् बाणैः जघान। सः नीलध्वजमपि बाणैः निरोधयाञ्चक्रे। नीलध्वजः तीक्ष्णैः बाणैः प्रद्युम्नेन साकं युद्धं चकार। यौवनाश्वः आश्विकबलं चिच्छेद। माहिष्मतीपालकः नीलकेतुः यौवनाश्वं वृषकेतुं साल्वसोदरं लक्ष्यीकृत्य बाणान् प्रयुयुजे। तदा अर्जुनः गाण्डीवेन शरसन्धानं चाकर। नीलकेतुः स्वजामातरं स्वाहावल्लभं अग्निम् अस्त्रीकृत्य सैन्यं विद्रावयित्वा कलहकारणं यज्ञाश्वं गृह्णन् महिष्मतीम् जगाम।

क्रोधेन अर्जुनः नारायाणास्त्रं प्रयुयुजे। भीत्या अग्निः तव नीलध्वजस्य च साप्तपदीनं करवाणीति प्रतिज्ञाय श्वसुरं नीलकेतुम् आगत्य अर्जुनकृतोपकारेण खाण्डवदहनेन असह्याजीर्णरोगात् मुक्तोऽहम्। ततः रणं मा कुरु इति सामवचनम् अवादीत्। दुश्शीलां ज्वालां स्वमहिषीं पुरात् निष्कास्य अग्निवचनमनुसृत्य यज्ञाश्वं प्रत्यर्पयित्वा नीलकेतुः अर्जुनं शरणम् अयाचत। काश्यां गङ्गाज़लेन स्पृष्टा रुष्टा ज्वाला गङ्गां प्रति अभाणीत्। सुतं देवव्रतं मारितवन्तम् अर्जुनं प्रतिकर्तुम् असमर्था त्वं पापिष्ठा चेति। तद्वचनेन प्रचोदिता गङ्गा षण्मासावधौ स्वपुत्रेण अर्जुनः शीर्षच्छेद्यो भवत्विति शशाप।

तदनु अर्जुनादिभिः अनुस्रियमाणः यज्ञाश्वः विन्ध्याचलं विगाह्य दक्षिणस्यां दिशि ययौ। शिलाग्रे स्वं विग्रहं विघृष्य लग्नः सन् अग्रे गन्तुम् अशक्तः। तदा समीपस्थं वनं प्रविश्य अर्जुनः आश्रमस्थं सौभरिं नामकं मुनिं दृष्ट्वा तं ववन्दे। पुरा उद्दालकमहर्षिः स्वपत्नीम् आज्ञाप्रतिक्रियाकारिणीं शिला भवेति

In Public domain. Digitization Muthulakshmi Research Academy

शशाप। तदनन्तरं भाविनार्जुनहस्तपरामर्शेण यथापूर्वं भविष्यसीति शापविमोचनोपायेन ताम् अन्वग्रहीत् सः। सैव सा शिलेति मुनिः सौभरिः अवादीत्। मुनिं नमस्कृत्य गत्वा तां शिलाम् अस्पृशत् अर्जुनः। ततः मुक्ता शापात् चण्डी। पश्चात् अग्रे चलितुं शक्तं यज्ञाश्वम् अनुसरन् चम्पकापुरीं जगाम अर्जुनः। पुरपरिसरे सरन्तम् अश्वं चाराः परिगृह्य राज्ञे अर्जुनकथाम् अकथयन्।

यज्ञाश्वं बद्ध्वा अर्जुनेन साकं युद्ध्वा तत्पक्षागतकृष्णदर्शनेन शरीरम् अमलीकरोमीति मरालध्वजः (हंसध्वजः) आन्तरङ्गिकैः सम्मन्त्र्य तथा समाचरत्। यः रणाय नायाति तं तप्ततैले कटाहे क्षिप इति पुरोधसौ शङ्खलिखितौ अज्ञाप्य मरालध्वजः निरगात्। हंसध्वजस्य पुत्रः सुधन्वा ताम् आज्ञां श्रुत्वा मातरं नत्वा स्वगेहम् अगमत्। तत्र तस्य पत्नी प्रभावती स्मरानलतप्ता विलोकिता। तस्याः स्मरपीडां परिहृतवान् सुधन्वा। शङ्खलिखितौ सुधन्वानम् आहूय तप्ततैले कटाहे प्रविश इति राजाज्ञां तस्मै आज्ञापयामासतुः। किन्तु हरिपदि लग्नचित्तं सुधन्वानम् तप्तमपि तत्तैलं न ददाह। सुधन्वानम् आलिङ्ग्य शङ्खलिखितौ मरालकेतोः सविधं नीतवन्तौ। राजा आनन्देन सुधन्वानं सेनायाः आधिपत्ये नियुज्य आशीर्भिः अनुगृह्य यागाश्वरक्षणविचक्षणोऽभूत्।

पञ्चमस्तबकः उभयोः शत्रुपक्षयोः सैन्यं युद्धक्षेत्रम् अवाप। शत्रुसैन्ययोः मध्ये प्रवृत्ते घोरे युद्धे वृषध्वजस्य बाणैः विसंज्ञः भूत्वा अपि सुधन्वा क्षणेनैव लब्धसंज्ञः सन् तस्य प्रतिभटनं चकार। प्रद्युम्नं कृतवर्माणं यौवनाश्वं सात्यकिं नीलकेतुञ्च नैकधा शरैः बाधित्वा अन्ते अर्जुनं सम्मुखीचकार सुधन्वा। अर्जुनस्य रक्षणाय युधि कृष्णः प्रकटीचकार। त्रिविक्रमसहायकम् अर्जुनं वीक्ष्य सुधन्वा एकविक्रमसाहाय्योऽहं मम बलं दर्शयामीति अवादीत्। त्रिभिः बाणैः सुधन्वानं न हन्मि चेत् वाराणस्यां नैचिकीनिशारणजातं वृजिनमेनं भजतु इति अर्जुनः प्रत्यश्रौषीत्। तान् बाणान् व्यर्थीकरोमीति सुधन्वापि प्रत्यजानात्। अर्जुनकरमुक्तयोः

In Public domain. Digitization Muthulakshmi Research Academy

द्वयोः बाणयोः वितथीचकार सुधन्वा। कृष्णस्य अनुग्रहेण अर्जुनः सुधन्वनः मूर्धानं कबन्धात् चिच्छेद। तदा कृष्णः स्वपादाब्जे पतितं गोविन्दाच्युतनामकीर्तनपरं भृङ्गायमाणं सुधन्वनृपतेः शिरः गगने अक्षिपत्। शिवेन स्वमुण्डमालायां सुधन्वनः मूर्धा अन्तर्बभूव। भ्रातुः निधनेन क्रोधाग्नितप्तः सुरथः युद्धरङ्गमवतीर्य अर्जुनसैन्येन तुमुलं युद्धं चकार। शराघातेन तस्यापि कबन्धेन पृथग्भूय सुरथाननं भूमौ पपात। कृष्णस्य आज्ञया गरुडः आकाशात् आगत्य प्रयागे तन्मस्तकं क्षेप्तुं तत उड्डीय निर्गतः। तदा शङ्करस्य आज्ञया भृङ्गिरिटिः क्षिप्तं मस्तकं गृहीत्वा शम्भवे ददौ। तदपि सुरथमूर्धानं स्वमुण्डमालायां शङ्करः दधार। तदनु कृष्णस्य उपदेशेन पार्थेन सह मैत्रीं चकार हंसध्वजः। तदनु द्वारवतीं जगाम श्रीकृष्णः।

षष्ठस्तबकः - ग्रीष्मर्तुवर्णनेन आरब्धोऽयं स्तबकः। अश्वमेधाश्वः रमणीयप्रदेशम् अवाप। काचित् कामिनी हयम् अवेक्ष्य तं परिगृह्य स्वस्वामिनीम् अनयत्। तद्देशस्य स्वामिनी प्रमीला अर्जुनं प्रति समाकृष्टा सती रणभुवमेत्य बाणैः तं ताडयामास। पुंसां स्त्रीभिस्सह घोरं युद्धं समासीत्। तदा आकाशवाणी समश्रूयत प्रमीलायाः मनोरथं पूरय इति। तद्वचनमनुसृत्य अर्जुनः तां पाणौकृत्य प्रेमपूरणाय नायं समयः समुचित इति तां हस्तिनापुरं प्रेषयामास। ततः प्रस्थाय मखतुरगम् अनुसरन् बकासुरपुत्रस्य भीषणनामकासुरविभोः देशं विवेश। ब्रह्मरक्षः पुरोधा पुष्पाणां मार्गणार्थं विपिनम् उपगतः तत्र अश्वमेधाश्वं वीक्ष्य भीषणासुरपतिं निवेदयामास। दानवीनां दौष्ट्यम् असहमानः भीमः ताः कठोरमुष्टिघातैः दण्डयामास। युधि पार्थः भीषणासुरं चिच्छेद। तदनु अग्रे सरन्तं सवाश्वः अनुससार अर्जुनः। वर्षर्तुः आविरासीत्। प्रावृषेण्यं सौन्दर्यं वीक्षन् अग्रे गच्छति पार्थे....

सप्तमस्तबकः मणिपुरं प्रविवेश मखाश्वः। हंसध्वजं पुरस्य विवरणं पप्रच्छार्जुनः। बभ्रुवाहनः मणिपुरप्रभुः। अर्बुदकोटिगण्यं सैन्यं तस्येति अवादीत्।

In Public domain. Digitization Muthulakshmi Research Academy

सेवकेनानीतम् अश्वम् दृष्ट्वा पितुः अर्जुनस्य आगमनं विदित्वा हर्षोत्फुल्लहृदयः सन् बभ्रुवाहनः पितरमुपेत्य तत्पादौ ननाम। कस्त्वं शिशो इति ब्रुवन्तम् अर्जुनं तत्पुत्रः जगाद। अहं तव सुतः तीर्थयात्रोत्सवे चित्राङ्गदार्जुनयोः समागमेन जातश्चेति स उवाच। अश्वं गृहीत्वा क्षत्रियधर्मम् अपालयन् भिया आनतोऽसि। अतो त्वं न मम सूनुरिति पितुः अर्जुनस्य वचनेन प्रेरितः बभ्रुवाहनः युधि पितरं सम्मुखीचकार। वृषध्वजबभ्रुवाहनौ परस्परं युद्धं चक्रतुः। वृषध्वजशिरः पार्थस्य पादाम्बुजे पपात। तदनु प्रवृत्ते अर्जुनबभ्रुवाहनयोः द्वन्द्वयुद्धे अर्जुनः बभ्रुवाहनेन बाणेन हतः। गङ्गायाः शापवचनेन खलु पुत्रेण बभ्रुवाहनेन हतोऽर्जुनः। विमात्रा उलूपिकया आज्ञप्तः बभ्रुवाहनः जीवमणेराहरणाय वाहसेनलोकं प्रविवेश। नागान् जित्वा लब्धजीवनरत्नः बभ्रुवाहनः प्रत्यागतः तूर्णम्। मणिना कृष्णेन स्पृष्टः अर्जुनः प्राणीत् सह वृषध्वजेन। चित्राङ्गदोलूपिके हस्तिनगरीं प्रेषयित्वा सेनापरिवृतः फल्गुनः रत्ननगरं प्रत्युद्ययौ।

अष्टमस्तबकः शरत्कालवर्णनेन स्तबकोऽयं प्रारब्धः। अश्वमेधयागं कुर्वन् मयूरध्वजः स्वपुत्रं ताम्रध्वजं स्वाश्वमेधाश्वानुगमने नियोजयामास। ताम्रध्वजः मन्त्रिणा नकुलध्वजेन यौधिष्ठिरतुरगागतिं विज्ञाय तं तुरगमवष्टभ्य सैन्यमर्धचन्द्राकृत्या नियोजयामास। कृष्णः स्वसैन्यं गृध्रमिवारचय्य शत्रुसैन्यं प्रतिभटीचकार। कृष्णमुक्तसुदर्शनचक्रेण शुत्रसैन्यं तृणवत् भस्मसात् कृतम्। रुषा ताम्रध्वजः कृष्णं पदयुगमेकेन करयुगलमेकेन करेण गृहीत्वा यत्रार्जुनस्तत्र प्राक्षिपत्। पार्थमपि जित्वा निजपुरीं प्रविश्य आद्यन्तम् उदन्तं पितरं मयूरकेतनं अभाणीत्।

नवमस्तबकः वृद्धस्य रूपं धृत्वा कृष्णः अर्जुनं शिष्यं विधाय पुरं प्राविक्षत्। सन्ध्यावर्णनं पुरवर्णनञ्च पौराणां विटानां कामकलापवर्णनञ्च मनोहारितया आविष्कृतम्। प्रभाते तौ मायाविप्रौ नृपप्रासादमासाद्य प्रतीहारेण प्रवेशितौ

In Public domain. Digitization Muthulakshmi Research Academy

सभामभजताम्। तव नगरागमनवेलायां मत्सुतः सिंहेन गृहीतः। त्वदर्धदेहेन प्रीतस्सोऽपि सिंहः तं मुञ्चतीति। तस्मात् अनेन शिष्येण साकम् आगतोऽस्मीति मायाविप्रः अभाणीत्। तद्विप्रोक्तप्रकारेण स्वकुटुम्बिन्या कुमुद्वत्या सुतेन ताम्रध्वजेन च मध्येकृत्यात्मानं क्रकचधारया विकर्तितार्धमूर्धा आसीत् राजा। तस्य राज्ञः वामनेत्रनिष्क्रान्तं बाष्पमालोक्य रोदनपूर्वकं दानमदृष्टचरं तदसमञ्जसमिति उद्यान्तं विप्रमभाणीत् इत्थं सव्येतरद्वपुः पूतं नाहमित्येष वामभागो रोदितीति। ततो हृष्टः कृष्णः स्वरूपम् उत्थापयामास। मयूरध्वजः राज्यमखिलं कृष्णाय समर्पयामास। ततः मयूरध्वजः ताम्रध्वजश्च अर्जुनमनुगतौ। कृष्णेन साकं सपरिवारः अर्जुनः वीरवर्मणो नगरसीमानमगाहत।

दशमस्तबकः पञ्च वीरवर्मणः सुताः अश्वम् अवरुध्य पाण्डवसैन्येन साकं अयुध्यन्त। (ग्रन्थकर्तुः पुत्रः नृसिंहशास्त्री गद्येन ग्रन्थं विस्तारयति अत्र इति उल्लिखितम्।) युधि सारस्वतपुरप्रभुं वीरवर्माणं कृष्णः पादेन ताडयामास। कृष्णपादस्य स्पर्शेन धन्यं मन्यमानः नृपः तं प्रणिपत्य अर्जुनेन साकं मैत्रीं विधाय निजभवनमानीय पञ्चदिनानि हरिमाराध्य तदनु तेन समं कौन्तुलपुटभेदननिकटमागतः। तत्र नारदम् ऐक्षत कृष्णः। नारदः कुन्तलपुरीनृपं चन्द्रहासं विष्णुभक्तं नितरां प्रशशंस। तेन मैत्री प्रशस्येति उपदिदेश च। चन्द्रहासः कृष्णं समाराध्य पार्थेन चागमत्। हेमन्तर्तुः समारब्धः। ततः अर्जुनः अजकदाल्भ्यस्य आश्रमं प्राप्य तदाशीर्भिः अनुगृहीतस्सन् जयद्रथपुरमेत्य दौश्शलेयं भागिनेयं पुरस्कृत्य कुसुमावतीपुरम् उपजगाम। पुर्याः अस्याः दैत्यराजः सिंहध्वजः सहस्रोनलक्षं वत्सरान् तपस्यति स्म। इन्द्रः ब्रह्मसमीपमुपेत्य दैत्यकृततपश्चर्यामधिकृत्य उपबृंहितवान् यदि दैत्योपि तपस्यति लक्षं शरदस्स विष्णुपदराट् स्यादिति उक्त्वा ब्रह्मा विष्णुना साकं कैलासमाप। तेषां वचनमङ्गीकृत्य केशवः वरेण अनुग्रहीतुं दैत्यान्तिकमगात्। तस्मै अभीष्टान् वरान् प्रदाय बालकेन तव निधनो भविता इति गूढमुदीर्य अन्तरधात्।

In Public domain. Digitization Muthulakshmi Research Academy

दनुजाः अश्वं बध्वा पाण्डवसैन्येन युद्ध्वा तदानयन्। सिंहध्वजः सर्वान् वीरान् पराजितवान्। हरिं दिदृक्षुं वृषकेतुपुत्रम् आदाय भीमः रणरङ्गमेत्य दैत्यबाणेन भूम्यां पपात। वृषकेतुशिशुस्तं लीलाय जघान। ततः कृष्णः सर्वैस्सह शोणितपुरीं जगाम। कृष्णः शङ्करमिह आनयेति नारदं प्राहिणोत्। उमया सहागतं शिवमवलोक्य कृष्णः हर्षमापेदे। बाणाभिधेयः शोणितपुराधिपः माधिपोमाधिपौ नमस्कृत्य पुरमानीय सत्कृतवान्। ततः प्रस्थाय भोजकोटिपुरं प्राप। नारदः भोजकोटिपुराधिपस्य दुन्दुभेः शौर्यं वर्णयामास। वीरवर्मा युद्धाय दुन्दुभिम् आहूतवान्। कृष्णः चक्रेण तं जघान। तदनु कतिपयैः दिवसैः हस्तिनापुरीमेत्य सपरिवारः अर्जुनः युधिष्ठिरं ददर्श। युधिष्ठिरः कृष्णं ववन्दे। तस्यानुज्ञया अश्वमेधयागं चकार। यागं समाप्य युधिष्ठिरः ऋत्विग्भ्यो भूरिदक्षिणां वितीर्य विप्रेभ्यो द्रविणं प्रदाय याज्ञसेन्या साकम् अवभृतस्नानमाचरत्।

"आचन्द्रार्कं जयतु कृतिनामेष गोष्ठ्यां प्रबन्धः। सम्पूर्णोऽयं ग्रन्थस्सतान्तु सन्तोषकार्यस्तु"। इति कविवाक्येन कृतिरियं समाप्तिमेति।

कृतज्ञतासमर्पणम् – श्रीयुधिष्ठिराश्वमेधचम्पूप्रबन्धस्य सम्पादनार्थम् अवसरं कल्पितवद्भ्यः वात्सल्यहृदयेभ्यः संस्कृत अकाडमीनिदेशकेभ्यः श्रीमद्भ्यः नीलकण्ठाचार्येभ्यः सभक्तिकं कृतज्ञतामाविष्करोमि। प्रबन्धस्यास्य सम्पादने साहाय्यम् आचरितवद्भ्यां सुब्रह्मण्यसन्तोषमहोदयाभ्यां सस्नेहं कार्तज्ञ्यं निवेदयामि। प्रबन्धमिमं मुद्रणे आनेतुम् अहरहरं परिश्रम्य निस्तुलम् उपकृतवत्यै बि.एल्. चेश्चु नागश्रीदेव्यै कृतज्ञतां प्रकाशयामि।

इति शम्

डां. के. वरलक्ष्मीः,
उपनिदेशिका, संस्कृत अकाडमी

In Public domain. Digitization Muthulakshmi Research Academy

आमुखम्

'चमत्कृत्य पुनाति सहृदयान् विस्मिताकृत्य प्रसादयति इति चम्पूः' इति हरिदासभट्टाचार्यः चम्पूरिति शब्दस्य व्युत्पत्तिं दर्शयति। गद्य-पद्ययोः युक्ता काव्यस्य विशिष्टाशैली चम्पू इत्यभिधा, या काव्याध्येतॄणां हृदये चमत्कारविस्मियाभ्यां समं पवित्रताम् उत्पादयति। अत्र चपिँ गत्याम् इति चौरादिकः धातुः। चम्पा, चाम्पेय, चम्पक इत्यादि-शब्दाविव चम्पूरिति शब्दोऽपि उत्पन्नस्स्यादित्यूह्यते। चम्पयति चम्पयते वा रसभावादिविशिष्टं वस्तु प्रकाशयतीति चम्पूः इति निष्पत्तिं वक्तुं शक्नुमः। अथवा 'प्राणैषीच्चम्पुभारतम्' इत्यत्र अनन्तभट्टस्य चम्पुः इति ह्रस्वान्तप्रयोगः अपि साधुरिति वक्तुं शक्यते।

काव्यादर्शे दण्डिः प्रप्रथमतया चम्पूरिति काव्यप्रभेदविषये न्यगददित्यतः षष्ठशतकात् पूर्वस्मात् चम्पूकाव्यस्य निर्मितिः बभूवेति ऊह्यते। किन्तु ऋग्वेदस्य ऐतरेयब्रह्मणस्थे हरिश्चन्द्रोपाख्याने गद्यपद्यमिश्रता प्रस्तुतिः दृश्यते। कृष्णयजुर्वेदीय–तैत्तिरीय-मैत्रायणि-कठसंहितासु गद्यपद्यमिश्रितरचना वरीवर्ति। प्रश्न-मुण्डक-कठोपनिषत्सु अपि गद्यपद्यमिश्रितं साहित्यमुपलभ्यते। महाभारतस्य आदिपर्वणः पौष्योपपर्वणि, विष्णुपुराणे, भागवते, पञ्चतन्त्र–हितोपदेश-शुकसप्तति–विक्रमार्कचरित–पालिभाषायाः जातककथासु, अश्वघोष–भास-कालिदासादीनां नाटकेषु च गद्यपद्यमिश्रिताभिव्यक्तिः दरीदृश्यते। इत्थं चम्पूसदृशया शैल्या प्रस्तुता संस्कृतधिषणा वैदिकसाहित्यादारभ्य दृष्टिगोचरी भवतीति स्पष्टमवगम्यते।

गद्यानुबन्धरसमिश्रितपद्यसूक्तिः
हृद्यापि वाद्यकलया कलितेव भाति।
तस्माद्दधातु कविमार्गजुषां सुखाय

In Public domain. Digitization Muthulakshmi Research Academy

चम्पूप्रबन्धरचनां रसना मदीया।। इति चम्पूरामायणे भोजः चम्पूरचनां कीर्तयति।

गद्यपद्यमयं श्रव्यं सम्बन्धं बहुवर्णितम्।

सालङ्कृतैः रसैः सिक्तं चम्पूकाव्यमुदाहृतम्।। इति स्वीये 'चम्पू काव्य का आलोचनात्मक एवं ऐतिहासिकमध्ययन' इत्याख्ये ग्रन्थे चम्पूकाव्यं परिभाष्यते छविनाथत्रिपाठी महोदयेन।

साम्प्रतं संस्कृतपरिषदः पुनर्मुद्रणपरियोजनान्तर्गतत्वेन प्रस्तूयते आन्ध्र-प्राकृत-संस्कृत-कर्णाटादि-भाषासु कवित्वपटोः नागेश्वरसुधीन्द्रस्य आत्मजस्य वेङ्कटशास्त्रिवर्यस्य युधिष्ठिराश्वमेधचम्पूप्रबन्धः।

इयं परियोजना केन्द्रियसंस्कृतविश्वविद्यालयस्य अनुदानेन प्रवर्तते। परियोजनायाः अस्याः आवाम् अनुसन्धाताराविति आत्मानं धन्यौ मन्यावहे। ईदृगवसरं दत्तवते परिषन्निदेशकाय आचार्याय नीलकण्ठवर्याय आदौ कार्तज्ञं विन्दावहे।

केन्द्रीयसंस्कृतविश्वविद्यालयस्य कुलपतये, कुलसचिवाय, परियोजनायाः अधिकारिभ्यः नमोवाकान् वितरावः। उस्मानियाविश्वविद्यालयस्य कुलपतये, कुलसचिवाय च आधमर्ण्यं प्रकटयावः। अमूल्यां कृतिमिमां परिचयाय सहकृतवद्भ्यः सर्वेभ्यः कृतज्ञतां समर्पयावः। संस्कृतपरिषदः सहकारिसदस्येभ्यः धन्यवादान् विदद्वः।

इत्थं बुधजनविधेयौ परियोजना अनुसन्धातारौ

सन्तोषसुब्रह्मण्यौ

षष्ट्यब्दग्रन्थमालापराख्या दुर्लभग्रन्थपुनर्मुद्रणपरियोजना

In Public domain. Digitization Muthulakshmi Research Academy

In Public domain. Digitization Muthulakshmi Research Academy

श्रीरस्तु

श्रीरामपरब्रह्मणे नमः

श्रीमच्छ्रीवत्ससगोत्रसुधाम्बुधिचन्द्रेण
संस्कृतप्राकृतकर्णाटान्ध्रादि भाषाकवित्वचातुरीवितन्द्रेण
सुरपुरसंस्थानधर्माधिकारिणा
श्रीमत्कविसार्वभौमबिरुदधारिणा

शतावधानिना ब्रह्मश्री वेङ्कटशास्त्रिणा प्रणीतः

रसालङ्काररञ्जितः

युधिष्ठिराश्वमेधाख्यः चम्पूप्रबन्धः

In Public domain. Digitization Muthulakshmi Research Academy

In Public domain. Digitization Muthulakshmi Research Academy

श्रीरस्तु

श्रीरामाय नमः

श्री युधिष्ठिराश्वमेधचम्पूप्रबन्धप्रारम्भः

त्रय्यन्तामृतसिन्धौ मन्थानप्रक्रियां वितन्वन् यः ।
अद्वैतसुधां विदधे विबुधेभ्यो नौमि शङ्करगुरुं तम् ॥

लक्ष्मीं दत्वा महानागवरवासश्शिवाञ्चितः ।
महिमाश्रितपादाब्जः पातु मां परमेश्वरः ॥१॥

अन्तरायनिचयोपशान्तये दन्तिराजवदनं निरन्तरम् ।
सन्तताखिलचिरन्तनोक्तिनिर्वान्तभूरिमहिमानमाश्रये ॥२॥

स्फुरत्पदसमन्विताचलदलं क्रियासङ्गता
महार्यमुखगीतिसङ्कलितमोदसन्धायिनी।
विधातृवरवर्णिनी नरगणाश्रिता भारती
तनोतु कविताझरीममृतपूरसाधीयसीम् ॥३॥

त्रय्यन्तन्यायशब्दागमविधिषु तथा साङ्ख्ययोगप्रचारे
मीमांसाया विचारे प्रकटितधिषणं चारुकारुण्यपूर्णम् ।
साहित्याम्भोधिचन्द्रं सरसकवनकृद्वल्लभं फुल्लचित्तं
वन्दे विद्यागुरुं मे प्रतिदिनममलं श्रीनिवासार्यवर्यम् ॥४॥

गीर्वल्लभप्रबलदर्वीकरेश्वरसुपर्वालिनेतृगुरुभिर्दुर्वारवाग्गतिषु निर्वर्णनीयमहिमोर्वीशवन्दितपदः। दुर्वादिवार्धिसलिलौर्वानलः प्रचुरसर्वार्थबोधनचणस्वार्वेलवंशभवपर्वेन्दुरथ्यजयदुर्व्यां स तिम्मपसुधीः ॥

In Public domain. Digitization Muthulakshmi Research Academy

तस्माद्बुधाच्छ्रीमतिभीममाम्बागर्भे समाविर्भवदुच्चतेजाः ।
आसीत्सुधीश्चन्नयदीक्षितेशस्सर्वागमार्थाध्वकुलाध्वनीनः ।।५।।

तस्मात्कोविदवल्लभाद्धरमतौ रामाम्बिकायां भव
न्नान्ध्रप्राकृतसंस्कृतादिकवनप्रांञ्चत्प्रपञ्चावलेः ।
आधारो समसच्छिरोमणिरुमानाथाच्युतार्चाकृती
सोऽयं सार्थकनामधेयसहितो नागेश्वरोऽभूत्सुधीः ।।६।।

धीरस्यास्य सती सुसाधुचरितानन्ताम्बिकानन्दनौ
प्रासूतात्र पवित्रजैत्रधिषणो ज्यायान् गुणैरग्रजः ।
श्रीमत्कोसलवेङ्कटक्षितिपतेर्धर्माधिकारी गुरु
श्श्रीमान् भास्करसूरिराड्विजयते श्रीकण्ठपूजारतः ।।७।।

प्रतिदिनजप्तैकादशसहस्रपञ्चाक्षरीमनोस्तस्य ।
भास्करसूरेरनुजो वेङ्कटकविसार्वभौम एषोऽहम् ।।८।।

तादृशेन श्रीमद्राजाधिराजराजा बल्वन्तबहिरीबहादरादिबिरुदजेगीयमान वैभवाच्छ्रीमद्वेङ्कटधरारमणात्सम्प्राप्तच्छत्रचामरान्दोलिकापूर्वककविसार्वभौमबिरुदेन मया युधिष्ठिराश्वमेधचम्पूप्रबन्धः क्रियते ।।

सुरनरवरगीता सुष्ठु कल्याणजाता
कविवरकृतपद्याकाञ्चनाभानवद्या ।
रचितसरसमाख्या राजते हस्तिनाख्या
रथिककुलगुरूणाम् राजधानी कुरूणाम् ।।९।।

यस्यां धराधीशपराक्रमेण प्रभाकरो विग्रहमारचय्य ।
अदन्तसम्प्राप्तिरभूदितीव प्रपठ्यते शास्त्रविधिप्रवीणैः।।१०।।

In Public domain. Digitization Muthulakshmi Research Academy

यस्या उदग्रवरणाग्रिमपद्मराग
रागप्रभापटलकन्दलमेलनेन ।
अभ्रं हरित्सु चतसृष्वपि सान्ध्यरागं
प्राप्यातनोति जनदृष्टिषु दिग्भ्रमं द्राक् ॥११॥

यस्या दीप्रमणी घृणीगणसमुद्यच्चन्द्रशालातले
वेश्यौघं जनिताप्सरो भ्रमतया यष्टा यथेष्टं भजन् ।
व्रीडाद्दूरतरे स्थितामपि बहुक्रीडां वितन्वंस्तदा
रत्यन्तोद्भवपारवश्यसहितं दृष्ट्वा मुखं लज्जते ॥१२॥

शाला यत्र चिरत्नरत्नखचिता दृङ्मार्गमत्युद्गता
श्चन्द्रस्यात्मसु सन्ततामभिवसतेस्ताश्चन्द्रशालाभिधाः ।
डोलालोलवधूनखाग्रनिशिता घातप्रदीर्णौषधी
राजन्याङ्गपनीपतद्बहुसुधासम्बन्धसौधाभिधाः ॥१३॥

यस्यां नभस्सीमविलङ्घनोद्यत प्रदीप्रमाणिक्यविनिर्मितौकसाम् ।
छाया रवीन्द्वोरपि नित्यमुद्यतोः कर्णाध्वनीना न तु दृष्टिगोचरा ॥१४॥

यस्यां सभाग्रभुविरत्नवितर्दिकायां
रागं शिलाद्रवकृतं विरचय्य मुग्धाः ।
स्थित्वा क्षणं तदनुगन्तुमशक्तभावा
स्सभ्यान् प्रहासकृतहस्तलयान् वितेनुः॥१५॥

यस्यां विटानुत्पलमालिकेच्छया समागतानेव सराल्यदानतः ।
आनाभिकण्ठं समवेक्ष्य चक्षुषा पप्रुस्तदिष्टं सुमकारकाबलाः ॥१६॥

स्वर्गं समारुरुक्षुस्सशरीरं यत्र सौधभुवि विचरन् ।
लोकस्स्वचिन्तितार्थं करबदरनिभं समाप्नोति ॥१७॥

In Public domain. Digitization Muthulakshmi Research Academy

अधिष्ठितस्तामरविन्दनेत्रसेवापरः क्ष्मारमणीं पुपोष ।
युधिष्ठिरो धर्मभृतां शिरस्सु पादेषु पादं निटलञ्च तन्वन् ॥१८॥

तपोजातस्सुमनसां कुलं पल्लवयन् यशः ।
जग्राहेति वचश्चित्रं समर्थः कृत्यवेदिनाम् ॥१९॥

इत्थमवक्रविक्रमे चक्रिकृपालब्ध चतुरम्भोधिसम्भासमानविश्वविश्वम्भरा-जनितशाश्वतैश्वर्यधारणधुरन्धरे मर्यादातीतमहिमाश्चर्यपूरमग्नसकलजनप्रपञ्चे पञ्चबाणजनकगतागतप्रहर्षमाणमानसे गुरुमपि काव्यालङ्कारसम्पद्रहितं कलानिधिमपि सूर्यालोकनमात्रजनितमुखवैवर्ण्यं सहस्रवाचमपि श्रुतिघनपदक्रमरहितं चतुरास्यमपि सभाहितभाषारहितं सुराचार्यं कुमुदिनीरमणं शेषं पितामहञ्च तिरस्कुर्वद्भिस्स्वयं तादृक्षैरपि तदनवाप्ततत्तद्गुणगणसङ्गैर्विप्रपुङ्गवैः परिशोभिते धर्मतनये सविनये लोकान् वीतशोकान् परिशासति ॥

परब्रह्मज्ञानादवगतजगद्वृत्तनिचयः
पुराणानां कर्ता द्विनवगणितानामृषिवरः ।
तपश्श्रद्धाबद्धप्रतिभमुनिमूर्धन्यविनुतो
महोल्लासो व्यासो विषयनिचयासः पुरमगात् ॥२०॥

तदनु शुभंयौ समये जगदाश्चर्यतपःकरणसमुद्भूतेन बृहद्भानुशिखा झूटेनेव जटाजूटेन देदीप्यमानशिरःप्रदेशः जगज्जालोपकरणाष्टादशपुराणनिर्माणालङ्कर्मीणता परवस्तुसाक्षात्कारजनिताभिः कीर्तिरेखाभिरिवाच्छाच्छभस्मरेखाभिर्जरीजृम्भ्य-माणफालप्रदेशः पुनः पुनरुच्चार्यमाणतारकाक्षरसूनपरीमलझरीभराकृष्यमाणेन द्विरेफवारेणेव रुद्राक्षसरेणावेष्ट्यमानसुन्दरकन्धरः बहिर्गतैर्निर्विघ्ना भुग्नतपोग्नि सञ्जातैर्धूमलता जालैरिवानन्दानुभवात् क्षणे क्षणे प्ररोहद्भिः पुलकाङ्कुरकुलैर्दरी दृश्यमानवक्षःफलकः स्वच्छतरा विच्छिन्ननखच्छविगुलुच्छतौल्यप्राप्तिसमाया तयानक्षत्ररेखयेव जाज्वल्यमानया स्फटिकाक्षमालकिया परिशोभिपाणिपल्लवतल्लजः

In Public domain. Digitization Muthulakshmi Research Academy

इन्द्रनीलसान्द्रद्युतितिरस्कारवीरम्मन्यताशालिनास्य देहकान्त्या निर्जितेन रक्षेति शरणयाच्ञार्थं सन्निहितेन नीलमेघेनेव कटीतटपटायमानेन कृष्णमृगचर्मणा परिशोभितः वीक्षणमात्रधावद्ब्रह्मरक्षःकाण्डेन शौण्डेन योगदण्डेन मण्डितपाणि पुण्डरीको दर्पवत्कन्दर्पगर्वसर्वस्वप्रस्पर्धिमनोनिग्रहविग्रहो भगवान् सात्यवतेयो द्वारमध्यास्त इति दौवारिकः कृपायत्तचित्ताय नृपाय न्यवेदयत् ।।

तदनु तद्वाणीं सुधाद्रोणीमिवाकर्ण्य सरभसमुत्थाय सकलविद्वज्जनशास्त्रवादद्विगुणितवन्दिमागधगीतप्रबन्धबिरुदावलीकलितवेत्रधरहङ्कारसङ्कुलभेरीभाङ्कारनिध्वाननिध्यानमात्रबधिरीकृतकर्णपुटदिक्करटिशिरःकम्पनचलाचलक्षमातलस्समभ्युद्गम्य श्रौतेन विधिना समभ्यर्च्य हीरोपलगारुत्मतस्वाराण्मणिवारैर्दूरीकृतप्रभान्तरं सभान्तरं समानीय रत्नसिंहासनोपरिब्रसीमधिष्ठाप्य तत्रोपविशन्तं भृशं तं शतकृत्वः कुरुप्रवीणो वाणीबाणं प्राणंसीत् ।।

तत्कृतमथोपकारं शिरसि वहन्निव रराज कुरुराजः ।
मुनिपुरतो मुदितमना मुकुलितकरकमलभातमौलितलः ।।२१।।

विराजन्तं विराजन्तं वीक्ष्य गम्भीरमानसम् ।
धर्मजातं मुनिर्ज्ञातधर्मजातमभाषत ।।२२।।

अपि कुशलं तव राजन् भ्रातृणां शत्रुसङ्घजेतृणाम् ।
कुन्त्या गुणैर्लसन्त्याः पाञ्चाल्या मदनहस्तपाञ्चाल्याः।।२३।।

राजा ।।

त्रयीं तां दुस्साधामतिदुरवगाहां तनुभृतां
सतां क्रोडीकृत्यामृतमधुरवाचा रचितवान् ।
पुराणानि क्षोण्यां स तु मयि कृपापूरितमना
इहैवास्ते क्षेमं क्व नु विनिपतेन्मादृश ऋते ।।२४।।

In Public domain. Digitization Muthulakshmi Research Academy

व्यासः ।।

यन्नामस्मरणान्महीध्रतुलितः प्रोत्तुङ्गपापोत्कर
स्सम्पर्कादिवदावकीलवितते स्तूलावलिर्नश्यति ।
तस्मिन् सख्यमुपेयुषि त्वयि हरौ क्षेमेतरत्स्यात्कथं
सूर्ये वार्यमयूखधारिणि तमःप्राग्भारचेष्टा यथा ।।२५।।

इष्टानुकूलदिष्टं जाने त्वां कुरुकुलाग्रणी राजन् ।
त्वय्यनुरागभरोऽयं त्वरया मुखरयति मामभीक्ष्णमपि ।।२६।।

तदनु तदनुमत्या धग्धगद्रत्नपीठं
सविनयमधिगच्छन् सत्यभाषाप्रवीणः।
जितरिपुकुलसेनो जीवितेशस्य सूनु
स्स्वयमभिलषितानां सारमेवं बभाषे ।।२७।।

बन्धुबृन्दहितानन्दसन्धात्रीयाचनो भवेत् ।
वन्ध्येव भुवि सा सम्पन्निन्दाहेतुर्भविष्यति ।।२८।।

यद्दातृता समवलोकनमात्रजाताल्लज्जाभरात्प्रकटयन्निजसूनभावम् ।
अद्यापि निर्जरसमार्जितभूजराजः प्रायोविलक्षपदमाश्रयते प्रकामम् ।।२९।।

यत्ख्यातप्रवदान्यताजिविजिता स्वर्धेनुका स्वं वपु
र्हातुं क्षीरपयोनिधिं स्वजनकं पीयूषगर्भं क्रुधा ।
निन्दती सुरशाखिनं प्रतिहसन्त्यद्याऽपि भुक्तेर्मिषा
द्घासग्रासविराजिताधरयुगल्यम्भारवै रोदिति ।।३०।।

तं पद्मिनीरमणसूनुमुदात्तकीर्तिं कर्णं मदग्रजममोघगुणप्रकाशम् ।
हत्वा निदानमतिदारुणदुष्कृतस्य सम्पत्किमर्थमियमद्य गतायुषो मे ।।३१।।

In Public domain. Digitization Muthulakshmi Research Academy

विस्मृत्य यो गुरुजनं हि तिरस्करोति
तस्यांहसां समुदयं गणितुं क ईष्टे ।
साक्षाद्गुरुं गुरुतनुं प्रणिनाय्य लोके
का वा गतिर्मम भविष्यति घोररूपा ।।३२।।

ज्ञानमयदिव्यवीक्षा नेदिष्ठतमेषु पौरुषार्थेषु ।
यः कूलङ्कषमेधस्तं भीष्मं निघ्नतः कुतो मे श्रीः ।।३३।।

इत्थं दीर्घं निश्वस्य पुनरुवाच ।।

निर्यन्नवनीतमहदीहित बह्वमन्द
कन्दावलिर्गिरिदरीस्फुरिताम्बुधारा ।
सा पल्लवालिरनुभूतचरी तरूणा
मायुष्मती मम न किं वनवाटिकायाम् ।।३४।।

एवं वदन्तं यमनन्दनं तं वैराग्यसक्तं वनवासरक्तम् ।
चिन्तासमेतं चिरपापभीतं मौनी व्यभाणीन्मकरन्दवाणीम् ।।३५।।

राजन् पाण्डव राजधर्ममनतिक्रम्यारिवर्गान् रणे
नाम्नैकेनावशेषितान् कृतवतः पापं कथं वर्तते ।
किञ्चाब्जाक्षमहर्दिवं स्वपुरतः कृत्वा समस्ताः क्रियाः
कुर्वाणं पुरुषं तु तल्लवलवस्स्वप्नेऽपि नाप्नोति हि ।।३६।।

तथापि तव पापभीरुतास्ति यदि वाजिमेधमवश्यं कुरुष्वेति व्याहृत्यानुकुर्वति कुरुसार्वभौमेऽश्वमेऽधाश्वो यौवनाश्व विश्वम्भराधीश्वरचिरपरिपाल्यमानायां भद्रावत्यां नाम नगर्यामस्ति तदाहरणाय भवद्वैतीयीकं पार्षदश्रिं प्रेषयस्वेति व्याजहार ।।

राजा ।।

भगवन्नश्वमेधस्सद्रव्यसाध्यस्सुदुष्करः।
अहं तु द्रविणश्रोता भोक्तृकार्यं कथं भवेत् ।।३७।।

In Public domain. Digitization Muthulakshmi Research Academy

पुरा मरुत्तधरा पुरन्दरेणाश्वमेधवेलायां बाडब्याय दत्तं दक्षिणारूपं द्रविणं तेन गृहीत्वा गन्तुमशक्यत्वात्तत्रैव हिमक्षोणीभृदुपत्यकायां क्षिप्तंमद्यापि वरीवर्त्यते तदानयनाय समानोदर्यस्सुनासीरसूतिर्नियोजितव्य इति द्वैपायनस्सुधामधुरिमधौरेयीं वाचमुवाच ॥

एतद्वाणीं निपीय श्रवणयुगलतो मारुतिस्तं तुरङ्गं
धृत्वानयाम्यहं चेच्छिवसदनदरिद्राणपुर्यां स्थितस्य ।
या भूयात्सा गतिर्मे भवतु दृढतरा पापभूयिष्ठदुष्टे
त्यास्थानस्थाङ्घ्रिकम्पप्रकरणनिपुणां क्रूरसन्धां बबन्ध ॥३८॥

पठितसकलधर्मः पारिकाङ्क्ष्यग्रगण्य
स्तदुपचितसपर्यस्तत्क्षणान्निर्ययौ सः।
चकितचकितचित्तश्चक्रपाणिं मुकुन्दं
चिरमिनसुतपुत्र श्चिन्तयामास कृष्णम् ॥३९॥

तस्याशये तप्ततरेति चिन्तया चिराधिवासा सहनादिवाच्युतः ।
तस्मात्क्षणेनैव तदावरुह्य तत्पुरो बभौ मञ्जुलमञ्जुलाकृतिः॥४०॥

वाराशिगभीरं सुकुमारं दधिचोरं स्मेरं भवदूरं नगधीरं मुनिचारम् ।
दूरीकृतघोरामयवारं पृथुसारं क्रूरासुरधौरेयविदारं यदुवीरम् ॥४१॥

नीलालकलोलां चलजालाञ्चितफालं
नीलं सुकपोलं मुरकालं बुधपालम् ।
लीलाव्रजबाला कुचचेला हृतिलोलं
वेलातिगहेलं खलमूलालिनिफालम् ॥४२॥

एतादृशं हरिमुदीक्ष्य कृतान्तसूनु
र्हृत्पुण्डरीकचिरसङ्गतरम्यमूर्तेः ।
तस्यास्य साम्यपरिशीलनलिप्सयेव
तं सत्वरं समुपगम्य समालिलिङ्ग ॥४३॥

In Public domain. Digitization Muthulakshmi Research Academy

यथायथा पाण्डवनन्दजातयोस्सल्लापवृद्धिः प्रबभूव हर्षतः ।
तथातथा तत्र तयोर्द्वयोर्दृशोर्निद्रादरिद्रत्वसमृद्धिराबभौ ॥४४॥

निशाचराणां रिपुरेष कृष्णो नामैकदेशाह्वयभागभूपम् ।
तेषामितीवोद्भवताभयेन निशातिदूरं विससर्प वेगात् ॥४५॥

तदनु सर्वे युधिष्ठिरभीमार्जुननकुलसहदेवास्सह देवेन कंसारिणा तादात्विकं कृत्यं निर्वर्त्य सभामभजन्त ॥

यावद्धर्मजकृष्णौ युद्धालापान् प्रचक्रतुस्तावत् ।
कञ्चुकसेवाकारा मारुतिकोपस्य पात्रतामापुः ॥४६॥

वृषकेतुघटोत्कचात्मजाभ्यां प्रबभौ पुष्टतनुस्समीरजातः ।
सुरराड्गुरुदैत्यदेशिकाभ्यामिव सम्पूर्णकलस्सुधामयूखः ॥४७॥

तदनु वृकोदरो वासुदेवेन साकमजातशत्रुं नमस्कृत्य जयाशिषा सत्रागोत्राभर्त्राज्ञां शिरसि वहन् कर्णघटोत्कचसुताभ्यां वृषकेतुमेघवर्णाभ्यामनुविद्धो नानाविधगिरीशदरीझरीवल्लरीपरीतं धरातलमुल्लङ्घ्य निर्निद्रभद्रविद्रवत्क्षुद्रोपद्रवमुद्राया भद्रावतीनगर्या उपकण्ठेऽकुण्ठविकास भासुरमाक्रीडाभ्यर्णमभजत् ॥

इति श्रीमद्राजाधिराजराजा कोसल वेङ्कटक्षमारमण करोद्धृतान्दोलिका
पार्श्वभागेन चत्वारिंशदवधानसमयैतत्प्रभुग्रथितवज्रमौक्तिकस्थगितबिरुद
घण्टामणिशोभितकरेण आन्ध्रप्राकृतसंस्कृतकर्णाटादि
भाषाकवित्वमहत्त्वशोभित नागेश्वरसुदीन्श्रतनुजेन भास्करविपश्चिदनुजेन
वेङ्कटकविसार्वभौमेन विरचिते युधिष्ठिराश्वमेधचम्पूप्रबन्धे प्रथमस्तबकः॥

In Public domain. Digitization Muthulakshmi Research Academy

श्रीरस्तु

श्रीरामाय नमः

श्री युधिष्ठिराश्वमेधचम्पूप्रबन्धे द्वितीयस्तबकः

उदेष्यतेर्चिषां पत्ये प्रागेव सुरसञ्चयैः ।
निक्षिप्तेव बभौ सन्ध्यादिविमाणिक्यपीठिका ।।१।।

पितुर्दिनेशस्य जयाभिलाषान्मन्देहसन्दोहकदुस्तरा सा ।
वैवस्वतेन प्रहिता रराज चकासती वैतरणीव सन्ध्या ।।२।।

तदनु भीमसेनो विचतुराणि पदानि पुरतो गत्वौषसिकीं सन्ध्यामवन्ध्यभक्त्यावसाय्योद्यन्तमरविन्दबन्धुबिम्बमवलोक्य तौ प्रत्युवाच ।।

कपोतहुंहुङ्कृतिसामिधेन्या उषो मुनिर्यातु मयाहुतीस्स्राक् ।
रवावभीक्ष्णोज्वलहोमकुण्डे जुहोत्यतोर्चिर्ज्वलदिध्मबृन्दम् ।।३।।

चण्डाल्यञ्चितपद्मिनीकरपरामर्शाद्दिनान्ते रविः
प्रायश्चित्तकृते शिखावति पतन् प्रातः पुना रज्यते ।
मासं मासमसौ सुधानिधिगतेर्जैवातृकत्वं भज
त्यभ्यस्तं किल कर्मगर्ह्यमपि तन्मुञ्चन्ति नो रागिणः ।।४।।

उत्तेजयति त्वष्टरि विष्वद्रीचः करान् शरांस्तावत् ।
तद्विस्फुलिङ्गवलितश्शाण इवास्ते रविः क्रमाक्रमागः ।।५।।

मेघवर्णः ।।

प्राचीप्रतीच्यद्रितटीखलूरिका सन्ध्या द्वयी शोणमृदि ग्रहाधिपः ।
मल्लस्य कर्माचरणादभूदलं रक्तो न मध्येऽम्बरमेतदस्थितेः ।।६।।

In Public domain. Digitization Muthulakshmi Research Academy

तदा वृषकेतुः पूर्वापरमहीभृच्छिखराग्रसंलक्ष्यावरुणहरिणकिरणा-वलोक्याबभाषे ॥

बन्धूककुन्दसुमबृन्दकृतौ गुलुच्छौ
सूर्येन्दुनाम दधतौ मुहुरेधमानौ ।
ऐन्द्रीदिशायुवतिरुत्क्षिपति प्रतीच्यां
तस्मात्तयोस्सुविदिता खलु पुष्पवत्ता ॥७॥

भीमः ॥ प्रातरातपञ्च भास्वन्तञ्च करांश्च दृष्ट्वेत्थमवदत् ।

सप्तार्चिः परिधौ वसन् खरतरैश्शूलैर्विलोलैः क्रुधा
मन्देहान् दृढशल्यघर्षहुतभुक्तप्तैर्मृणत्यच्युतः।
नो बालातप एष शोणितजलं तद्देहतो निर्गतं
नो भास्वानयमाश्रयाशपरिधिर्नोऽस्रा हि शूला इमे ॥८॥

धूमो यत्र हि तत्र वह्निरिति यद्युक्तं हि यत्राग्निरि
त्युक्तं चेदिदमस्ति शिष्यजनता सत्यापनार्थं दिवि ।
निक्षिप्तं नयनाङ्गिणोज्ज्वलमयः पिण्डप्रकाण्डं यथा
तीक्ष्णांशुः परिदृश्यतेऽरुणतमप्रत्यग्रजाग्रद्द्युतिः ॥९॥

मारुतिः पुरतो गत्वा ॥

अरविन्द बृन्दमकरन्दबिन्दुस
ङ्गिलनातितुंदिलमिलिन्द बृन्दकम् ।
सुमतल्लजोल्ललितपल्लवैर्लस
द्वनमुल्लतं किमपि दृश्यते मनाक् ॥१०॥

नन्दनवनमिव राजति वनमिह चलदूर्मिकाप्सरःपूर्णम् ।
विलसद्धरिचन्दनगं सुन्दरमन्दारसूनसन्तानम् ॥११॥

In Public domain. Digitization Muthulakshmi Research Academy

तदा वनं प्रविश्य ॥

ईषत्फुल्लसरोजानामूर्ध्वाधश्चारिणोऽलिनः।
भान्तीन्द्रजालकृत्पाणौ धमन्याङ्गुलिका इव ॥१२॥

यदा शूर्पारातिर्विरहिततिषून्मादनकृते ।
प्रयोक्ष्यत्येतां मां मम रचय साहाय कमलम् ।
इतीवोत्कोचं स्वं सुरभिसुरजोदित्सुरलिने
विभात्यग्रे मल्लीकुसुमततिरारूढमधुपा ॥१३॥

तदनु वृषकेतुर्मकरन्दभरविनमितान् कञ्जपुञ्जान् भीमाय रिपुभीमाय प्रदर्श्येत्थमवदत् ॥

व्याहारान्वदतस्सदा श्रुतिहितान् सत्पक्षयुक्तान् द्विजान्
प्रत्यातिथ्यमिदं मरन्दमतुलं रुच्यं मुदाकुर्वताम् ।
अस्माकं द्विषमोषधीशमिह ते कूटस्थमावेदया
युक्तं ह्येतदितीव कञ्जनिकुराः कुर्वन्ति तुभ्यं नमः ॥१४॥

धार्तराष्ट्रकुलखण्डनशौण्डं त्वां निशम्य सरसीरुहबृन्दम् ।
स्वारिहिंस्रकमवेत्य षडङ्घ्रिध्वानगोत्रपठनान्नतिमेति ॥१५॥

अशोकवृक्षोऽपि परं नराणां वियोगभाजां वितनोति शोकम् ।
मधुव्रतोद्युक्तगुणस्य सङ्गात्संसर्गदोषा न वृथा भवेयुः ॥१६॥

विदुरोक्तिस्सहस्रारे हंसो वसति खल्विति ।
प्रत्यक्षीकुरुते हंसं कमले चर्मचक्षुषाम् ॥१७॥

धूमं दोहदजं निपीय्य समतां स्त्रैणस्तनानां भज
न्त्येते जंफलसञ्चया इह तथा शौकं वचोमाधुरीम् ।
अप्राप्यैतदसूययैव कठिनत्रोटीपुटीपाटना
द्भिन्ते तान् स्वमनोरथस्सफलको बिम्बान्धसस्स्यात्कथम् ॥१८॥

In Public domain. Digitization Muthulakshmi Research Academy

चिक्रोडतीक्ष्णतरचण्डकरालदंष्ट्रा निर्घातसंस्रुतरसस्रुतिसंवृतानि ।
राजन्ति दाडिमफलानि कुचोपमान जम्बीरयुद्धभवलोहितवेष्टितानि ॥१९॥

एलालतावलितपादशिरःप्रदेशो
रम्यो लवङ्गतरुरुज्ज्वलति प्रवेकः ।
कन्दर्पशास्त्रगतमर्मविदारमण्या
कान्तः किलागमचणः कृतनागबन्धः ॥२०॥

मधुपा अपि वाचाला मानिन्याशयमलं प्रगृह्णन्ति ।
कनकाशारहितानां कार्यमसाध्यं कदापि नो घटते ॥२१॥

चक्रभ्रमं प्राप्य चलाचलाश्शुकारेजुस्स्मरेण स्वतुरङ्गमा इव ।
जगज्जिगीषादृढताप्तये मुहुः प्रकारिताः कुण्डलचङ्क्रमक्रमम् ॥२२॥

इत्थं सिद्धकुलदर्शनीयमारामवैभवं निर्वर्ण्य स भीमः पुरतस्सरोवरमवेक्ष्य पुत्रपौत्रात्र पश्येत्यवदत् ॥

शुण्डालाधिपपादधानपरमक्लेशान्निहाकाशिली
शं कूद्रादिकयादसां हृदयतः प्राणा इवोद्गामिनः।
आगच्छन्ति रयेण बुद्बुदचया धात्रीशलाटूपमा
मत्स्येषु स्थितिसङ्कुचत्स्थलतया मुक्ताः प्रमुक्ता इव ॥२३॥

चलतां जले गजानां डिण्डीराणाञ्च सङ्करोऽयमिह ।
सामानाधिकरण्यं वर्षाशरदभ्रयोरिवाभाति ॥२४॥

अत्रादस्सरसीजलं सुविमलं पीत्वाम्बुमुक्शाबका
ग्रीवादघ्नमिहैव गन्तुमबला मग्ना लुठन्तः किमु ।
दृश्यन्तेऽभ्रचरत्पयोदपटलीबिम्बाश्च किंभावुका
श्शैवालव्रततिच्छटाजलभरप्रेङ्खत्तरङ्गावृताः॥२५॥

In Public domain. Digitization Muthulakshmi Research Academy

एताद्दक्सरोवररामणीयकमवलोक्याकुण्ठकण्ठावेष्ट्यमानग्रैवेयककिङ्किणी सङ्कलितशृङ्खलालवालसम्भवानां प्रमदाजनोरुस्तम्भनिर्जिततया मलिनानां रम्भास्तम्भानामिव शुण्डादण्डानां चिन्तानिश्श्वाससततिभिरिव फूत्कृतिभिस्तमस्काण्ड-संशयेन रविरेतान् गजान् विभिन्द्यादति भयेनेव तदङ्गस्थापितानां घण्टानामारवैश्च गजरमागाननिषादैरिव बृंहितैस्तस्य गानस्योपनादैरिव श्रूयमाणैर्दानधारा पिपासयागतानां रोलम्बानां झङ्कारैस्तत्रैव तालध्वनिभिरिव द्विरेफपराभूतिधुरीणैः कर्णशूर्पपटपटात्कारैस्तत्कालोचितैश्शब्दविशेषैरिवाधोरणक्रोधवचनैरनुमीयमान-हास्तिकायतिस्ताभ्यां साकं समीरकुमारोऽन्तिकवर्तिनो गिरेरधित्यकायां गुहाकुहरमविशत् ।।

भीमस्तदेत्थमाह ।।

पाश्चात्यभागमृज्ञातसस्यास्स्तम्बेरमा इमे ।
दिक्शुण्डालेषु मात्सर्याद्बिभ्रतीव स्वयम्भुवम् ।।२६।।

वृषकेतुः ।।

स्वकुम्भसाम्यम्भजतां वधूनां पयोधराणां दधतोऽभिधानम् ।
मेघानृषा हर्तुमिव प्रभान्ति नागाविलोलोद्धृतदीर्घशुण्डाः।।२७।।

एतेषां वारणानां श्रवणयुगतले सागरोऽस्तीति वाचं
श्रुत्वा तद्वारि पातुं निकटकटतटीमापतन्तो हि मेघाः ।
तत्कर्णोज्ञातवातप्रहरणभरतो निष्पतन्त्यग्रपादे
नो चेत्पादेषु मेघश्चिरमभिवसतीत्युक्तिरेषा मृषा स्यात् ।।२८।।

अस्मन्नाम सदैकरेफसहितं कस्माद्द्विरेफा वयं
युष्मन्नाम तथैकपेन कलितं कस्माद्भवन्तो द्विपाः ।
सत्यं ब्रूत मनागिति श्रुतितलं गत्वा द्विपानां रह
स्यारावेण पिपृच्छिषन्त इव तद्गण्डे द्विरेफा बभुः ।।२९।।

In Public domain. Digitization Muthulakshmi Research Academy

तत्रान्तरे सर्वेषु गजेषु सरोवरमवतरत्सु पयः पिबत्सु विहारं कुर्वत्सु पुण्डरीकमात्सर्यात्तन्नामधारीणि पुण्डरीकाण्युद्धाटयत्सु निषादिकुलबलात्कारेण निवर्तितेषु सत्सु ततः परस्पराधिक्यं परिष्कर्तुं हयाननधारिणं कलशार्णवशायिनं पिपृच्छिषतां सुखेन जिगमिषतां प्रङ्खद्रिङ्खासङ्घातजाताभिर्भूतलरेणुपरम्पराभिः पञ्चापि सिन्धून् स्थलीकर्तुमिव मुहुर्मुहुरास्फालिताग्रपादानां बाह्लिकानामश्वानां रविरथतुरगपञ्चषपदगमनान्तरे तन्मण्डलं स्प्रष्टुकामानामिव पुनःपुनरुत्पित्सूनां पारसीकानां मानसगरुडानिलजयनमस्माकं कियदिति खलीनदंशनोपघटित डिण्डीरखण्डमण्डलमिषेणोपहसतामारट्टजानामुच्चैश्श्रवोदरकरहेषाघोषभीषणानां काम्भोजानां मध्येच्छत्रचामरकेतुमुखबिरुदावलीकलितमुपवनगतं हंसमिव हंसनामानं यज्ञाश्वं सुज्ञो वृषकेतुर्बकघ्नाय विज्ञापयामास ।।

बहुप्रियायां भुवि पांसुलायां समग्रपादन्यसनासहिष्णुम् ।
हवाश्वमारादमराश्वदेश्यं चकार नेत्राध्वनि साम्प्रलीनिः ।।३०।।

हैडिम्बेयात्मजातः क्वचन विचलितान् कालमेघान् सगर्जान्
त्विड्जातं शम्बपातं खरकरकजुषं वारिधाराञ्च घोराम् ।
ध्वान्तं धूमद्दिगन्तं कहकहनिनदं कल्पयन् पाण्डुसूनो
भ्रूभावात्तं प्रगृह्णंस्तुरगमवनितो लङ्घयामास नाकम् ।।३१।।

केचिद्बिभ्युः केचिदापुः पुरीं स्वां केचित्पेतुर्दध्रुरन्ये तृणानि ।
केचिज्जग्मुर्वामलूरुं भयाद्व्राङ्गायां दृष्ट्वा भीकरीमासुरीं ताम् ।।३२।।

तदनन्तरं स्वान्तदुरन्तचिन्ताजनकमेनं वृत्तान्तमाकर्ण्य दुर्निरोधक्रोधमेदुर मानसो यौवनाश्वधरावरश्चतुस्सहस्रसङ्ख्याकान् रथिकान् रणपथिकान् प्रेषयामास।।

क्रोधोन्मेदुरमानसा रिपुचमूभेदप्रमोदा भटाः
खड्गप्रासपरश्वथैर्बहुविधैश्चक्रैरवक्त्रैश्शरैः।
उद्गम्याभ्रतटीमदृश्यमभितस्तन्मेघवर्णद्वयं
ब्रह्माण्डं दलितं वितेनुरचिराद्विस्फारविस्फारकैः ।।३३।।

In Public domain. Digitization Muthulakshmi Research Academy

तदनु हैडिम्बेयडिम्भः।।

रथिरान् बधिरान् कुर्वन् कुधरे ड्विदरेधुरन्धरै रावैः।
भिदुरात्मधरैर्बाणै रुधिरौघधरान् चकार दैत्येन्द्रः।।३४।।

महावीरा धीरास्तदनु सहसायुध्य महता
बकारेः पौत्रेण स्वतुरगवरादुत्तमतरम् ।
सहस्राक्षस्याश्वं पवनसममानेतुमनसः
पुरीं प्रापुस्स्वाराण्णिजऋजु भुजौजः प्रपुषिताम् ।।३५।।

ततः पुनः पुरात्परापतन्तीं गजतुरगसहितां मानातिगां सेनां कानीनसूनुर्दर्शंदर्शं विकटभ्रुकुटिः कोपावलेपाच्चापसध्र्यङ्निरोधयामास।।

गजमुखगन्धर्वाढ्यः परमत्या संस्तुवन् महासेनः।
दारितरिपुकामेषुर्वृषकेतुर्नामसार्थतामाप ।।३६।।

कानीनात्मजधन्वझङ्कृतगुणोन्मुक्तोऽथ पुञ्जीभवन्
बाणौघः प्रतिपक्षदक्षविततेश्छायां स्वजातां ददत् ।
तद्वक्त्रे चिरसंस्थितां विलसितां छायां तदैवाहर
ल्लोके तुल्यसुखौ यथाविनिमयप्रेप्सू तथा नात्र हि ।।३७।।

घोरे रणे सौरितनूभवोऽयं शूराग्रणीर्भानुसमानतेजाः।
अनीकमारादसिधारयाशु चकार मध्याक्षरयोगशून्यम् ।।३८।।

वार्तामार्तिकरीं निशम्य नृपती रूक्षो दशाक्षौहिणी
वीराग्रैरणरङ्गमङ्गलकृतौ त्वङ्गत्तुरङ्गैस्सह ।
रङ्गत्तुङ्गरथाङ्गसङ्गतचलस्वाङ्गैश्शताङ्गैर्वरै
र्युद्धक्षोणिमवाप दुन्दुभिभवैर्दिक्प्रेषणैर्घोषणैः।।३९।।

In Public domain. Digitization Muthulakshmi Research Academy

तदानीम् ॥

कङ्काणरिङ्खासङ्घातजाता धूलिर्दिवं ययौ ।
तद्धारासहनाद्भूमिरुद्गच्छन्तीव पुष्करम् ॥४०॥

सैन्योत्थितं परागं दृष्ट्वानिमिषा भयं ययुर्यावत् ।
पञ्चशतांशैरधिकां तस्माद्भेजे सुरेश्वरो भीतिम् ॥४१॥

तदात्वे ॥

कल्पान्तोऽग्रपरेतवल्लभभुजस्तम्भाग्रदण्डार्भटी
प्रस्पर्धिद्रढिमप्रगल्भनिजदोः प्रोद्धासमानां गदाम् ।
अभ्रे विभ्रमयन्विपक्षजनतावक्षस्तटीपाटने
दक्षं पौण्ड्रकमुद्धमन्पवनभूस्सङ्ग्रामरङ्गं ययौ ॥४२॥

स भीमसेनो धुरि भीमसेनां दृष्ट्वा स्वनाम्नोऽधिकदीर्घभावम् ।
सञ्चिन्त्य तत्रासहमान एनां विभेदयामास गभीरचेताः ॥४३॥

रटद्घटाकोटिसमेतघोटाः पटच्छटाराजितकेतुकूटाः ।
अटन्यटज्ज्यारवदुर्गमास्ते भटाजटारिं परिववृरेनम् ॥४४॥

वृकोदरोऽसौ स्वकनामधेये पूर्वार्धभावं दधदर्यजेषु ।
परार्धवाच्यं स हस्तेव तेभ्यो ददौ गदाधारणशस्तहस्तः ॥४५॥

तत्र पुनः।

शताङ्गान् सशताङ्गान्द्राक्कुञ्जरांस्तत्र कुञ्जरान् ।
कुलीनाङ्गदया भीमः कुलीनानकृतेर्ष्यया ॥४६॥

भान्ति स्म फूत्कारिमदेभशुण्डादण्डाग्रनिष्पातिमदाम्बुलेशाः ।
सामीरिबाहापरिघाभिघातान्मुक्तानिकुम्भैरिव मौक्तिकानि ॥४७॥

In Public domain. Digitization Muthulakshmi Research Academy

इत्थमित्थं निर्वेलबलस्थूलभुजालोलगदाभीलं सदागतिबालं रङ्गदभङ्गस्फुलिङ्गेनाक्ष्णा दग्ध्वैव सुवेगस्सार्थनामा निरोधयाञ्चचक्रे ।।

क्रोधगौ तदनु भीमसुवेगौ भूधरौ धृतिषु भीमसुवेगौ विक्रमक्रमपतङ्गसमानौ चक्रतुः प्रथनमाशु समानौ ।।

बाहाबाहिगदागदिहस्ताहस्तीर्ष्यया ततःप्रौढम् ।
युद्धमनिमिषविभाव्यं क्रुद्धौ कृत्वा मुमूर्च्छतुर्वीरौ ।।४८।।

तदनु हस्तोद्धृतमुसलमुद्गरतोमरभिण्डिवालशरशरासनान् कृतपरनिरासनान् पादातिकानभीर्गभीरमनाः प्रभाकरपौत्रः प्रभूतप्रभो निरुध्य तैस्सह विस्मयजनकमासेचनकममरीप्रमोदकरणचणं रणं निरणैषीत् ।।

ततःपरम् ।।

दारेष्वपि प्रेमभरं निरस्यघोरे रणे सञ्चरतः क्षितौ खे ।
पादातिकान् दाराहितांश्चकार राधेयपुत्रश्शरसञ्चयैस्तैः।।४९।।

तादृक्सैन्यदशां निशाम्य समरोन्निद्रस्सभद्रावती
पालः कीलकरालमृत्युरसनालेलिह्यमानैः खरैः ।
पश्यद्देववधूपृथुस्तनपटीग्रन्थिस्थसन्धिच्छिदा
शौण्डैः काण्डवरैस्ततान शलिनीं कानीनसूनोस्तनुम् ।।५०।।

जैत्रेण मित्रपौत्रेण योजितान् राजितान् शरैः।
विशिखानशिखान् कुर्वन् रेजे राजा स धीरधीः ।।५१।।

पर्वतास्त्रं प्रयुञ्जानो यौवनाश्वोऽभवत्तथा ।
जम्भारिर्व्यग्रतां प्राप्य दम्भोलिं चिनुयाद्यथा ।।५२।।

विशेषणव्यस्तपदान् विलोक्य परानगांस्तत्र रणे प्रभूते ।
वज्रास्त्रयोगाद्वनजाप्तपौत्रो विशेषणाव्यस्तपदान्व्यतानीत् ।।५३।।

In Public domain. Digitization Muthulakshmi Research Academy

राधेयापत्यकोदण्डगुणमुक्तशिलीमुखः ।
यौवनाश्वमुखाम्भोजे प्रविवेश यथोचितम् ।।५४।।

भक्तोऽहं यदि माधवस्य नृपतिर्जीवत्वयं सम्भ्रमा
दित्युक्त्वा पतितं रथे युधि निजं स्पृष्ट्वा करेणादरात् ।
वीराशंसनमध्यवर्तिनममुं वैकर्तनेरात्मजं
प्रीत्याभ्येत्य विकश्मलः क्षितिपतिर्दृष्ट्वोपगूह्याब्रवीत् ।।५५।।

परमसुदानं कृत्वा तातस्ते दातृलोकमान्योऽभूत् ।
परमसुदानं कुर्वन्नभवस्तस्मादहो त्वमप्यधिकः।।५६।।

इत्थं प्रस्तुत्य तं दुस्तरप्रशस्तमहस्ततं विस्तारनिस्तुलबलशस्तं हरिस्तवनिरस्तसमस्तपापस्तोमं विक्रमध्वस्तारितेजस्ततिमुष्णगभस्तिपौत्रं चण्डरुङ्मण्डलाखण्डचण्डतरपाण्डित्यखण्डनशौण्डविक्रममुद्दण्डपिचण्डिलभुजादण्ड परिमण्डितेन गदादण्डेन दण्डधरसन्देहदं पाण्डुसूनुमुपगूह्य विक्रमोत्तीर्णापर्णे यार्णोजबन्धुं निर्निरोधोत्कीर्णस्फुलिङ्गवेष्टिता कर्णन्तलोचनं मेघवर्णमैरावण निभानिभानधिरोप्य यौवनाश्वक्ष्मामण्डलाखण्डलस्स्वयमपि गन्धान्धं मदबन्धुरं सिन्धुरं निजमारुह्य साटोपाटीकनकलितोद्भटघोटककोटिस्फुटां वीरभटच्छटां समालोकयन्नमन्दविलासिनी बृन्दकरारविन्दपनीपद्घ्राणानन्दकरकुन्दवरबृन्दपरिस्पन्दिपरिमल सुरभिलगन्धवह-निष्पातिनिष्पन्दपुष्पन्धयस्तनन्धयकुलाकलितं हृतवीणाहङ्कारं झङ्कारं शृण्वन् सुरवरगुरुचिरतरपरिवर्णनीयं स्वीयं पुरं प्रविश्य प्रभाकरनिभमणिप्रभां सभां भासमानामसमानां शनैश्शनैरासससाद ।।

कर्णजे विक्रमं पश्यन्नौर्वस्येव परीक्षया ।
अर्णवस्यापसोभ्यर्णं तूर्णमर्णोजवल्लभः ।।५७।।

अस्तंयति सति तरणावासायं तत्कराग्नितप्तायाम् ।
दिशि चक्रभाष्पमर्शाद्धूमा उद्यन्त इव तमांसि बभुः ।।५८।।

In Public domain. Digitization Muthulakshmi Research Academy

तदानीम् ।।

दत्वाज्ञां स्वजनाय गन्तुमधिभूर्गत्वावरोधं स तैः
कृत्वा तत्समये यदुक्तमखिलं धृत्वा सुगन्धादिकम् ।
स्मृत्वा श्रीहरिनामजालमतुलं ध्यात्वात्मनीशाकृतिं
नत्वार्यांश्चरणेषु भोज्यममलं भुक्त्वा निदद्रौ सुखम् ।।५९।।

इति श्रीमद्राजाधिराजराजा कोसल वेङ्कटक्षमारमण
करोद्धृतान्दोलिकापार्श्वभागेन चत्वारिंशदवधानसमयैतत्प्रभुग्रथित
वज्रमौक्तिकस्थगितबिरुदघण्टामणिशोभितकरेण
आन्ध्रप्राकृतसंस्कृतकर्णाटादिभाषाकवित्वमहत्त्वशोभितनागेश्वरसुधीन्द्रतनुजेन
भास्करविपश्चिदनुजेन वेङ्कटकविसार्वभौमेन विरचिते
युधिष्ठिराश्वमेधचम्पूप्रबन्धे द्वितीयस्तबकः।।

In Public domain. Digitization Muthulakshmi Research Academy

श्रीरस्तु

श्रीरामाय नमः

श्री युधिष्ठिराश्वमेधचम्पूप्रबन्धे तृतीयस्तबकः

धरावरपुरन्दरः करिपुरीं ययौ संयुत
स्तदायुतमदावल्तेस्ततसितेभदेशीयकैः।
स्वरङ्गणसुरङ्गदग्रिमपदाग्रजाग्रत्स्वन
द्विरोधिकुलरोधकृद्भिरुदपेटकैर्घोटकैः ॥१॥

तदनु षष्ठि योजनावधौ सत्यां हस्तिनावत्यां तस्य प्रभावतीविभोरनुमत्या महत्या प्रीत्या सत्वरमागत्य करिनगरीं प्रविश्य मातरिश्वजातो यौवनाश्वो यज्ञाश्वेन साकमागतो भवताभिगन्तव्यस्सौहार्दे न मन्तव्यो दूरगमनेन नोपरन्तव्यमिति धर्मनन्दनं पादारविन्दे परिजग्राह ॥

कृष्णं पुरस्कृत्य युधिष्ठिरोऽसौ सामात्यमित्राधिकबन्धुवर्गः ।
तौर्यत्रिकारावविरावितभ्रस्सहोदरैश्चानुगतः प्रतस्थे ॥२॥

करिघोटकुलैर्बलैर्युतस्सन् कुरुभूस्वादपरीक्षया किलासौ ।
त्वरया धुरि यौवनाश्व भूभुग्धरणीन्द्रं चरणद्वये ननाम ॥३॥

तदनु धर्मनन्दनस्तमालिङ्ग्यारविन्दनन्दनसङ्क्रन्दनमुख बृन्दारकबृन्दवन्दनीयपादारविन्दद्वन्द्वं नन्दनन्दनं मुकुन्दं तस्मै प्रदर्शयामास ॥

तदनुस्वारूढक्षत्रियताहरणपूर्वकब्राह्मसम्पत्सम्पादनेच्छया मुखे सम्भवितुं सन्निहितेन खद्योतेनेव विद्योतमानेन मणिखचितेन कोटीरेण दीप्रशिरःप्रदेशं सकलकलासान्द्रमुखचन्द्रचन्द्रिकाजिघत्सया समासन्नाभ्यां चकोराभ्यामिव लोचनाभ्यां परिगृह्यमाणश्रवणयुगं नासाचम्पकदर्शनमात्रवित्रासेन दूरं विद्रवद्भिरिन्दिन्दिरैरिव कटाक्षसमुदयैर्नीलीकृतपार्श्वभागं भक्तजनस्य गोचरीभवितुं

In Public domain. Digitization Muthulakshmi Research Academy

मूर्तिमता बहिर्निर्गतेनानुरागग्रन्थिनेव कौस्तुभेन सुन्दरकन्धरं हृत्कवाटपरिनटदनन्य-सामान्यविभवमान्यधन्यजलधिराजन्यकन्याप्राभवावलोकनजातेन कोपेन स्वयमपि वत्सभागमध्यासीनया विश्वम्भरयेव विराजमानया श्रीवत्साङ्कश्रिया श्यामलवामतलं नानाविधधातुप्रसाधनरोचिष्णुशुण्डादण्डद्वापरदाभ्यां बद्धाङ्गदाभ्यां दोर्भ्यां भ्राजमानभुजान्तरालं वदनसौरभ्या ढौकितनिश्वासवातपोतजातजात परीमलझरी-भरास्वादनाय नाभीपुण्डरीकक्रोडादूर्ध्वप्रसृत्वर्याशुम्भद्धम्भरडिम्भ परम्परयेव रोमराज्यामण्डितपिचण्डं कुक्षिस्थचतुर्दशभुवनभरणाय सूक्ष्मरूपेण सन्निकृष्टेनाहि-परिवृढेनेव हीरप्रत्युप्तशृङ्खलेनालङ्कृतकटिभागमगण्यलावण्य तारुण्यजिगमिषया जङ्घीभूतयोर्मदनतूणयोर्मुखयोर्दरीदृश्यमानाभ्यां बाणकमलाभ्यामिव पादाभ्यां देदीप्यमानमणिपादुकं कुरुविन्द कन्दलरुचिररुचितुलितप्रभाविभासिताभ्यां पादाभ्यां निर्जितैः पल्लवतल्लजैरेतत्प्रसदनलिप्सयाधिरोपितैर्मन्त्रपुष्पैरिव नखनिकरैर्हृदयङ्गमपद-युगलं निखिलभुवनजेगीयमानवैभवं हृतदिदृक्षुजनतृष्णं कृष्णं शतकृत्वः प्रणम्योपनिषदुक्त्या यौवनाश्वोऽस्तावीत् ॥

कौन्तेयो यौवनाश्वक्षितिपतिसहितोऽन्योन्यसम्मर्दभूमि
स्पृष्टास्पृष्टाङ्घ्रिसेनाद्वयपरिकलितस्स्वालयं लीलयाप ।
तावत्सात्राजितीस्वीकृतसुखदपरीरम्भसंरम्भलाभं
स्मृत्वेवाम्भोजनेत्रो द्रुतमगमदसौ द्वारकां स्फारकान्तिम् ॥४॥

तदागमत्कर्णपदातिशीतलां युधिष्ठिरोक्तां मधुरां सुधाविधाम् ।
स्मरन्निव श्रोतुमरङ्गिरं चिरं पुरं कुरूणां स पराशरात्मजः ॥५॥

अश्वोत्सर्गकृते त्वया कुरुपते भूभृद्धृते त्वर्यतां
कालस्स्वल्पदिनावशेषित इहैव प्रेषणीयोऽनुजः ।
भीमः कृष्णसमागमार्थमिति तां वाणीं मुनेश्शृण्वता
राज्ञाज्ञापित एव मारुतसुतो द्राङ्निर्ययौ द्वारकाम् ॥६॥

In Public domain. Digitization Muthulakshmi Research Academy

आत्मानं परिवर्णयत्समधिकं कापोतपोतारवै
र्वीक्ष्येदं पुरमुद्धृतध्वजकरं कृष्णेन हृष्टात्मना ।
सन्मानाय पिशङ्गमम्बरमिव स्वीयं समाच्छादितं
संराजत्यदसीयकाञ्चनमयः प्राकार एष क्षितौ ॥७॥

गङ्गातरङ्गपरिरिङ्गणभारजात
शैवालभाञ्जि शिखराणि लसन्त्यमुष्य ।
अभ्यागताः किमुचितं परिखाम्बु तेऽद्य
देहीति सिन्धुजलपाननिरीहयाब्दाः ॥८॥

क्षिप्त्वा स्वजीवनमधश्चरणस्य सालः
कृत्वा ऋणग्रहमनन्तपदे तदास्य ।
तस्मा अदातृकतयोद्भवतामघाना
मोघानिव स्वनिकटेऽम्बुमुचो बिभर्ति ॥९॥

प्रत्यग्राग्रसमग्ररत्ननिकरैस्सालं विशालं कृतं
दृष्ट्वा स्वैरमपत्रपिष्णुरुदधीरत्नाकराख्या भृतेः ।
खेयाकारधरो विरोदिति न चेत्तुङ्गैस्तरङ्गारवै
रापातालविभेद्यहार्यगतवाःपूरः कथं वर्तते ॥१०॥

तदा पुरं प्रविश्य परितः प्रसार्य चक्षुरेवं भावयति स्म ॥

अदोदीप्रवप्रावनद्धारुणानां मणीनाञ्च सौत्रामणीनां गृहाणाम् ।
रुचारक्तनीलां द्युवेणीं त्रिवेणीमवेत्यामरालिर्दिनादौ सुनोति ॥११॥

श्रुत्वैतद्वार्तां स जगत्कर्ता बकहर्तारं समेत्य विदिततदागमनकारणस्तं जग्धिकेल्यै शुद्धान्तं प्रवेशयामास ॥

तावद्देव्या महिष्या रुक्मिण्या सहाभिवन्द्य समुपेयुषीरितराभोगिनीः कृष्णञ्च विलोक्य गन्धवहनन्दन श्चातुरीस्फुर गिरं व्याजहार ॥

In Public domain. Digitization Muthulakshmi Research Academy

नीलाब्दो भवदाकृतिं समधरत्तद्विप्रलम्भासहा
स्तत्रस्थास्तटितस्स्म बिभ्रति तदा भैष्म्यादिकानां तनूः ।
तस्मादेव हि दित्ससि त्वममृतं तासाममूषां गतिं
दृष्ट्वा त्रस्यति हंससन्ततिरितिवै तत्प्रमाणं मम ॥१२॥

ताभिस्सह मुदितमनाः कृष्णोऽभूत् ॥

तदानीं द्राक्षेक्षुखण्डक्षीरदधिमधूनि मधुरिमधुरीणानि सुधाशिक्षणदक्षिणानि वीक्षणमात्रतृप्तिकराणि नानाविधापूपिकशाष्कुलिकप्रमुखानि भक्ष्याणि च देवकीनिक्षिप्तानि कनकपात्रयोः पुण्डरीकाक्षबकविपक्षौ जक्षतुः ॥

पीयूषं दशकुम्भमात्रमदतो भिक्षाटनं कुर्वतो
रक्षोन्नञ्च बुभुक्षुकस्य भवतो भक्ष्यं कियत्स्यादिदम् ।

भीमः॥

कुक्षावन्नमयं जगद्धृतवतो भिक्षां बलिं याचतो
न क्षामस्तव चेदिहोदनमुखं वीक्षेय किं वाप्यहम् ॥१३॥

इत्थं मुरमर्दनबकवर्धनौ हास्यमिश्रितैस्सल्लापैरग्रे भोजमुत्थाय तदौपयिकं कृत्यं निर्वर्त्य प्रयाणाय सर्वसहान् सर्वान् यदून् वाग्जितमधूनाकारयामासतुः ॥

भीमः॥

निर्गच्छाद्य हरे शीघ्रं पुरमाजातशात्रवम् ।
श्व एव नियतः कालो मघाश्वोत्सर्जनाय हि ॥१४॥

कृष्णः॥

किं स्मृता द्रौपदी कियत्यासक्तिस्ते ॥

मौलिस्ते खलु रुक्मिणीतनुरुचिर्भद्रात्तसत्यं वचो
वीक्षाप्रेक्षितलक्षणाधरतटीदीव्यत्सु दन्ताश्रिता
कारुण्यं श्रितमित्रविन्दमखिलः कायोऽपि वामाञ्चितो
ह्यासक्तिस्तव वाच्युतेति मम वा दारेषु भीमोऽब्रवीत् ॥१५॥

In Public domain. Digitization Muthulakshmi Research Academy

तदनु तदनुवाङ्गुदितमना मनाङ्निरन्तरनिखिलयदुसदर्भकनन्दिन्या विदर्भक नन्दिन्या सकलस्वकलानैपुणीजितधात्रीरत्या सात्राजित्या सहस्राक्षवीक्षणीय शुभलक्षणया लक्षणया निर्निद्रभद्रमुद्रया भद्रया सुवल्लभतैकतुलातुलितसाम्बसत्या जाम्बवत्या कोकनदप्रवालकिसलयतोष्टूयमानपदन्तया सुदन्तया सुन्दरताजित-सुपर्वसुन्दरीचरीक्रियमाणस्तोत्रबृन्दया मित्रविन्दया दिगन्तनरीनृत्यमानचातुर्यधुर्य-सौन्दर्यमाधुर्यावार्यविनयया सूर्यतनयया निरन्तराराधितविधुभिर्यदुभिरनुवृतो यशोवशीकृतरेवतीरमणं रेवतीरमणं जितरिपुकुलानीतानकदुन्दुभिमानकदन्दुभिञ्च पुरपरिपालनाय नियुज्य नानाविधपारावतशुकपिकवारवतीं द्वारवतीं विहायोत्तीर्ण-बहुपथो गरुडरथोरङ्गदभङ्गतुङ्ग तरङ्गरङ्गत्वङ्गत्कमलसङ्गतभृङ्गकुरङ्गनयना मङ्गलतर-सङ्गीत भङ्गीनिशमन मुदितवलक्षपक्षपक्षिकुलप्रेक्षणीयं सरोऽध्यक्षमद्राक्षीत् ।।

तदा रुक्मिणी स्ववल्लभाय कमलिनीततिं प्रदर्श्य मधुरिमभूयिष्ठां वाचमाचष्ट ।।

कुक्षौ निधाय कमलं त्वयि पोष्टरीह
प्राप्ते सति भ्रमरनादमनुर्लतेयं
निक्षिप्य हस्तकमलेऽस्ति हि दित्सुरर्घ्यं
मारन्दकेसरकृपीटच लाक्षतौघम् ।।१६।।

कृष्णस्तां प्रत्युवाच ।।

विलोक्य नयनं तेऽब्जं ललने सारसे जले ।
तप्त्वा जलजनामैव धृत्वा तेन समं ह्यभूत् ।।१७ ।।

सत्यभामा स्वकान्तं मधुरिमधुरीणां वाणीमभाणीत् ।

नवकर्णभवाद्वयोऽयुतान्मद्बहुवृद्धं जनिताष्टकर्णमूनम् ।
तवनाभिकुशेशयन्त्यजन्माम्भरकृष्णेति नतश्चयोम्बुजानाम् ।।१८।।

In Public domain. Digitization Muthulakshmi Research Academy

कृष्णस्तां प्रत्याबभाषे ॥

कान्ते मुखस्य न समानि पयोरुहाणि
यस्माज्जिते सति मरन्दरसे स्ववाचा ।
तेषां समस्तकुलनिर्मितिकर्मशीलो
वाणी शिता कुरुत सारसनामकानि ॥१९॥

जाम्बवती स्वरमणं सुधाकिरा गिरा व्याजहार ॥

कुर्माङ्घ्रिस्सरसीरमोर्मिवलिका कोकस्तनी श्रीपते
राजन्ती बिसबाहुभिश्चलदलन्नीरेजहस्तेष्वलम् ।
किञ्जल्कस्फुटदीपिका धृतवती सत्कर्णिकापात्रकै
र्भृङ्गीझङ्कृतिगीतिभिर्मुहुरिह त्वां गायतीवाधुना ॥२०॥

कृष्णस्ताम्प्रति ॥

त्वन्नाभ्या जितया भिया सहितया कान्ते सरस्यानया ।
बालालोलमृणालबाहुविलसत्कञ्जाञ्जलीनां ततौ ।
दीनारप्रकरा विधातुमुपदामस्याः प्रसादेच्छया
निक्षिप्ता इव विस्फुरन्ति नितरां सद्वर्णकाः कर्णिकाः ॥२१॥

तदनु लक्षणा नाथं प्रति श्लेषाश्लेषितां भाषां बभाषे ॥

अरिदरकरस्येन्दोर्वंशेऽपि तादृशि माधवो
प्यरिदरकरो भूत्वा जन्मादधाविति संविदन् ।
अरिखगचयो भीतस्त्वां प्रेक्ष्य साध्वसमुज्झह
न्नुवति हि महामोदादद्यात्र वासितकैतवात् ॥२२॥

सन्तोषतन्तुदन्तुरितस्वान्त श्श्रीकान्तस्तामवलोक्य व्याजहार ॥

सखि त्रिवेण्या तव सा त्रियामिका जिता सती लोपमिता भवेद्यदा ।
सदा तदानीं भुवि कोकदम्पती मुदा भजेतां कुचयोस्समानताम् ॥२३॥

In Public domain. Digitization Muthulakshmi Research Academy

तावन्मित्रविन्दा स्वदयितम् ॥

भावत्कं प्रतिबिम्बरूपममले तोयान्तरे निस्तुलं
पश्यन् त्वन्मतिजातमोदभरतः पाथोलवैरावृतम् ।
कञ्जंमञ्जुलमौक्तिका वृतियुतं छत्रं सितं सादरं
धृत्वा भृत्यवदत्यपूर्वरुचिरं भात्यद्य पद्माकरः॥२४॥

कृष्णो युक्त्यासक्त्या सूक्त्या तामूचे ॥

कामिनि कासारोऽयं विजितो युधि तावकीनया नाभ्या ।
ईषत्सारोप्यभवद्धयेन तस्मादवाप सार्थत्वम् ॥२५॥

कालिन्दी ॥

अनिमिषरिपुभेत्तारं राजीवलोचनं मुरारे त्वाम् ।
अनिमिषराजीवाख्या मीना द्रष्टुं लिलङ्घयिषव इव ॥२६॥

ताम्रभुरभाणीत् ॥

मन्थानभूधरविघर्षकिणीभवन्म
द्भ्द्रेदकर्मणि विलक्षणसारभाजोः।
त्वच्चक्षुषोश्शकुलिनो न समा ह्यमीषां
यस्माद्विसार इति नाम जगत्प्रसिद्धम् ॥२७॥

सुदन्ता स्वनायकमालोक्य ॥

पूर्वं त्वय्यरविन्दनेत्र कमठाकृत्या वहत्यद्भुतं
मन्थानाद्रिमिमे वसेयुरुदरे ते कच्छपानां चयाः।
तस्मात्पृष्ठतलेषु दार्ढ्यमभवत्तेषां विधेयोर्गतो
गर्भस्थं शिशुवारमेव जननीर्नो बाधते हि ग्रहः ॥२८॥

दृष्टान्तद्वारा हेतुना साध्यस्य स्थिरीकरणचणां तस्या वाणीमाकर्ण्य मुदितमनाः कृष्णस्तामभाषत ॥

In Public domain. Digitization Muthulakshmi Research Academy

अभङ्गशोभे तव सारसाञ्चिते सभङ्गशोभाकलिता जडाश्रिताः ।
इमे पदे ते कमठोद्भटा अतस्तयोरमीषामुपमा कथं भवेत् ॥२९॥

भद्राऽपि जगद्रमणमब्रवीत् ॥

कमलानुवर्तिनं त्वां हंसं हिंसां नयन्तमपि च विदन् ।
भीतः कमलानुचरः पक्षानिलतः प्रसेवते हंसः ॥३०॥

कृष्णः॥

अम्भोरुहाक्षि गमनेन समो बुभूषुः
पद्मासनोऽपि सरसि प्रसभं तपस्यन् ।
साम्यं न चाद्य लभते कलहंससङ्घो
यस्माद्धनागमनकालनिरीहतास्य ॥३१॥

भैष्म्यादयो युवतयो दलितैःपयोजै
र्बध्वा सरं स्वरमणाय ददुः प्रमोदात्।
कृष्णेन यद्यदिह वीक्षितमम्बु जन्म
तत्तत्समार्धदलितं ददृशे न फुल्लम् ॥३२॥

ताभिस्सह हरिरेवं विधा विविधा लीलाः प्रचार्य निजसञ्चरणविरहज्वर-परितापभरभरणेनेव कृशां काण्डहिण्डितडिण्डीरखण्डकाण्डच्छलेन विरह-पाण्डिमानमाबिभ्रतीं कालिन्दीमासाद्याधिरोधस्स्थलं सैन्यमवतार्य स्वागमनवार्ता-मजातशत्रवे प्राहिन्णोत् ॥

तदुदन्तश्रवणमात्रजनितानन्तसन्तोषाक्रान्तकान्तस्वान्तः क्षमाकान्तस्स धृतराष्ट्रोपि धृतराष्ट्रस्सकृपः कृपाञ्चितस्सविदुरो विदुरैः परिवृतः पार्थवृषकेतु यौवनाश्वप्रभृतिभिर्युतो हवसैन्धवं पुरोधाय हरिदर्शनकौतूहलहलहलिकयागम्य सत्वरं हरिमालिलिङ्ग ॥

In Public domain. Digitization Muthulakshmi Research Academy

तत्रान्तरे ।।

शृण्वन् चारमुखेन कैटभरिपुर्भासां प्रभोरात्मजा
तीरे वर्तत इत्यमर्षभरसम्पूर्णोऽनुसाल्वस्ततः।
स्वभ्रातृद्दहमेनमेत्य सहसा तद्वैरनिर्यातनं
कर्तुं सैन्यसमाहितोऽन्तिकमगाद्युद्धप्रबद्धस्पृहः।।३३।।

एवमेत्य निराघाटविक्रममाक्रम्य हवघोटकं हठात्कारेण परिजग्राह ।।

उभयोस्सेनयो राजा कोलाहलमसह्यकम् ।
श्रुत्वात्मपुररक्षायै पार्थे न्यस्ताङ्कोऽभवत् ।।३४।।

बलयोरुभयोरासीद्धोरं तुमुलमद्भुतम् ।
बभूवुरीक्षितारोऽत्र लिप्सवोऽनिमिषेशताम् ।।३५।।

तदात्वे ।।

पृथुलभयङ्करवालगमपि तरसा लोलदन्तरङ्गयुतम् ।
शरभमिव कृष्णसैन्यं पश्यन् साल्वत्वमगमदनुसाल्वः ।।३६।।

निरीक्ष्य स्वां सेनां रिपुकृतपरीभावविरसां
गुणं स्वीयं चार्तिं नयति सति शौरिप्रियसुते ।
तदारातिव्यूहानिजगुणगणानार्तिमनय
न्नयं भेदो धर्मिश्रुतमिह पदं धर्मकलितम् ।।३७।।

प्रकामसङ्गरोचितां शिलीमुखावलिं वह
न्मदान्धतां सदा बिभर्ष्यभीकसन्ततौ यतः।
अयं प्रकामसङ्गरोऽप्यभीकसञ्चया इहा
प्यलं शीलीमुखावलिं प्रयोजयेति सोऽब्रवीत् ।।३८।।

प्राणपञ्चकजिघृक्षया पृथग्बाणपञ्चकमयं हरेस्सुतः।
वक्षसस्थलमुदीक्ष्य रंहसा प्राक्षिपत्स वनवाजिनं मुषः ।।३९।।

In Public domain. Digitization Muthulakshmi Research Academy

क्ष्वेलोद्वेलितवीरवादपटिमा साल्वानुजो जित्वर
श्छित्वा तान्विशिखान् शरैः खरतरैस्तं पातयामास कौ ।
तत्रापादशिरस्तटं परिगता रेणुर्बभौ काश्यपी
वात्सल्यात्सुत इत्यनीक्षितमरिस्तोमेन किन्वावृणोत् ॥४०॥

पतितमेनं भुवि प्रद्युम्नं दृष्ट्वाज्यसंयोजनेन जाज्वल्यमानो यज्वाग्निरिव क्रोधेनोज्ज्वलन् सज्जीकृतधन्वा पावमानिर्निरगात् ॥ तदा ॥

भीमो रिपुकुलभीमस्सेनां दर्पावलेपितां सेनाम् ।
गदया रागदयाकृतसुधया चिच्छेद पालितवसुधया ॥४१॥

सिन्धुः पृथुलधुनीमिव सन्धुक्षितचापमात्रसाहाय्यः।
रुन्धे स्म गान्धवाहिं मन्देतरबाहुशक्तिरनुसाल्वः॥४२॥

आशीविषप्रतीकाशानाशुगानाशुगात्मजः ।
आशाधीशपुरोत्पातानाशुगाढरुषात्यजत् ॥४३॥

साल्वभ्रातृगुणोज्झितेन विशिखव्रातेन विद्धः पत
न्भूमौ पूरुषमात्रमाविशदधस्सोऽयं समीरात्मजः।
सर्पाग्रण्युपदापि तां हितकरीं मत्तायुतेभेड्बल
श्रीदात्रीं मधुरां सुधामपि पुनः प्रीत्या पिपासन्निव ॥४४॥

शरपुञ्जं ववर्षेति कृष्णमेघस्तदोचितम् ।
रिपुनागाभयं प्रापुरित्येतच्चित्रमुच्यते ॥४५॥

हरौ कराभ्यां परिगृह्य चापं शरानरातीन् किरति प्रतापम् ।
सरान्वरार्थं परिगृह्यमाणान् सुरीवरास्स्वेषु कचेषु दध्रुः ॥४६॥

शरशायिनं पुरैनं शरशायिनमेव तत्र कुरुते स्म ।
वसुदेवसेव्यशौर्यो वसुदेवसुतं रणेऽनुसाल्वोऽयम् ॥४७॥

In Public domain. Digitization Muthulakshmi Research Academy

तत्रान्तरे ।।

अहस्करतिरस्करे तुरगतस्करे भास्करे
निशाकरयशस्करे बृहदरुष्करान् दुष्करान् ।
शरान् खरतरान् वरान् सुरपुरीशभृत्याकरान्
सुरोत्तमशरीरभूजनिरनेकशो वाकिरत् ।।४८।।

त्रसरेणुसखान् शिलीमुखांस्तान्विरचय्याभ्रनदीभ्रमार्भटीकः।
युधि साल्वसहोदरः कलम्बानपमृत्योर्जनकान् मुमोच वीरः।।४९।।

तावद्रथादधस्तादुल्लङ्घ्याकाण्डजगन्मण्डलखण्डनायागतं दण्डधरमिव समापतन्तं काठिन्यपरीचिक्षिषयेव स्वोरसि पदहतिं तन्वन्तमनुसाल्वं हुङ्कारपूर्वकमुपसृत्य हरिसदनायमानं स्वहृदयसीमानं चरणेनास्पृशदयमिति तन्निष्कृत्यै भुवः प्रदक्षिणं कारयितुमिव गलहस्तिकया शतकृत्वः परिभ्राम्य निपात्योर्व्यां मौर्वीलतया कण्ठे निबध्य मृगयुर्मृगमिव तं कानीनसूनुः कृष्णं समयागमयामास ।।

धन्यं जितराजन्यं कर्णजमूचे स पाञ्चजन्यधरः।
जन्यभवकीर्तिकन्यं मान्यं वीरैर्हृतस्वजनदैन्यम् ।।५०।।

दुर्योधनस्नेहभवापकीर्तिं स्तातस्य तेऽद्यासदृशी हि मानी ।
प्रतापरूपेण दिवाकरेण प्रतप्यते ते प्रसभं हि मूलात् ।।५१।।

तदा गदाधरो विनयविस्मयप्रमोदभरितं कृतं दुरितमङ्गैरष्टभिः परिमार्ष्टुमिवाष्टकृत्वः प्रणिपतन्तमात्मवेदिनमनुसाल्वं करुणोत्तरङ्गैरपाङ्गैः परिलिप्य सप्ततन्तुसप्तिना साकमजातशत्रुमुपसृत्य हस्तिनावतीमुपागमत् ।।

पत्रोत्लासे सुशीलो नवनवविकसन्मित्रसाम्राज्यपालः
पोत्रोघक्षेमपालः पिककरटिघटापुत्रभेदानुकूलः।
स त्राणामुक्तकालो रविकरसुखिनां पत्रिणां कल्पसालो
धात्रश्चोज्ञातलीलस्तदनुसमगमच्चैत्रमासाख्यकालः ।।५२।।

In Public domain. Digitization Muthulakshmi Research Academy

उदितयज्वकुलभासि तस्मिन्मासि राकायां दिदृक्षुलोकायामभिजिन्मुहूर्ते शुभवार्ते स भूजानिराजा नेयमलङ्कृत्य तस्य फाले विशाले स्वबिरुदाक्षरकुट्टिमं पट्टकमाबध्य वादित्रैर्जैत्रैर्दूरीकृताब्दैर्विसर्जयामास ।।

इति श्रीमद्राजाधिराज राजा कोसलवेङ्कट क्षमारमणकरोद्धृतान्दोलिका पार्श्वभागेन चत्वारिंशदवधानसमयैतत्प्रभुग्रथितवज्र मौक्तिकस्थगितबिरुद घण्टामणिशोभितकरेणान्ध्रप्राकृतसंस्कृत कर्णाटादिभाषाकवित्वमहत्व शोभितनागेश्वरसुधीन्द्रतनुजेन भास्करविपश्चिदनुजेन वेङ्कटेन कविसार्वभौमेन विरचिते युधिष्ठिराश्वमेधचम्पूप्रबन्धे तृतीयस्तबकः।।

In Public domain. Digitization Muthulakshmi Research Academy

श्रीरस्तु

श्रीकृष्णपरमगुरुभ्यो नमः

श्रीयुधिष्ठिराश्वमेधचम्पूप्रबन्धे चतुर्थस्तबकः

सप्तेर्गुप्तिकृते घटोत्कचसुतस्साल्वानुजः कर्णभूः
प्रद्युम्नश्च तदा पदातिभिरितास्सुत्रामपुत्रान्विताः।
जग्मुर्बन्धुरसिन्धुराः कृतजयश्रीबन्धनस्यन्दना
भेरीभूरितरारवप्रदलितक्ष्मामण्डलीमण्डिताः ।।१।।

पार्थः।।

सर्वत्र क्षितिमण्डले तरुततिस्स्फीता वरीवृत्यते
तस्यां सच्छविभाग्गुलुच्छनिकरस्स्वच्छो दरीदृश्यते।
तस्मान्निष्पतयालुपुष्पजरसस्रोतो जरीजृम्भ्यते
तस्मिन्नङ्गदभङ्गमङ्गलरवं भाङ्गं नरीनृत्यते।।२।।

वात्सल्येन धरारुहेषु धरया स्वैरत्नगर्भाख्यया
प्रत्नैरत्नवरैर्विभूषणगणो निर्माय चित्रप्रभः।
निक्षिप्तः किमगस्त्यकिंशुकतमालाशोकचाम्पेयक
स्फायच्चारुविलोलकोरकचयस्सोऽयं जरीजृम्भ्यते ।।३।।

एवं वसन्तस्य लक्ष्मीमीक्षमाणा एते महारथास्सवनघोट्टाणमन्वगमन् ।।

तदनु स वाजिमेधवाजिराज उदन्याजन्यदैन्यो वन्यौघमुल्लङ्घ्य माहीष्मतीराजन्यतन्तन्यमानारामजञ्जन्यमानविटपितटीपनीपतत्सुमालिमधूलिरिञ्छोलिगन्धबन्धुरोर्मिकाचाचल्यमानजलगजोच्चैर्मदां स्वस्नायिदुष्कर्मवर्ममर्मनिर्मूलनकर्मदां पान्थजनशर्मदां नर्मदां समाससाद ।।

In Public domain. Digitization Muthulakshmi Research Academy

तत्र तावत्प्रवीरो नाम नीलध्वजसूनुरचञ्चलाभिश्चञ्चलाभिरिव वारचञ्चललोचनाभिरावृतो मदनमञ्जर्येव मदनमञ्जर्या सह निजसीमन्तिन्यावलमदनवन-सन्देहसन्धानपेटिकायामारामवाटिकायां कुङ्कुङ्कुटीतटीसमाटीकनकलितश्शुभ्रतया-भ्रवाहवाहस्य विभ्रमदमदभ्रमदं कौसुम्भप्रभागुम्भितसुगलं मेचकवर्णसूचककर्णयुगलं सवनगन्धर्वमक्षिपथे लक्षीचकार ॥

हंसमिव हंसमश्वं चलितखलीनं परं विराजन्तम् ।
अनुगम्य राजसूनुः पट्टं जग्राह तन्निटालस्थम् ॥४॥

प्रत्यर्थिक्षितिवल्लभान्धतमसत्रय्यात्मकेनाधुना
वाहस्यास्य युधिष्ठिरेण सवनत्यक्तस्य रक्षाकृते ।
बाणाचान्तरिपुप्रतापमहिमा दोस्तुष्टमृत्युञ्जयः
पार्थोऽत्रास्ति जवात्प्रवीर इह चेन्मुष्णातु लोकेहयम् ॥५॥

इति हेमपट्टकपद्यपद्धतेरुद्धतिं निध्याय रोषपोप्लूयमानमानसः प्रवीर इत्यक्षरत्रयमाम्रेडितं कुर्वन् तमश्वमेधीयमश्वं निकटकुटे निरुध्य कठोरतादिक्कुम्भिनीरमणश्रवणपुटपाटनपटीयोभिर्ज्यारावैर्ज्यां द्याञ्च विदलयन् स राजनन्दनस्स्यन्दनस्थोऽभूत् ॥

तदनु रुष्टो वृषकेतुस्स्पष्टं क्रोधपुष्टं श्रवणकष्टं वचनमाचष्ट ॥

रेरे क्षत्रिय मुञ्च मुञ्च तुरगं मत्या समं दुष्टया
बाणाः प्राणपरायणाः खलु घनक्षुद्बाधया बाधिताः।
छन्दोज्योतिष आद्वितीयवपुषः कर्णस्य तेजोमयो
दोष्मानेष वृषध्वजो रणभुवि त्वां प्रेक्ष्य मुञ्चेत्किमु ॥६॥

रुषा ब्रुवाणं श्रवसोः कठोरं वृषध्वजं वाचमनीचबाहुम् ।
यथा विनिक्षिप्तनिजप्रतीकस्तथास्थितं स व्यतनोत्कलम्बैः ॥७॥

In Public domain. Digitization Muthulakshmi Research Academy

सकलेषु प्रवीरेषु खिद्यमानेष्वहंयुषु ।
एक एव प्रवीरोऽत्र हर्षमाणोऽभवद्धत ॥८॥

तत्रान्तरे ॥

स्वयं साल्वानुजोऽपि स्वीयैः पत्रिभिः प्रसारमेयमपि सदा खेटिकासिधारिणमपि लुब्धकमपि रणे प्रवीरमपातयदित्येतदाश्चर्यम् ॥

तदनन्तरम् ॥

अक्षीणरोषचलिताधरपल्लवोऽग्र
स्त्यक्षोहिणीबलयुतस्स तु नीलकेतुः।
रुक्षाक्षरेक्षणसमुत्प्लुतजातवेदाः
पक्षीन्द्रवत्क्षणमवाप समीकभूमिम् ॥९॥

नभस्सभां देवनितम्बिनीचयै ऋभुप्रभुस्तावदभूषयच्छुभाम् ।
अभूत्प्रभारासहनेन गूढपाद्विभुः प्रभुग्नस्फुटदस्फुटस्फुटः ॥१०॥

तुरगखुरघातजातं भूतलरेणुं समुत्थितं दृष्ट्वा ।
शरधिविलीना अपि ते मैनाकाद्याः क्षमाधरा बिभ्युः ॥११॥

अहमहमिकया रणाभिलाषास्सह महता नियमेन सैन्यभर्तुः।
अहरहरतिपुष्टदेहरागं जहति हठात्स्म भटच्छटास्समस्ताः॥१२॥

तत्तादृग्भटकोटिभीषणचलद्दोःकुण्डलिस्वामिनां
जिह्वीयन्ति किल स्म खड्गनिकरास्सद्यस्समुत्तेजिताः।
अन्योन्यप्रतिघट्टनात्समुदिता रेजे स्फुलिङ्गावलि
वैरिप्राणसमीरपारणपरिप्राप्तास्त्रधारा किमु ॥१३॥

यथा यथा वैरिवरान् क्षुरप्रैः प्रद्युम्न एकस्समरे बबाधे ।
तथातथा दिव्यपरः क्षुरप्रैः प्रद्युम्न आरादमराङ्गनाश्च ॥१४॥

In Public domain. Digitization Muthulakshmi Research Academy

तावदम्भोजिनीरमणडिम्भसम्भवश्शुम्भद्गम्भीरदम्भोलिसंरम्भविडम्बकं कलम्बकदम्बकमुत्कीर्य जम्भारिरसम्भावितं कुम्भिनीधरमिव सम्भूतक्रोधो नीलध्वजं निरोधयाञ्चक्रे ।।

बाणेनाशु शरासनं करगतं द्वाभ्यामिषुभ्यां गुणं
सूतं शातशिखैः खगैस्त्रिभिरधो वाहांश्चतुर्भिश्शरैः।
नाराचैश्च विधुन्तुदाननिभैर्वक्षस्तटं पञ्चभि
श्छित्वादित्यसुतात्मजस्य कृतवान् क्ष्वेलां स नीलध्वजः।।१५।।

तत्रान्तरे ।।

समितिसदाधारतया प्रथनहिततया प्रवालहस्ततया ।
चिच्छेद यौवनाश्वो नामैकतयारियौवनाश्वान्प्राक् ।।१६।।

अतिलोकविलोकनीयसत्वं शतकोटिप्रतिकोटिभिश्शराग्रैः।
पृतना प्रततान नीलकेतुं शतमन्योस्तनयस्य रक्तकेतुम् ।।१७।।

तत्र पुनस्स माहिष्मतीपरिवृढो दृढतरपृषत्कत्रुटिताग्रपदपतद्यौवनाश्वं यौवनाश्वं दुस्सहाजिह्मगाघातनिजपातदीर्णभुवं कर्णभुवं क्रूररूपरोपपाल्यसहोदरं साल्वसहोदरं दूरीकृतधाष्टर्च्य कार्ष्णिञ्च विधाय समररूक्षविपक्षदक्षविक्षेपण दक्षिणफालेक्षणवीक्षणाक्षीणाशुशुक्षणिशिक्षणविचक्षणैः प्रक्ष्वेडनैः परितक्ष्या-न्यान्महीक्षितः क्ष्वेलारवं वेलातिगमकार्षीत् ।।

तदात्वे ।।

निर्वर्ण्यात्मबलं खिलीकृतबलं रुड्ग्रन्थिलभ्रूयुगो
गाण्डीवारवपूरपूरितमहाब्रह्माण्डभाण्डान्तरः ।
आहोपूरुषिकां शरासनभृतामाखण्डदाखण्डलि
र्वीणापाणिमुनिर्यथा स्वमहतीं तन्त्रीर्विना वादयेत् ।।१८।।

In Public domain. Digitization Muthulakshmi Research Academy

पाण्डवे स्वगुणमम्बरमाराद्गाण्डिवश्च गमयत्यथ युद्धे।
बाण एव न चचार गलेषु प्राणवायुरपि वैरिभटानाम् ॥१९॥

बरीभरीति स्म रुषं वृषात्मजो
जरीहरीति स्म शरैररीश्वरान् ।
चरीकरीति स्म मुदं बुधस्त्रिया
वरीवरीति स्म जयश्रियं स्वयम् ॥२०॥

आखण्डलात्मजपृषत्कदितानि वीर
वक्त्राण्यलं दहशिरे प्लवमानकानि ।
सङ्ग्रामरङ्गनिबिडेऽस्रसरित्प्रवाहे
सारस्वतानि किल कोकनदोत्तमानि ॥२१॥

अभेदोऽमरसिंहेन कृतोऽभूत्कङ्कबन्धयोः।
शरप्रचारे कार्याजौ तत्सुतेन तयोर्भिदा ॥२२॥

विक्रान्तानप्यविक्रान्तांश्चक्रे शक्रात्मजो बत ।
अश्वस्थान् पुनरश्वस्थान् नीलकेतुः किमद्भुतम् ॥२३॥

कर्तुमतद्धितवृत्तिं किरीटिनं नीलकेतनोरोजा ।
आगत्य सैन्यसहितस्तच्छरपातात्तदेकशेषोऽभूत् ॥२४॥

अनन्तरमकातरं स्वजामातरं स्वाहावल्लभमस्त्रिकृत्य प्रयुज्यानीकं कान्दिशीकं विधाय कलहनिदानं ययुं गृह्णन् जगाम महिष्मतीम् ॥

क्रोधेनेव धनं जयाह्वयधृतेस्सैन्यं दहन्तं शुचिं
दृष्ट्वा कुर्वति चण्डगाण्डिवगुणे नारायणास्त्रं नरे ।
सूर्याचन्द्रमसौ नभस्यचलतां ताराश्च दूरङ्गताः
पारावारततिर्व्यशुष्यदधिकं धातापि भीतोऽभवत् ॥२५॥

In Public domain. Digitization Muthulakshmi Research Academy

एतानुत्पातानवलोक्य भीतभीतस्सन् वीतिहोत्रः प्रसन्नीभूय महाबाह सितवाह तव च प्राज्ञस्य राज्ञो नीलध्वजस्य च साप्तपदीनं करवाणीति निगद्य श्वशुरमागत्य पुरा मह्यमसह्याजीर्णरोगाय जीवातुनिर्विशेषं खाण्डवं पाण्डवेनार्पितं तेन कृतारिमारणेन मा रणं कुर्विति सामवचनमवादीत् ।।

तस्य वचनमनङ्गीकारिणीमविचारिणीं दुश्शीलां ज्वालां स्वमहिषीं पुरान्निष्कास्याग्निलपितनिघ्नो नीलकेतुस्सावनमश्वमुपदां विधाय सव्यसाचिनं शरणमयाचत ।।

इतो ज्वालाज्वालाजालदन्दह्यमानाङ्गी कुरङ्गीव चिन्तयानन्तया तातप्यमानाङ्गी स्वरङ्गणतरङ्गिणीमासेदुषी तुङ्गेन भङ्गेन स्पृशन्तीं स्रवन्तीमुद्दिश्य पापिष्ठे मा स्पृशाशिश्री त्वं तव सुतो देवव्रतः पाण्डवेन खण्डितोऽभूदित्युपन्यस्य कोपगया तयापगया षण्मासावधौ सोऽपि शीर्षच्छेद्यो भवत्विति तस्मै शापं दापयामास।।

अविनाभाववतीति ज्वाला ख्याता हि वह्निना साकम् ।
इति सा प्रविश्य वह्नौ शररूपेणापबभ्रुहयतूणम् ।।२६।।

पार्थः ।। प्रवाहमवलोक्यावदत् ।

परजीवनभङ्गाढ्यस्सारसोल्लासवर्धनः ।
पारदारानुषक्तोयं पूरःक्षुद्र इवेक्ष्यते ।।२७।।

नीलकेतुः ।।

सदाचरणसम्पत्तिर्वारितारीषणःपरम् ।
पराशयाञ्चितःपूरो योगीव त्वमिवार्जुन ।।२८।।

तदनन्तरम् ।।

पृथासुतरथानुगाश्रितविशालकोलाहला
वदावदमदावलप्रकरवाहिनीवाहिनी ।
स वन्ध्यगतिविन्ध्यभूधरधरान्तरन्तस्थितान्
विगाह्य सुनगान् ययौ तदनु दक्षिणस्यां दिशि ।।२९।।

In Public domain. Digitization Muthulakshmi Research Academy

गच्छन्नग्रे यज्ञवीतिर्यथेच्छं ग्रावाग्रे स्वं विग्रहं संविघृष्य।
लग्नस्तस्माद्गन्तुकामो न शक्तश्चारा एवं प्रोचिरे शक्रसूनुम् ॥३०॥

तदनु नानायत्नैरनुद्घाटिते मखघोटके विरलसरलसुरसालसुरसालवास नारङ्गनारङ्गवरिष्ठारिष्टविकचलिकुचाविकलवकुलवञ्जुलमञ्जुलभासुरकेसर विदलत्कदलीनिस्तुलगोस्तनीफुल्लमल्लिकामतल्लिकावल्लिकासमुल्लसितं वनं जातिवैषम्यवर्जितमृगकुलसमूर्जितमर्जुनः प्रविश्य भ्रश्यच्छ्रममाश्रममध्यमध्यासीनं धूर्जटिमिव निर्जितसकलेन्द्रियं मुनिभद्रमद्राक्षीत् ॥

मनसि प्रतिबिम्बितस्य शम्भोस्तनुकान्त्येव हि धूलितं विभूत्या ।
मुनिनाथमनूनवाक्प्रभावं स नयस्सौभरिमर्जुनो ववन्दे ॥३१॥

ततः स्वामिन्युधिष्ठिरस्यैनं भ्रातरं विद्धि मामिति ।
स्वस्यागमनहेतुं तं कथयामास फल्गुनः ॥३२॥

पुरा खलूद्दालको महर्षिर्निजजायां चण्डीमाज्ञाप्रतिक्रियाकारिणीं शिला भवेति शप्त्वा भाविनार्जुनकरपरामर्शेण यथापूर्वं भविष्यसीत्यन्वग्रहीत्तस्मात्सैव सा शिलेति मुनिस्सौभरिरभाणीत् ॥

तदनन्तरम् ॥

नमस्कृत्य मुनिं गत्वा शिलामस्पृशदर्जुनः ।
मुक्ता चण्ड्यभवच्छापादहल्येव रघूद्वहात् ॥३३॥

ततः॥

अभङ्गतुङ्गसङ्गतिं तुरङ्गपुङ्गवङ्गतो
विहङ्गराजजाङ्घिकञ्जगाम भीमसोदरः।
निलिम्पराज्यसम्पदुत्परम्पराभिसम्पृता
मकम्पनानुकम्पराजचम्पकापुरीं प्रति ॥३४॥

In Public domain. Digitization Muthulakshmi Research Academy

ततः पुरपरिसरे सरीसरन्तमर्वन्तमुर्वीपचारादुर्वाराः परिगृह्य समीरापत्यकेतुञ्च समालोक्यास्थानं प्रस्थाय राज्ञे पृथासुतकथामकथयन् ॥

बध्वेमं तुरगं सुरेश्वरभुवा संयुध्य युद्धाङ्कणे
तत्पक्षागतपद्मनाभचरणद्वन्द्वस्य संवीक्षणात् ।
सद्यो द्रागमलीकरोमि सहितामङ्गैरघाङ्गैस्तनुं
सम्मन्त्र्येत्थमथान्तरङ्गिकजनैर्हृष्टो मरालध्वजः ॥३५॥

यो नायाति रणायाद्य हितं वापि सुतञ्च वा ।
तप्ततैले कटाहे तं क्षिप तं द्राक्पुरोधसौ ॥३६॥

अज्ञाप्य शङ्खलिखिताविति भूमिपाल
स्सर्वाभिसारसहितो निरगादितीव ।
सान्दृष्टिकं भवति पार्थपराजयेन
कृष्णेक्षणेन च भवेत्खलु भूर्युदर्कः ॥३७॥

आज्ञामाधिभवीं महीपतिसुतश्शृण्वन् सुधन्वा तदा
नत्वा मातरमात्मगेहमगमत्तस्य द्वितीयागता।
सर्वाङ्गीणकलाकलापसकलालङ्कारसंशोभिता
कामोत्तप्तविलोललोचनरुचा नीराजयन्तीव तम् ॥३८॥

सुधन्वैवमब्रवीत् ॥

कान्तवलीलां कर्तुं यतते मानसमिभेन्द्र समगमने ।

प्रभावती ॥

कान्तवलीलां कर्तुं यतते मानसमिहैव मम हि विभो ॥३९॥

सुधन्वा ॥

सङ्गरोचितमनोगतोस्म्यहं भृङ्गराजचिकुरे शुभं वद।
अङ्गनाह कुरु माञ्च ते प्रियां सङ्गरोचितमनोगतामिति ॥४०॥

In Public domain. Digitization Muthulakshmi Research Academy

पुनः प्रभावती ।।

सुमेषुभिर्मां परिपीडयन्तं प्रद्युम्नमारान्नजयस्यनङ्गम् ।
अयोविकारेषु परम्पराढ्यं प्रद्युम्नमाजौ कथमाशु साङ्गम् ।।४१।।

इत्थं बृवत्यां प्रभावत्याम् ।।

हंसध्वजस्य तनयोऽहमयं सुमेषु
स्तस्यानुजस्सहजशत्रुरितीव मत्वा ।
तत्कल्पितं श्रममपोह्य नितम्बिनीं स्वां
हर्षाम्बुधौ नृपसुतश्चलितामकार्षीत् ।।४२।।

तावच्छङ्खलिखितौ सुधन्वानमाहूय तप्ततैले कटाहे प्रविशेत्याज्ञां राज्ञस्तस्मै प्राज्ञायाज्ञापयामासतुः।।

म्लाने सतां प्रकाशे पूर्वनगादिन्दुरिव तमोगाढम् ।
क्षिप्त्वालोकं हरिपदि विवेश तैलं रथात्सुधन्वाऽसौ ।।४३।।

कर्णावस्य हिरण्यवाहकलितौ बुद्धिस्तुकृष्णाञ्चिता
दृष्टिर्विष्णुपदीहिता चिरतरं हृद्वृत्तिरानिम्नगा ।
सोऽयं भूपसुतो भविष्यति पतिर्द्राग्वाहिनीनामिति
स्मृत्वा किं न ददाह तप्तमपि तत्तैलं सुधन्वप्रभुम् ।।४४।।

नादहत्तं नरवरं कटाहः प्रज्वलन्नपि ।
यः कोऽपि भवतु क्षोण्यां स्नेहयुक्तो न बाधते ।।४५।।

तं वीक्ष्य शङ्खलिखितौ परीचिक्षिषयेव तौ ।
तप्तं वेति च शीतं वा तैलमाविशतां ततः।।४६।।

सुमनसाधिककौतुकधारिणी सुमनसां ततिरिन्द्रवनाहृताम् ।
सुमनसां ततिमत्र ववर्ष खात्सुमनसां प्रमदोत्सवपूर्तये ।।४७।।

In Public domain. Digitization Muthulakshmi Research Academy

पुरोधसोर्द्वय्युपगूह्य बालकं
मरालकेतोस्सविधं व्यनीनयत् ।
स राजमौलिः प्रमदाश्रुबिन्दुभिश्शिरः
परिस्नाप्य चुचुम्ब तस्य तत् ॥४८॥

तदनु मरालकेतुरधिज्यधन्वानं सुधन्वानं समुद्रगभीरं राजहंसोपेतानां पृथुलतरवारिसङ्गतानां बहुलताञ्चितानाञ्चक्रभ्रमाभिहितानां धाराधरपूरितानां पद्मव्यूहशोभितानां भ्रमरहितानां वाहिनीनामाधिपत्ये नियुज्य गृहाण विजयस्व च विजयमिति शत्रुनाशायाशीःपूर्विकामाज्ञां दत्वा वाजिमेधवाजिरक्षण विचक्षणोऽभूत्॥

इति श्रीमद्राजाधिराज राजा कोसलवेङ्कट क्षमारमण
करोद्धृतान्दोलिकापार्श्वभागेन चत्वारिंशदवधानसमयैतत्प्रभुग्रथितवज्र
मौक्तिकस्थगितबिरुदघण्टामणिशोभितकरेणान्ध्रप्राकृतसंस्कृत
कर्णाटादिभाषाकवित्वमहत्त्वशोभितनागेश्वरसुधीन्द्रतनुजेन
भास्करविपश्चिदनुजेन वेङ्कटशास्त्रिणा कविसार्वभौमेन विरचिते
युधिष्ठिराश्वमेधचम्पूप्रबन्धे चतुर्थस्तबकः॥

In Public domain. Digitization Muthulakshmi Research Academy

श्रीरस्तु

श्रीकृष्णपरमगुरुभ्यो नमः

श्री युधिष्ठिराश्वमेधचम्पूप्रबन्धे पञ्चमस्तबकः

रणदुरुकाहलनिस्वनमान्यं पणितयुदाश्रितभूतवदान्यम् ।
क्षणपदधूलितदिङ्मुखवन्यं रणभुवमाप पृथासुतसैन्यम् ।।१।।

तदानीम् ।।

नन्दनद्वयमपास्य वासवो नन्दनं भुवि दिदृक्षुराप खम् ।
विग्रहस्मरणभेदिसत्त्वरो विग्रहस्मरणमोदिमानसः ।।२।।

सैन्धवसहिता पृतना सैन्धवशत्रोः किरीटिनश्शुभदा ।
पाण्डवसन्तोषकरी परं विरेजे सुयोधनेऽपि रता ।।३।।

वृषकेतुपालिताऽपि प्रद्युम्नप्रीतिकारिणी सेना ।
शरभालिभिरपि दीप्राकेसरिपुत्रप्रियार्जुनस्याभूत् ।।४।।

त्वमेहि चैहि त्वमितीह केचिदायाम्यहं धैर्यमवाप्य तिष्ठ ।
इतीव केचित्पदगा वितेनुरायोधनोपक्रमणं तदानीम् ।।५।।

छित्वा शत्रूंस्तदानीमुभयबलभटारक्तशस्त्रं प्रदर्श्य
स्वीयाढ्यात्केचिदापुर्बहुमतिमितरे वीक्ष्यतामत्र केचित् ।
तोषाद्रोषाद्विलूय प्रबलबलमुषां मस्तकान् द्वेषणानां
क्षिप्त्वा सेनाधिपाग्रे बहुमतिमतुलां जग्मुरित्थं रणोऽभूत् ।।६।।

उभयत्र सैनिकानां जीवितकारुण्यनास्तिकेहानाम् ।
शीर्णमुखं दीर्णशिखं जीर्णसुखं तुमुलमद्वितीयमभूत् ।।७।।

In Public domain. Digitization Muthulakshmi Research Academy

विक्रान्तबाहूद्धृतखेटकव्रजो रेजे शरच्छिद्रविमुद्रितान्तरः।
द्रष्टुं जनान् वीर रमाविनिर्मितो वातायनव्रात इवात्र चित्रितः।।८।।

परागबाणैस्तिमिरेषु तत्र जञ्जन्यमानेषु दृशोंधयत्सु ।
बाहाग्रजाग्रत्करवालतेजस्साहायकाच्चक्रुरमी रणं ते ।।९।।

परस्पराघट्टनया कृपाण्योस्स्फुलिङ्गरेखास्फुरदत्र राज्ञाम् ।
समीकलक्ष्म्यै परिकल्पितेव नीराजनालिर्नितरां ज्वलन्ती ।।१०।।

दशनरहितं कश्चिद्वीरं तदा युधि शात्रवो ।
दशनरहितं कुर्वन्नुर्व्यामराजत मौष्टया ।
अनलसहितं कश्चिद्योधं प्रतिद्विडजिह्मगै
रनलसहितं कुर्वन् स्वर्वासिनीर्मुदमानयत् ।।११।।

सुधन्वा सुधन्वा विधुन्वन् शरौघैः
प्रधन्विव्रजं शार्ङ्गधन्वात्तचेताः ।
रिपून् सुष्ठु चिन्वन् कृपां स्वेषु तन्वन्
स्वपौरान् विधुन्वन् बभौ युद्धरङ्गे ।।१२।।

तत्र तावद्वृषध्वजो रुषो ध्वजेन समिद्धो युद्धप्रबद्धबुद्धिः प्रबुद्धान् सरणश्रद्धान् क्रुद्धान् योद्धॄन् श्राद्धदेवपुरपद्धतिं प्रापिपयिषुरुद्धृतवार्धश्रवसानुज्ञः पिनद्धकवचः प्रसिद्धपरिशुद्धशस्त्रास्त्रसन्नद्धस्साविद्धबलोनिरुद्धरथस्स महारथोऽभ्याययौ ।।

दोष्मानेष वृषध्वजोऽस्य चतुरास्यस्सारथिर्मार्गण
श्श्रीमान्सुश्रुतयो हया धनुरगाकारो ह्यहीनो गुणः।
इत्यब्जद्युमणी रथाधरतलं सद्यस्तनावागतौ
किं नेम्युद्भवविस्फुलिङ्गविलसच्छक्रद्वयच्छद्मना ।।१३।।

In Public domain. Digitization Muthulakshmi Research Academy

तदात्वे।।

कांश्चित्सुधन्वा प्रदरैर्वसुधापान् वनाशनान् ।
कांश्चित्पुनश्चकाराशु वसुधापान् वनाशनान् ।।१४।।

सूतजातसुतश्शौर्यादवीतानहितान् क्रुधा ।
कांश्चिच्चकारापि पुनरवीतानहितान् युधि ।।१५।।

तदात्वे सुधन्वा द्विषं तपं रुषं किरन्तं दृशः पथा निपीयैनं भो वीरमहाकुलीनैः कुलगोत्रविवरणदवीयान्रणो सानुष्ठेय इति कुलं बुभुत्सुस्स्वपूर्ववार्तां धूर्तावतंसार्तिदामेवमकथयत् ।।

यो मन्त्रप्रभुतावशंवदमरुद्यक्षेशरक्षःपति
स्तस्य ब्रह्मविदो व्रतीश्वरमणेर्वंशे मधुच्छन्दसः ।
गाणे यस्य पराक्रमीश्वरशिरःकोटीरकोटीतटे
राज्ञो हंसपताकिकस्य तनयोऽहं मे सुधन्वाभिधा ।।१६।।

वृषध्वजः ।।

यस्यार्घ्याणि समन्त्रकाणि रचितान्यस्त्रन्ति विप्रैस्सदा
तस्यापत्यपदेन दिक्षु विदितः कर्णः पिता यस्य सः ।
सोऽहं नाम वृषध्वजोऽस्म्यसुहृदां हृक्कण्टकप्रक्रम
स्त्वित्युक्त्वा तमताडयन्नृपसुतं दीप्रैः क्षुरप्रैः खरैः ।।१७।।

वाहान् मोहगतान् रथं प्रवितथं केतुञ्च वीतांशुकम्
सूतं पीतभुवं गुणं कणसमञ्चापं विरूपं वरम् ।
तूणं बाणधुतं शरैः खरतरैश्छत्रं विनेत्रं क्रुधा ।
तन्वानोऽस्य तदाट्टहासमकरोद्वीरस्सुधन्वाधिपः ।।१८।।

प्रसभं जवादितरवीरकराग्रात्परिगृह्य चापमिनजन्तु घनं तम् ।
समरे सुधन्वकमथाशुग हत्या भ्रमिणं चकार खमणेर्बत पौत्रः ।।१९।।

In Public domain. Digitization Muthulakshmi Research Academy

ततः क्षणेन लब्धसंज्ञस्सुधन्वा मूर्तीभूतयाम्यप्रतापाद्वैतमतिविधायिनो वीराग्रगण्यानुगुणप्रावीण्यस्य विकटभ्रूवल्लिकादुर्निरीक्षरोषकषायितचक्षुर्युगलस्य वृषध्वजस्य करकौशल्यमितरैर्वीरैस्स्वप्नेऽप्यननुभूतमीषन्मुकुलितततरलनयनेन शिरःकम्पनेन चिरमभिवर्ण्यैकेन खरेण शरेण शरासनं दुरासदं निराकृत्यान्येन तं लक्षीचकार।।

धर्मे नष्टे कर्णसूनुर्भूरिसाहाय्यभागपि।
रथान्नर इवाभ्रश्यद्धर्मे नष्टे पदाच्युतः ।।२०।।

प्रचिकटयिषुरात्मप्रांशुशौण्डीर्यमारा
दचकितमतिरस्त्रैरम्बूजाक्षस्य सूनुः।
रिपुजनभयचिन्ता रत्ननैजप्रभावं
रणमतिनिरणैषीद्राजपुत्रेण सार्थम् ।।२१।।

पुण्डरीकाक्षजातोऽपि भण्डने पाण्डितीं रिपोः।
शिलीमुखानां पततां सपक्षाणां न वेद सः ।।२२।।

तदा स राजन्यसूनुस्स्वीयद्वितीयबाणकल्पितामवस्थां स्वयमप्यनुबुभूषुमिव विवशं प्रद्युम्नमप्रद्युम्नं मन्वानोऽकुतोभयं कृतवर्माणं कृत्तवर्माणं विरचय्य सुवेगमसुवेगं विधाय यौवनाश्वसात्यकिनीलकेतुभिर्युद्धदीक्षाबद्धप्रतिसरैरनेक विधमाजिं विधाय तेषां त्रयाणां दशाममीषु परिकल्प्यास्वमाच दृक्पथावधेरनूह्यमान निजसदृक्ष-प्रतिपक्षवीरस्सन् मदकुञ्जरमञ्जुतरगतिश्चमच्चकार ।।

तत्रान्तरेऽर्जुनः।।

अर्जुनवर्णख्यातिं जनवदने दिङ्मुखेषु चाधित्सुः।
मार्गणगणपरिकलितश्चित्रं प्रत्यर्थिदानमारभत ।।२३।।

In Public domain. Digitization Muthulakshmi Research Academy

तदनन्तरम् ॥

योधान् दुस्साधबाधान् व्रणकिणगणितान् शक्तिगान् सूक्तिमुक्तान्
घोटानाटोपशून्यान् गतिततिचतुरान् कौन्तिकान् क्लान्तकान्तीन् ।
शूरान् भीरावकारान् बलकुलकलितान् यष्टिगान् नष्टचेष्टान्
कुर्वन् दर्वीकराभैर्युधि शरनिकरैर्व्यभ्रमच्छुभ्रवाहः॥२४॥

सुरपरिवृढपुत्रोन्मुक्तपत्रिप्रचारै
रिपुरथिकसमूहोऽपत्रपास्यो बभूव ।
तदनु युवतिसङ्घोऽपत्रपाश्यश्च तस्य
त्रिदशयुवतिवारोऽपत्रपास्योऽथ हर्षात् ॥२५॥

रिक्ते कल्पनगे सुमानि बहुशो व्योम्न्यप्सरोभ्यो मुहु
र्दत्वा जन्यभवान् वरीतुममरान् दम्भोलिधारी हरिः ।
पौलोमीकचलम्बमानसुमनस्स्रग्रक्षणे दक्षिण
श्चक्रे वक्रसहस्रलोचनचयं त्वेकक्रियालोलुपम् ॥२६॥

धनञ्जयस्य तेजोऽस्मिन्नुच्चैरासीद्रणाजिरे ।
स्नेहभाजस्समीपस्थे वातजाते किमद्भुतम् ॥२७॥

तदनु सुधन्वा स्वभाणसन्धाप्रयोगविशेषरहस्यैकतानतां दिदर्शयिषुर्वैजयन्ती-मधिवसन्तं शिलीमुखैर्वलीमुखेश्वरं जातिचापल्यरावमानिनाय्य बलाहकस्यन्दन-नन्दनस्य स्यन्दनमरौत्सीत् ॥

तत्तादृग्दशकण्ठदोर्गतदशेष्वासीसमुत्सारिते
र्नाराचैर्भवतश्श्रमस्य महतो निर्मोककस्याहवे ।
अस्मार्षीदरविन्द बन्धुगिलनोल्लासी समीरात्मभू
रेतद्वीरकठोरमार्गणभवत्पीडाभुजङ्गेशितुः ॥२८॥

In Public domain. Digitization Muthulakshmi Research Academy

तदनु ॥

वीराणां सुरनारीभिः कुट्टिनीकार्यदक्षिणाम् ।
आशुगावलिमावर्षत्पुरुहूः पुरुहूतजः ॥२९॥

क्रोधोत्तरस्सुधन्वा पूर्वैर्बाणैः पुरस्थितस्य तदा ।
पार्थस्य दक्षिणस्थं चित्रं चक्रेऽत्र दक्षिणस्थं हि ॥३०॥

यथायथाऽभूद्धृदयं शराग्रैर्बहिःप्रदेशे युधि रक्तवर्णम् ।
तथातथा सम्प्रति जिष्णुसूनोरन्तस्समासीत्खलु कृष्णवर्णम् ॥३१॥

वसामि यद्यत्र निशातधारैर्भृशं शरैः क्लेशवशे भवेयम् ।
इतीव भीत्यात्तमतिर्हृदोऽस्य द्रुतावतारं स ततान कृष्णः ॥३२॥

इत्यागताय पुरुषाय नमः परस्मै
कृत्वा स सारथिपदे तमिवाब्जनाभम् ।
ध्यैर्यञ्च मानसतले प्रकटीचकार
मौर्वीतटे करपुटं रुषमक्षियुग्मे ॥३३॥

तावद्वृषध्वजोऽर्जुनमालोक्याब्रवीत् ॥

भर्मचेलकरुणोर्मिमालिनो वर्मभृत्प्रकरमर्मभेदिनः।
निर्मलैर्गुणरवैर्मनोहरं कार्मुकं वदति दोर्मदं तव ॥३४॥

तदनु ॥

आहवेऽप्यद्वितीयस्सन् स विवाहोऽर्जुनः पुनः।
तौरङ्गिकान् दिवि भुवि स विवाहान् बताऽऽकरोत् ॥३५॥

तदानीमेनमवेक्ष्य सुधन्वैवमूचे ।

त्रिविक्रमसहायस्सन् किरीटिन् मां न पश्यसि।
एकविक्रमसाहाय्यो दर्शयामि बलं त्वयि ॥३६॥

In Public domain. Digitization Muthulakshmi Research Academy

इत्थं ब्रुवाणमेनं सुधन्वानं न हन्मि यदि त्रिभिर्बाणैर्वाराणस्यां नैचिकीनिशारणजातं वृजिनमेनं भजत्वित्यर्जुनः प्रत्यश्रौषीत् ॥

सुधन्वाप्येवं प्रत्यजानात् ॥

व्यर्थीकरोमि तानेव न यदि स्यान्ममाधुना ।
अरुन्धतीजानिहानिजातः पाप्मा शिलालिपिः ॥३७॥

इत्युक्त्वा स नृपात्मजश्शरवरैरेनं जघानार्जुनम्
तद्रोपच्छदचण्डवातकठिनाघातभ्रमत्सैन्धवः।
पश्चान्नल्वसहस्रमात्रमसरत्तत्स्यन्दनो दुर्धरो
क्षीणद्रोणधरेण चानिलभुवा गोवर्धनोद्धारिणा ॥३८॥

ततः ॥

चिच्छेद पाण्डवशरं खगतस्सुधन्वा
हालाहलेन सुकचाकचि युध्यमानम् ।
कृष्णार्पितव्रजजनावनपूर्वलब्ध
गोवर्धनोद्धरणपुण्यकरम्बितास्यम् ॥३९॥

तदानीम् ॥

विना सुरेन्द्रं सकलास्सुरास्ते मनागवर्षन् कुसुमानि हर्षात् ।
न केवलं पार्थशरो विलक्षो बभूव वीणामुनिवल्लभश्च ॥४०॥

पुनश्च ॥

शरं शरमिवाधाक्षीत्पार्थमुक्तं शराग्निना ।
सुधन्वा कृष्णविन्यस्तविश्वभूदानपुण्यगम् ॥४१॥

इत्थं द्वयोर्बाणयोर्वितथीभवतोस्सतोर्निर्विण्णमनास्सुनासीरसूनुः पुनर्धैर्यावलम्बनसंरम्भनिगुम्भितहृदयस्सन् ॥

In Public domain. Digitization Muthulakshmi Research Academy

युधिष्ठिरक्रोधसहोदरं शरं सुधान्धसां पत्युरथात्मजः क्रुधा ।
दधार वैरिश्रुतिकोटरच्छिदाविधानतीव्रारवचञ्चले गुणे ॥४२॥

वैधात्रयाम्यवैष्णवशोचिष्कं राघवत्वफलपूर्णम् ।
प्रदरेण पार्थमुक्तं प्रदरं प्रदरं चकार नृपसूनुः ॥४३॥

तावत्तदाशुगाग्रखण्डं व्यर्थीभवनलज्जापरिव्याप्ततया निजलोकावभिगन्तृभ्यां स्वायम्भव वैष्णवतेजोभ्यामिवोर्ध्वमारोहद्भ्यां ज्वालाधूमाभ्यां सतटिद्घनायमानरोदसीकुहरं सदुत्प्लुत्य करोटिकामालिकागवेषणपरायत्तचित्ततयाविर्भूतं संवर्तसमयरुद्रमिवाग्रभुवि विग्रहोदग्रं रविग्रहोग्रं सुधन्वानमसुधन्वानमकार्षीत्॥

बहुषु किरीटिषु सत्स्वपि किरीटिनं चैकमेव सुरसङ्घः ।
बहुषु सुधन्वसु सत्स्वपि सुमैरदृश्यं व्यधात्सुधन्वानम् ॥४४॥

तत्रान्तरे ॥

गोविन्दाच्युतनामकीर्तनकरं भृङ्गायमाणं शिरः
पादाब्जे पतितं सुधन्वनृपतेर्गृह्णन् यदूनां प्रभुः।
अभ्रे विष्णुपदाह्वयेऽक्षिपदिदं तत्रामरीसङ्गमे
भाविन्येककलत्रताव्रतहतिव्रीलादिवान्तर्दधौ ॥४५॥

अनन्तरं दुर्भरसगर्भ्यनिधनशोकद्विगुणितनयनारुणिमप्रकटीकृतक्रोधस्सुरथो जयश्रीकरालम्बनकौतुको निरगात् ॥

सुरथस्सुरथः खरदोश्शरतो द्विरदान् दरदान् परदान् विरदान् ।
विमतं शमितं रणगं व्रणगं मुकुटं विकटं व्यकरोत्सुकरम् ॥४६॥

सहसान्तरङ्गकार्यं कुर्वति बाणे विरोधिनामस्य ।
बहिरङ्गकार्यमस्मिन् रिपुशररचितं तदाभवद्विफलम् ॥४७॥

In Public domain. Digitization Muthulakshmi Research Academy

सुरथेऽभिषेणनपतिप्रद्युम्नप्रभृतयोऽनुकामीनाः ।
अतिवेले कूपारे नद्यस्सद्य इव सन्यवर्तन्त ।।४८।।

तदानीम् ।।

कल्पानल्पकठोरभैरवगलग्राह्यभ्यमित्राग्रगो
व्याधे व्याघ्र इवोत्थितोऽत्यविरलक्रोधोऽस्त्रवित्कोविदः।
एत्यारात्सुरथोऽस्य धुर्यजमुखाः स्थातुं न शक्ता इति
श्रीजानिः पुरुहूतनन्दनरथं दूरं व्यकर्षद्बलात् ।।४९।।

निकृत्य सेनां सुरथो विपाठैः त्रियोजनायामपथं विलङ्घ्य ।
ददर्श कृष्णौ रथवर्तिनौ तौ पुरः कशागाण्डिवपञ्चशाखौ ।।५०।।

सुरथोऽर्जुनं प्रति ।

शतकोटिसाधनेन ह्यविपक्षक्षोभकारिणस्सरुषः।
तनयः पाकरिपोस्त्वं किमु वर्ण्यं बाहुवीर्यमित्यवदत् ।।५१।।

मारालध्वजितापनीयकरथो बाणेन पौरन्दरे
रुत्क्षिप्तः परितो रराज नितरां मध्येऽभ्रमाविभ्रमन् ।
स्वीयाहार्यकुलावहेलनपटौ वास्तोष्पतावीर्ष्यया
तत्पुत्रेण युयुत्सुरागत इव स्वर्णक्षमाभृद्वरः ।।५२।।

माहीद्रमस्त्रं मखिसूनुमुक्तं महेन्द्रबाणेन महीशपुत्रः ।
यथाभवेत्खे प्रमना बलारिरन्तर्मनाश्चापि तथा व्यतक्षत् ।।५३।।

तदनन्तरम् ।।

गर्जत्यूर्जितवारुणास्त्रशमितस्वाराट्कुमारोज्झित
ज्वालोद्वेलितपावकास्त्रविसरद्धूम्याभिसन्दानितः।
मध्ये व्योम स पार्थिवात्मजरथो हैमो दरीदृश्यत
प्रावृण्मेघघटातटीस्फुटनटत्पद्मादिभूबिम्बवत् ।।५४।।

In Public domain. Digitization Muthulakshmi Research Academy

विद्धस्सन् सुरथस्य तस्य विशिखैस्तैः पौरुहूते रथ
स्स्वाधश्चक्रपरिभ्रमस्य सुचिरं चिक्रंसयेव भ्रमन् ।
मग्नोऽभूदणिकप्रमाणमसृजा क्लिन्ने क्षमामण्डले
कज्ञातेक्षणगर्भनिर्भरजगद्धारप्रभारादिव ।।५५।।

तदनु तटित्वत्पटलात्प्रभामण्डलमण्डितमशनिमिव भीमधूमस्तोमभूम्नो व्योम्नस्सीम्नो भुवमवप्लुत्य चामीकररथकलितमहमिवाधः कृतचक्रो विजयसहितश्चापि मन्नामैकदेशधार्ययमिति चतुर्भुजाञ्जनेयाभ्यामप्यनुद्धाटितं तद्रथमुद्धृत्यास्फाल्य चूर्णीकरोमीति बिभीषिकामुत्पादयन्तं सुरथं स रथी शरधारया मूर्च्छालमकरोत्।।

लब्धोपलब्धिं सुरथमीयिवांसं रथं नरः ।
स्वकायमिव चक्रे तं पादे कण्टकशोभितम् ।।५६।।

सुरथस्त्वरितैर्नरस्य बाणैर्विरथोऽभूत्स रथस्सहस्रकृत्वः।
क्षणमात्रमिषुप्रयोगवेगैः पणितोयञ्च सतैरथाधिरोहैः ।।५७।।

तदानीमुभयोर्बलयोरनिमिषपतिदशशतनयनैरप्यनिश्चीयमानयशोकीर्त्यधिष्ठानभूतयोधोऽभूदभूतपूर्वो रणः ।।

रक्ताप्सरस्सु ये वीरा मज्जन्ति स्म क्षणं रणे ।
रक्ताप्सरस्सु त्रिदिवे ते ममज्जुस्सदा मुदा ।।५८।।

दृशो रिपूणामसिना पराशिना भृशं रुषा मीलयति प्रभोस्सुते ।
रणक्षमायां परिधावतां भयम् नृणां पदोश्शृङ्खलतां तदा दधौ ।।५९।।

बाणोऽर्धचन्द्रो विजयप्रयुक्तो बाहौ महीजानिभुवोऽपसव्ये ।
स्वीयाभिधानस्थितपूर्वभाग वाच्यं तदा स्थापयदाजिरङ्गे ।।६०।।

गृह्णन् वामकरेण तत्र स गदां भिन्दन् पृथाभूहयान्
वीराणामयुतं तदेव गुणितं द्वाभ्यां हयानां क्रुधा ।
गन्धेभान् द्विसहस्रमुद्धृतकरान् रथ्यास्तथा तावती
श्चक्रे शत्रुकरासिकम्पनकलाविद्यागुरुं क्ष्वेलितम् ।।६१।।

In Public domain. Digitization Muthulakshmi Research Academy

जन्याशनाद्धर्षमयात्तदानीम् भिन्ने कुशैर्भास्वति मध्यसूत्रे ।
यज्ञोपवीतं सहसा निवीतं सुज्ञो दधे निर्जरसां मुनीन्द्रः ।।६२।।

तदनु साक्रन्दनिरास्कन्दने खरेण शरेण वीरनिशारणविशारदस्य सुरथस्य वामं भुजमपि दक्षिणेन सहचरीकृत्य मूर्धानं कबन्धेन भेदवादिनं चकार ।।

सुरथस्य शिरोघाताद्वक्षस्थल्यां बिडौजसः।
तनूभुवोऽसुभिस्तावत्स्वस्थानं ममृगे क्षणम् ।।६३।।

भुवनं जनयत्यब्जं नह्यब्दं सौतिभुवनमस्य हरेः।
पादाब्जं सुषुवे तत् द्रष्टुमिवाङ्घ्रौ पपात सुरथास्यम् ।।६४।।

यत्पक्षोद्भववायुनोद्धततराश्शैलास्सपक्षायिता
अद्रीणामिव रक्षणाय जलधिश्चोर्ध्वं तदैवोद्गतः।
स्वर्धुनृप्यथ आजगाम जलधेस्सन्दर्शनायेव खात्
सोऽयं पक्षिविराड्विधुस्मरणतो द्रागाययौ सन्निधिम् ।।६५।।

नयनगतकृष्णरूपं प्रोन्मीलाद्गच्छतीति लोभीव ।
स निमीलितनेत्राभ्यां युक्तं तन्मस्तकं ददौ तस्मै ।।६६।।

हरिराह प्रयागेऽमुं प्रयागे क्षिप मस्तकम् ।
सोऽपि तत्करवाणीति करवाणीयुतो ययौ ।।६७।।

तदानीं सायं समयनिक्षिप्तस्ववसुविसरचिक्रंसया निटालतटे स्फुटीभवतः कृपीटयोनेस्सविधमध्यासीनेन नूत्नहेलिनेव रत्नमौलिना तत्रत्यसुधांशुकिरण-पनीपतत्सुधासम्पर्कात्प्रज्वलता फालान्तःपथोर्ध्वभागाधिरूढेन नयनकृशानु शिखापुञ्जेनेव रज्यद्वार्देन कपर्देन शिरोङ्गणविहरमाणतरङ्गिणीतितीर्षया बाल्यचापल्येनेभवदनकुमाराभ्यां रोधस्सीम्नि निहितयोडुपरेखयेवोडुपरेखया निटालतटीलुठद्वैश्वानरधूमचक्रैरिव वक्त्रैरलकजालकैर्विधुन्तुदजिगीषया देवोत्तंसे

In Public domain. Digitization Muthulakshmi Research Academy

न्यस्तभारेण सरित्तीरमुपेयुषा तरङ्गरवमन्त्रपठनानुष्ठात्रा त एव कृशीभूतेन शीतद्योतेन निक्षिप्तायाः अलिकलोचनदहनदीपिकाया अधोविराजमानाभ्यां तमःखण्डाभ्यामिव भ्रूदण्डाभ्यां नयनारुणधवलकिरणावभिवृताभ्यां परिवेषाभ्यामिव भस्मवलयाभ्यां, पेपीयमानायाः कण्ठद्वयसमन्तर्लोकवसत्यनवकाशतया पश्चान्नि-वर्तमानाया देव्यधराधरसुधायाः प्रकाशेनेव मन्दहासेन गम्भीरभाषोत्पत्ति स्थलपरीचिक्षिषया गलान्तःप्रविष्टेन कालाभ्रेणेव कोमलेन कण्ठस्थितश्यामलेन शैलादिधाटीशिरोनरीनर्तिन्या दुर्धर्षस्वर्धुन्या द्विधा सनीस्रसता नाभीसरोवगाहिना सारेणेव भुजगहारेण नयनसम्भवनव्यर्थीभूतक्षत्रियत्वं मन्यमानस्य भुजान्तरादुद्ग विष्यतः कैरविणीशात्रवस्य पुरः प्ररोहता शोचिषेव केयूररोचिषा शिवावलोकन जातवाक्प्रभूतात्कन्धरानैल्यच्छलपुञ्जीभूताच्छृङ्गाररसादन्तरधस्तात् स्रंसमानया बहिरभिव्यक्तया रसपाल्येव रोमाल्या पिचण्डपरिमण्डितानन्तब्रह्माण्डभाण्डान्तर्ल-सदशेषभुवनपक्षद्वाररूपेण नाभिकूपेन कामहरणभीतजङ्घीभूतमकरसन्दर्शनाय सामानाधिकरण्यसौहार्देन कृतसान्निध्याभ्यां कच्छपाभ्यामिव श्रितशरणाभ्यां चरणाभ्यां पदपङ्कजसञ्चलनादङ्गुलिसंवर्तिको परिसङ्गिभिर्मकरन्द बिन्दुनिकरैरिव नखरैः प्रकाशमानस्संमर्दानवकाशतयारभटीं कुर्वतस्सर्वतो बृन्दारकमुनि बृन्दगरुडगन्धर्वकिन्नरकिंपुरुषप्रभृतीन् कृपासङ्गिनापाङ्गेनाभिवृष्यमाणाभयो हर्ष माणान् स्वजनान् तन्वानस्सुजनान्मन्वानो जनसमक्षं स्वकान्तोरुवसनलज्जयेव वन्दिमागधपापठ्यमानदक्षादिशिक्षणापदानविचक्षणशतरुद्रीयबिरुदनिशमन जातपुलकाघातात्सरन्तीं सर्वमङ्गलां वामकरेणोपगूहमानः शङ्करो लोकशङ्करोऽम्बर पथात्समाययौ ॥

सुपर्णमपर्णाजानिरालोक्य स पूर्णतेजाः कृपार्णोधिस्तच्छिरोभरणाय हरणाय भृङ्गिरिटिं प्राहिणोत् ॥

In Public domain. Digitization Muthulakshmi Research Academy

सोऽपि तत्पक्षवातूलेन यवसायमानो बभूव ॥

आज्ञप्ते नन्दिकेशे मनसिजरिपुणा हुङ्कृतिं तां दधाने
रोमन्थात्फेनलेशैस्सरभसपतितैस्तारकैस्तैरिवाभ्रात् ।
त्रुट्यद् ब्रह्माण्डरेखास्रुतसलिलकणैस्तैरिवाङ्गेऽखिलेऽभू
च्छ्वेतो रक्तश्च नीलो वदनमिव गरुद्वन्नखालीव तार्क्ष्यः॥६८॥

भीतस्सन्परिधाव्य पत्ररथराट् क्षिप्रं सुपर्णार्थतां
ख्यातीकर्तुमिवाक्षिपद्धरशिरःक्षेत्रस्य वाव्यामधः।
शैलादिस्त्वनुधाव्य शीर्षममलं गृह्णन् ददौ शम्भवे
सोऽयं तत्तरलीचकार नगराट्कन्यायितार्थाङ्गकः ॥६९॥

अलीकहृत्कप्रवृत्तिं तां श्रुण्वन् तार्क्ष्यमुखात्तदा ।
नालीकहृङ्गुरच्छेदी विकुर्वाणोऽभवद्धत ॥७०॥

ततः। तस्मिन् मधुमथनेऽभिगत्य रणसम्मुखीनं स्वपादयोः प्रणिपतन्तं सुतस्येव ममापि शिरः कृतार्थीकुर्विति सूचयन्तमिव शिरोधृतसंहतलं सिंहसंहननं मरालकेतुमुपगूह्य तं च पार्थं च मैत्रीरूपैकप्लवाधिरोहिणौ विरचय्य तत्पुरे सुखमनुभूय पञ्चषदिनानि द्वारवतीमुपेयुषि सति ॥

इति श्रीमद्राजाधिराज राजा बलवन्तबहिरीरवाबजङ्ग मुतहवर्
दौलाबबरुल् मुलक् बहादरकोसलवेङ्कटक्षमारमण
करोद्धृतान्दोलिकापार्श्वभागेन चत्वारिंशदवधानसमयैतत्प्रभुग्रथितवज्रमौक्तिक
स्थगितबिरुदघण्टामणिशोभितकरेणान्ध्रप्राकृतसंस्कृतकर्णाटादिभाषाकवित्व
महत्वशोभितनागेश्वरसुधीन्द्रतनुजेन भास्करविपश्चिदनुजेन वेङ्कटशास्त्रिणा
कविसार्वभौमेन विरचिते युधिष्ठिराश्वमेधचम्पूप्रबन्धे पञ्चमस्तबकः॥

In Public domain. Digitization Muthulakshmi Research Academy

श्रीरस्तु

श्रीकृष्णपरमगुरुभ्यो नमः

श्री युधिष्ठिराश्वमेधचम्पूप्रबन्धे षष्ठस्तबकः

कपिध्वजेन युक्तोऽपि मरालध्वजसंयुतः।
नीलध्वजाश्रितः पार्थोऽगच्छदच्छेन वर्त्मना ॥१॥

अपकीर्तिशोभितमरं परतापकृतं परागसामान्यम् ।
परभृतपञ्चमशब्दं वेत्ति जनो दुष्प्रभुं यथा ग्रीष्मम् ॥२॥

वसन्ताख्याद्गुरोर्विद्यामुष्णतां प्राप्य भास्करः।
विस्तारयति पाण्डित्यं निदाघनृपसंश्रयात् ॥३॥

दिने दिने ग्रीष्मदिनान्यवापुर्दैर्घ्यं विवस्वत्तुरगः कृशाङ्गः।
मनोज्ञदूर्वापरिचर्वणस्य हानेर्यतो गच्छति मन्दमन्दम् ॥४॥

ग्रीष्मातपाब्धौ सञ्जाता भङ्गा इव मरीचिकाः।
चक्रवातास्तदावर्तगर्ता इव चकासिरे ॥५॥

स्वान्तर्गुम्भितसर्वतोमुखह्रदोऽर्यम्णः पुनर्मण्डला
दूर्ध्वं तस्य जिहीर्षयोद्धृततरा विश्वम्भराया भुजाः।
क्रोधोत्कण्ठकिता इव स्फुटचलत्तृण्याकुलैरावृताः
प्राजृम्भन्त रजोव्रजैः परिवृतास्ते चक्रवातोच्चयाः ॥६॥

जित्वा हिमानीं तरणेर्मयूखैर्विद्वेषिणीं तच्छिशवो बलेन ।
नीता इवाभ्रे स्म चलन्ति वातैर्हतानि तूलान्यथ शाल्मलीनाम् ॥७॥

चकासिरेऽङ्गे सर्वेषां प्राणिनां घर्मबिन्दवः ।
आतपस्फीततैक्ष्ण्येन सञ्जाताः स्फोटका इव ॥८॥

In Public domain. Digitization Muthulakshmi Research Academy

सदानानामपि मधुपाश्रितानां स्तम्बेरमाणां सौकर्यसहितानामपि सदन्त कार्यं कुर्वतां वराहणां धर्मवाहानामपि पङ्काश्रितानां कासराणाञ्च माभूत्सम्पर्क इतीव शुष्कीबभूवुस्सर्वे वेशन्ताः ॥

श्रूयन्ते किल वह्निमन्त इति हि श्रुत्या नगा वह्निमा
नादित्यस्त्विति धर्मसाम्यजरुषे वा तापयत्येष तान् ।
तेनासासहयः प्रतापसमितेरुन्निश्वसन्तीव
तेऽश्वभ्राग्रभ्रमिकोष्णवातविलसत्फूत्काररावच्छलात् ॥९॥

अतनुखगतापमतुलं द्वीपिद्विपशशमृगा असोढारः।
रक्ष गिरीश तवास्मानुदरं प्रविशन्त इव गुहां विविशुः ॥१०॥

स्त्रैणोरोजदिनप्रवर्धनमहाशैतल्यभारात्परं
भीतोऽहंत्विति तत्कुचप्रतिभटत्कुम्भोदरं प्राविशन् ।
आकृष्टोऽतिचिरस्य यौवतकरैरायाति कूपान्तरा
त्पश्चाद्यातृनिजैकदेशकलनाद्वित्रास्यबोधः कृशः॥११॥

योषामुक्तघटो गतौ लघुतरः कूपान्तरादागतौ
स्थायं स्थायमथातिभीतियुगिवानम्रास्य आगच्छति ।
युक्तं चैतदुरोभुवोरभिमुखे गुर्वोर्मतोद्धारिणो
स्सद्वृत्तस्य गुणग्रहस्य सरसस्यान्तेव सच्छोभिनः ॥१२॥

गुरुशुककवये कलमानिरतं प्रागन्नदानतो वृद्धम् ।
पुण्यमिव कणिशगर्भे पयोगता भान्त्यहर्निशं पूर्णम् ॥१३॥

आकारानभितस्समीक्ष्य सलिले स्वीयानधश्शालयो
मत्वात्मप्रसवान् समीरणतिरोधूतैर्नतैर्मस्तकैः ।
मामायात बहिर्मुहुश्शुकमुखोद्वेगोच्छ्रयो वो भवे
दित्यह्नाय विबोधयन्त इव तान् केदारभूमौ बभुः ॥१४॥

In Public domain. Digitization Muthulakshmi Research Academy

तादृश्युष्णोपगमे सूचीमुखानवकाशतापातिशये ॥

कान्तारवनशिवङ्करकान्तारकुलं विलङ्घ्य मखतुरगः।
कान्ताररागमेदुरकान्तारमणीयकाश्यपीं भेजे ॥१५॥

तत्र च ॥

कामिनीहयमवेक्ष्य च काचित्सोमनिर्मलतनुं परिगृह्य ।
स्वामिनीमनयदेणदृशां सा सामि नीरदकचाभवदुत्का ॥१६॥

सा सदा प्रमीलापि सव्यसाचिदर्शनायाप्रमीलासतीत्थमूचे ॥

दत्वा तनुरणे क्लेशं पार्थायाम्बकभावतः।
ततोतनुरणे मोदं करोम्यम्बकभावतः॥१७॥

तदनन्तरमसौ कामिनी स्वामिनी समालम्भपूर्वकं विरचितसुवासित जलावगाहतया विरजीकृताङ्गी दुकूलमतीतदृक्पाटवतन्तुसन्तानमाबध्य निजावयवसुषमाधमर्णीभूतैः पुनः ऋणनिर्वापणासम्मतैरत एव शिरस्स्थापि तेन प्रस्तरकुलेनेव मणिगणेन विराजितैर्महारजितभूषणैः कम्रतरसकलापघनास्वरूप-मनन्यगोचरीकर्तुं सूक्ष्मकज्जलसायुज्येन पक्ष्माग्रमात्रोपगूहनपरेण मन्दाक्षेण किञ्चिदवकुञ्चितनयनपालिकानिश्वासवातबहिरुन्नीतेन विश्वकेतुसमेधितरोहिताश्वो-त्पतद्भस्मसङ्काशेन हृन्मण्डलमण्डितपुण्डरीकशराङ्कसङ्कलितकुटुम्बिनीकुच-कुम्भोंऽभितमसृणघुसृणक्षोदेनेव दरविवृतरदच्छदान्तरालनिबिरीसमन्दहास-सन्दानितेन वीटिकारसेन हृदयङ्गमाधरपल्लवाभ्रूदण्डेन तुलाग्रहयालुकोदण्डं प्रतिघेनावनम्य दामबन्धेनार्तिं प्रकटीकृत्य पुरुषवशीकरणार्थमिषूणां साहाय्याय कन्दर्पसमर्पितैः स्वकाण्डैरिव धम्मिल्लाद्गलद्भिर्मल्लिकामतल्लिकाहल्लकतल्लजकुलैः पूरिते निषङ्गेऽनुषङ्गिणो जिह्मगान् रंहसा समाकृष्य कटाक्षनीकाशताजिगमिषयेव नेदिष्ठान् तानसूययेव दूरं निष्कासयन्ती सुमधन्वमूलबलेनेवासङ्ख्येयेन यौवतेन परिवृता रणभुवमेत्य स्वाभिप्रायानभिमुखमर्जुनमुद्वीक्ष्य दृष्टादृष्टं नयनगतमदन तापारुणिमानं प्रवर्धयतामर्षेण प्रक्ष्वेडनैस्ताडयामास ॥

In Public domain. Digitization Muthulakshmi Research Academy

तावदर्जुनो बभाषे ।।

सङ्गरोरतिपतेस्त्वया नृणां सङ्गरोपमितिरेव नानृतम्।
सङ्गरो भवति वा तथा न चेत्सङ्गरोग उदितो भवेद्ध्रुशम् ।।१८।।

क्व चाबला यूयमुधूढलज्जाः क्व युद्धशौण्डाः कुरुसार्वभौमाः।
अहो रणोर्व्यामभिषेणसं वस्स्वकर्तृकं वा स्मरकर्तृकं वा ।।१९।।

पुंसां स्त्रीभिस्समं घोरं समासीत्साम्परायिकम् ।
पूर्वेऽभवंस्तदायुक्तं सान्ताश्शास्त्रबलाद्द्विधा ।।२०।।

कुरुवरस्य बले किरति क्षुरान् न हि करैर्दधुरप्सरसःस्त्रंजम् ।
प्रतिबले किरतीषु परम्परां सरभसं प्रमदेन समाददुः ।।२१।।

अच्छोन्मौक्तिकगुच्छविच्छुरितसन्माणिक्यमौलिच्छटा
श्शीर्षेभ्यस्स्म पतन्ति यौवतशराघाताद्भटानामधः।
युद्धं स्त्रीभिरधर्मरूपमजयश्चेन्मानहानिर्भवे
दित्येतानिव कीर्तिविक्रमचयाव्रीलात्त्यजन्तो रणे ।।२२।।

तदा तासामुपर्यनेकास्त्रेषु पार्थस्य व्यर्थीभवत्सु ।।

संमोहनास्त्रन्ति दृशो हि यासां तास्वैन्द्रिणा विप्रवरस्तनीषु ।
मुक्तं तदस्त्रं चरणप्रभूतं चतुर्थवर्णार्थमवाप युक्तम् ।।२३।।

तदानीम् ।।

अनङ्गकेल्या परितर्पयाङ्गनामनङ्गवाणी समभूदिति स्फुटम् ।
न चेदिरास्यन्दनपद्मनन्दनौ न चेदिराजारिरपि ह्यलङ्क्लौ ।।२४।।

तदनु सत्वरमम्बरो दित्वरीङ्गिरमाकर्ण्य रणचत्वरे हित्वा जित्वरत्वं युधि विदुषीं तां पाणौकृत्य नायं समयस्तवोचितः प्रेमपूरणाय व्रज गजपुरीम् प्रतीत्यर्जुनस्समाचष्ट ।।

In Public domain. Digitization Muthulakshmi Research Academy

पुरा माया विष्णोरमरवरजाताय समदा
त्सुधां मोहिन्याकृत्यनुसरणतो जेतुमसुरान् ।
प्रमीला रूपाद्वाव्यसुरविजयायात्मगसुधां
ददौ माया कन्तोरमरवरजाताय सपदि ।।२५।।

गृह्णन् मेध्यतुरङ्गमङ्गगनिभं गोत्रारिपुत्रस्तदा
नीचा नीचतनूननेकरुचिभिः प्रोतानभीतान्मृगान् ।
द्व्यास्यत्र्यास्यचतुर्मुखान्नरवरान्पञ्चाननान्विस्मितः
पश्यन् भीषणनामकासुरविभोर्देशं विवेशाद्भुतम् ।।२६।।

मेधोहोताह्वयेनामिषभुगधिपतेर्ब्रह्मरक्षः पुरोधाः
पुष्पाणां मार्गणार्थं विपिनमुपगतो ग्रेवणं व्यापतंतम् ।
आजानेयं कुरुक्ष्माधिपपुषितमुदीक्ष्याश्वमेधीयमारात्
क्षिप्रं गत्वाथ रक्षस्सभमधिवसते भीषणायेदमूचे ।।२७।।

त्रिकोटिरात्रिञ्चरसेनशोभितो बकासुरेन्द्रात्मभवोऽथ निर्ययौ ।
चिकीर्षुरायोधनमासुरैस्समं वृकोदरस्यावरजोऽप्यथाययौ ।।२८।।

तत्रान्तरे वृद्धनक्तञ्चरी रयमेव बलमथनपारस्त्रैणेयसुतस्यार्जुनस्य स्यन्दनोपरि दरीदृश्यमानः केसरिजायासूनुः पापिष्ठः क्रव्यादकुलकालरात्रिर्दशास्य पुरधूमकेतुर्न श्रोतव्यमस्य नामेति कर्णौ पिधाय तूर्णमुद्धावन्तीः काश्चित् पुरास्य लाङ्गूलज्वालाजालैरुद्वेल्लितगात्री सत्यर्धासुं मत्पतिं विलोक्यास्य पितैकोऽन्यः पतिर्भवेज्जीवधारणमेव परमश्रेय इति विज्ञाय यत्नेन निर्गताहमभवमद्यापि कचा-नाङ्कुरन्तीति शिरो दर्शयन्तीः काश्चित् मम कन्दर्पकण्डूतिं नाग्निरपनयति यमोऽप्यतः स्फुलिङ्गेषु वृथा तनुत्यागो न करणीय इति नखम्पचायां गृहभुवि निद्राणान् मत्पतिं तत्सुतांश्चास्तीर्य तदुपरि पादं दधती गुप्तपतितनयान् कक्षे निधायोत्प्लुत्यागतास्मीत्याक्रोशन्तीः काश्चित्पतिसमक्षमुपपतिः पश्यत्विति हेति

In Public domain. Digitization Muthulakshmi Research Academy

चुम्बितमन्तरीयमुत्सृज्य नग्ना सती तावदत्यन्तकोपनं मन्त्रपतिं प्रेमपतिसाहाय्येनाग्नौ निपात्यागच्छमिति भाषमाणाः काश्चित् भयात्पृथगाकृष्य ताभिस्सह नरसेनामुपेत्य ममायमन्नं ममायं पायसं मम चोष्यमयं मम लेह्यमयमिति नरान् खादन्तीनां तासामासुरीणां मध्ये सखि तव तन्मनुष्यरूपं भक्ष्यं मा भक्षय कुक्षिपीडा भवेदेतद्रूपाज्यं गृहाणेत्येकं नरमर्पयन्तीं लम्बोदरीं मायाविनीं सखि तन्नरमयस्य दध्योदनस्यैतन्नरमयं लिकुचोपदंशनं गृहाणेत्यन्यं मनुष्यमर्पयन्तीं चञ्चूर्यमाणां योजनस्तनीमुद्वीक्ष्य दशनघर्षणेन सह हसतः पार्थस्य भ्रूविलासमनुसृत्य किञ्चिदास्फालितवालधिरुद्धृतश्रवणस्समीरणनन्दनो रथादवप्लुत्य शिक्षितुं राक्षसीचक्रमुपचक्रमे ।।

पत्युर्वनीचरकुलस्य कठोरमुष्टे
रत्यन्त घट्टनभयाद्धृदि दानवीनाम् ।
प्राणानिलस्सपदि वक्तुमिवात्मपीडा
श्रेणी मुदा न मरुतो निकटं समाप ।।२९।।

अचेतनस्सन्नपि मामकाह्वयो बभूव लोकेऽन्तक एव सर्वदा ।
अहं सचैतन्य इतीव रक्षसां सदर्पकोऽपि स्वयमन्तकोऽभवत् ।।३०।।

तदानीं सुग्रीवाञ्चितोऽप्याजिजातप्रबलोऽप्यसीताभिरामस्सुमित्रात्मजोऽपीन्द्रजिद्बलहार्यप्यलङ्कासुरहर्ता सदाभरतोऽपि चरणत्राणभजनकौतूहल्यप्यगणितमाण्डवीतप्रतीकाशश्शत्रुघ्नोऽपि श्रुतकीर्तिकामुकोऽप्यरघुकुलसञ्जात एतादृशः पाण्डुसूनुराहवदोहलीसन्नासामास ।।

सुरहितमिन्द्रजमसुरास्सुरहितमवनौ च कर्तुमुद्युक्ताः ।
असुरहितान् रजनिचरानसुरहितानेव फल्गुनश्चक्रे ।।३१।।

शरादूरपाताशुसन्धानमुष्टिष्वलं रामसौमित्रिकर्णा अमीषाम् ।
गुणास्सन्ति यस्मान्नरः कौरवेभस्सदानोर्मिलाभासमानप्रहस्तः ।।३२।।

In Public domain. Digitization Muthulakshmi Research Academy

प्रद्युम्नकेतनस्थं मत्स्यं विच्छिद्य वाहिनी दृष्टम् ।
विशिखत्रोट्या बकशिशुरुपरि जगामार्जुनस्य युक्तमिदम् ।।३३।।

कलहायितुराकारमाशरस्याधिकं स्वतः।
प्रेक्ष्याक्षन्तेव पार्थस्य शरश्चिच्छेद तं युधि ।।३४।।

युध्यमानबलपौरुषशाली युध्यमान इषुभिस्सुरवैरी ।
कौरवेण सहसा विनिकृत्तः कौरवेण सह सन्निपपात ।।३५।।

एकं बकं परिविलूय स भीमसेनः
पूर्वं पुपोष कुतुकाद्धरमेकचक्रम् ।
छित्वार्जुनस्तु बकजातमनेकचक्र
चक्राण्यपालयदितीह न किं विचित्रम् ।।३६।।

अथ विश्वेषु वैमानिकवैमात्रेयेषु स्वाराजराजधान्यामनभिलाषुकेष्वपि स्वाराजराजधानीं गतेषु कौन्तेयकनीयसि यातुधानपुटभेदने ये ये धनदन्ति-वैभवैर्धनदन्तितांस्तान् डमरेण दरिद्राणान् विरचय्य स्वरोचितं द्रविणं शकटक्र-मेलकानेकपविनीताश्वेषु सम्पूर्य प्रतिवासरमाश्वीनमात्रमग्रे गच्छति सति ।।

यत्रासूर्यम्पश्या भवेत्प्रजा शश्वदपि च शीतालुः।
मेघङ्करो दिवि शनैः ऋतिङ्करश्चर्तुराविरासीत्सः ।।३७।।

नाविकातरदाताऽसौ पैकवाक्स्तम्भनौषधम् ।
आविर्बभूव वर्षर्तुर्हंसोच्चाटनमन्त्रवित् ।।३८।।

हरिदश्वकरोत्तप्ताः प्रत्यहं स्तनयित्नवः।
जलसङ्गमनेनेव बभूवुरसिताः परम् ।।३९।।

घनः कृष्णो बभूवेति मत्वा धारा तदात्मनः।
विलोमवर्णवाच्यत्वमालोच्येव तमा ययौ ।।४०।।

In Public domain. Digitization Muthulakshmi Research Academy

गोपैर्नाकधुनीतटे सुरगवीस्सञ्चारयद्भिस्तृणम्
निक्षिप्ताञ्जलपूरिताद्वियदगे सच्चर्मभस्त्राव्रजात् ।
मन्दं मन्दमधस्स्खलन्त्य इव सन्दीप्रा हिमाविप्रुषः
पाथोभृच्छकलान्तरात् क्षितितले पेतुः पयोबिन्दवः ॥४१॥

अर्णववनपानमिलल्लवणकणान् वारिभिस्समं मुदिराः।
मुञ्चन्ति करकनाम्नो नो चेत्ते तत्क्षणं द्रवन्ति कथम् ॥४२॥

चित्रं मोदयति घनो धनुर्धरो विषधरोऽपि वार्याप्तः।
धूमभवो जिष्णुहयः किटिमण्डूकगजवनलुलायकुलम् ॥४३॥

अग्नेराप इति श्रुतिं श्रितवतीं वार्तां सहार्थां दृशाम्
कर्तुं वारिनिधिं विहाय सहसा व्योमप्रदेशं गताः।
धूमस्तोमविलोलबाडबशिखारेखा इव क्ष्मातले
वर्षन्त्यः परितोऽम्बुदान्तरलुठच्छम्पालयो रेजिरे ॥४४॥

शम्भोर्निषङ्गजलधेश्शरवारमब्द
स्साक्षादचूचुरदतःकुपितेन तेन ।
उन्मीलितेऽग्निनयने लगदाश्रयाश
ज्वालैरिवाधिजलदं चपलाभिरूषे ॥४५॥

तस्यां प्रावृषि नित्यशैत्यभरतो निद्रान्तरायं भजन्
कुर्याच्छ्रीदयितो मुहुर्नयनयोरामीलनोन्मीलने ।
तस्मादेव तदीयलोचनपयोजेशाब्जिनीशात्रवौ
वारं वारमदृष्टदृष्टवपुषौ स्यातामिति ज्ञायते ॥४६॥

In Public domain. Digitization Muthulakshmi Research Academy

दावाग्न्युद्भवधूमकोमलचलद्रेखालतावार्षिका
सारोपघ्नकुलं सलीलमनुसृत्याम्भोदशुम्भच्छदान् ।
प्राप्यारुह्य नभस्स्थलीकपटभाक्सत्कायमानं फल
न्त्येतस्माद्ध्रुवमापतन्ति हि फलान्यत्रेन्द्रगोपच्छलात् ।।४७।।

सूर्येन्द्वोः पथि लग्नवारिदघनग्राव्णामधस्सातूस्थले
कालेनोपलभेदिनाद्य मनुजेन क्षिप्तशम्पाशुचेः।
भारेण प्लुषितोद्दलत्तदुपलश्रेणीभवो दुर्भरो
ध्वानस्त्यान इवोदजृम्भततरां पर्जन्य गर्जोत्करः ।।४८।।

घनेष्वपि स्वाभिमुखेषु सत्स्वयं निरुत्तरस्सन्नथ पद्मिनीपतिः।
भवन्ननालोकयुतो वसत्यतो दिने दिने श्रीः क्रमशोऽस्य नश्यति ।।४९।।

व्योमाश्मन्तस्थिताम्भोदभ्राष्ट्रात्तप्तात्तटिच्छुचेः।
लाजावाकरकाः पेतुः गर्जापटपटारवाः ।।५०।।

वर्षपादशिफाक्रान्ताद्वियन्यग्रोधपादपात्।
न्यपतन् तत्फलानीव शक्रगोपक्रिमिव्रजाः।।५१।।

यादोराशिकबन्धचूषणसमायातात्युदग्रभ्रम
द्दीव्यद्दर्दुरदुर्धरारव इवाम्भोदे समासीत्स्वनः।
तत्कालागततत्पिचण्डकुहरस्फारालगर्दच्छटा
जिह्वासंहतिवच्चलाचलाकनत्सौदामिनीसन्ततिः।।५२।।

पञ्चास्त्राणि पुरातनान्यनिशितान्यालोच्य तानि त्यजन्
नूत्नोत्तेजितकैतकक्रकचकैश्छिन्द्याद्यदि श्रीसुतः ।
तादृक्षं क्षतमप्रसह्यमपि चासाध्यं घनैस्सीवनै
रित्यामत्यभयात्पुमांस इह नो गच्छन्ति देशान्तरम् ।।५३।।

In Public domain. Digitization Muthulakshmi Research Academy

त्रिलोचनत्यागभवापकीर्तिं वहन्ति पुष्पाणि सुकेतकीनाम् ।
तन्मूर्तिवर्षोदकसङ्गमेनत यजन्ति निर्गच्छदलिच्छलात्ताम् ॥५४॥

धाराधरानीतपयः प्रवाहात् सूरो भवेत्सन् स्तिमितः प्रशान्तः।
इतीव भीत्याष्टविलोचनोऽस्य ततान वप्रं परिवेषदम्भात् ॥५५॥

इति श्रीमद्भूमण्डलसरः पुण्डरीकायमानसुरपुरपरिवृढ श्रीमद्राजाधिराज कोसल वेङ्कटक्षमारमण करोद्धृतान्दोलिकापार्श्वभागेन चत्वारिंशदवधानसमयैतत्प्रभुग्रथितवज्रमौक्तिकस्थगितबिरुद घण्टामणिशोभितकरेणान्ध्रप्राकृतसंस्कृतकर्णाटादिभाषाकवित्वमहत्वशोभित नागेश्वरसुधीन्द्रतनुजेन भास्करविपश्चिदनुजेन वेङ्कटशास्त्रिणा कविसार्वभौमेन विरचिते युधिष्ठिराश्वमेधचम्पूप्रबन्धे षष्ठस्तबकः॥

In Public domain. Digitization Muthulakshmi Research Academy

श्रीरस्तु

श्रीपार्थसारथये नमः

श्री युधिष्ठिराश्वमेधचम्पूप्रबन्धे सप्तमस्तबकः

मणिपुरस्य निकर्षणमञ्जसा मघवसूनुरभूत् समुपेयिवान्।
स चपलैरिव केतुनिपातितैर्जलधरैस्सह दन्तिभिरुद्रदैः ।।१।।

कस्येदं पुरमस्त्यसाध्यमरिभिः को वाऽस्य राजा किय
त्तस्यानीकमितीन्द्रभूः प्रमुदितः पप्रच्छ हंसध्वजम् ।
सोऽप्यूचेऽत्र हि बभ्रुवाहन इति ख्यातः पतिर्दोष्मतां
सैन्यं त्वर्बुदकोटिगण्यमरिरित्यस्मात्स को जीवति ।।२।।

मया च माहशैश्चाऽपि बभ्रुवाहनभूभृते ।
सहस्रशकटैः पूर्णं देयं स्वर्णं दिने दिने।।३।।

भृतकसमुपनीतमश्वमारात्पितुरथ सङ्गतिमात्मनो विदित्वा ।
निजविभवमहोपदां चिकीर्षन् विजयसुतो निरगात् प्रभूतमोदः ।।४।।

समेत्य पदयोः स्वयोर्नतमुदीक्ष्य कस्त्वं शिशो
ब्रुवन्तमिति फल्गुनं प्रति जगाद तन्नन्दनः।
अहं तव सुतः पुरा बभर जन्म चित्राङ्गदा ।
सती जठरमण्डलाञ्ज्नक तीर्थयात्रोत्सवे।।५।।

अर्जुनः ।।

यतस्त्यजन् क्षत्रियधर्ममञ्जसानतोऽसि बध्वाश्वमनन्तरं भिया ।
ततो न सूनुर्मम राजवेषिणं स्थितं भवन्तं ननु वेद मागधम् ।।६।।

In Public domain. Digitization Muthulakshmi Research Academy

तदा स बभ्रुवाहनश्शुभ्रवाहनस्य वाणीमलातद्रोणीं विषवेणीमाकर्ण्य कोष्णाङ्गस्तूष्णींशीलः वीरावेशभरात्तच्छिबिरान्निवृत्य सुबुद्धिनासुबुद्धिना मन्त्रिणानेकार्बुदसांयुगीनरथिकान् ततोऽधिकान् भटान् घोटकान् गजानपि रणसंमुखीनान् कारयामास ॥

धटादण्डगुणं प्राप भूमिभरिण सेनयोः ।
उभयोरर्जुनस्याऽपि बभ्रुवाहनभूपतेः ॥७॥

हेषाबृंहितकाहलीखररवक्रूरोद्भटाल्यार्भटी
विस्फारस्फुटभेर्यवार्यरवयुग्रथ्योद्धघर्घस्वनात्।
नेदिष्ठस्थपुरस्थगार्भिणमसूत भ्रूणपुञ्जं क्षणात् ।
भोगीन्द्रो द्विसहस्रदृक् श्रवणतां कृच्छ्रान्निनिन्द स्विकाम् ॥८॥

भटक्ष्वेलावार्तावहविदितवृत्तान्तमुदिता
स्सुपर्वाणस्सर्वे सह विमलनीलोत्पलदृशः।
विमानैराकाशं निबिडतरमातेनुरतुलै
र्हठात्त्यक्त्वा तावत्स्थलमथ रवेर्यावदुचितम् ॥९॥

भटेषु समरं क्षोण्यां रचयत्सु निजैः करैः ।
तमेव चक्रुः खेऽमर्यो लुप्तमध्याक्षरं करैः ॥१०॥

यं यं जरामयं तत्र केतुजातोऽनिलोऽस्पृशत् ।
तं तं विलोमवर्णार्थमनीनयदरिव्रजे ॥११॥

द्राघिष्ठाः करिणां नमच्छिखरिणां छाया विरेजु
स्तरां तद्भारोद्धरणाक्षमाः क्षितितलं दद्भिः प्रभिद्य स्वकैः ।
तान् दन्तिप्रवरान् प्रसेवितुमितो युद्धाङ्गणे सङ्गिनो
दिग्भ्यः पुत्रकलत्रमित्रसहिताः स्तम्बेरमेन्द्रा इव ॥१२॥

In Public domain. Digitization Muthulakshmi Research Academy

जित्वा बहिश्श्वसनमात्मभुवा जवेन
निश्वासगन्धवहगन्धनबन्धनाय ।
ओष्ठाग्रसन्निधिमुपेत्य समुत्पतद्भ्यां
पद्भ्यांः विरेजुरधिका युधि केऽपि वाहाः ॥१३॥

भटयोः करिणोर्धनुष्मतोर्द्राक्
रथिनोः खड्गभृतोश्च सादिनोश्च ।
प्रबभूव पताकिनोर्ध्वजिन्यो
रधिपत्योरपि संयुगस्त्वनल्पः ॥१४॥

शरं प्रयुज्य रिपुषु सादिनस्समराङ्गणे।
तद्घातेनैव साकं तान् चिच्छिदुः खड्गधारया ॥१५॥

अथ विजयात्मजं युधि निरुध्य महोरसिलं
मथितसपत्नहृन्नलिनमण्डलधैर्यरमः।
दनुजविभुः प्रभिन्ननिजकङ्कटचापशर
स्त्वरितमनेन सङ्क्षुभितजैत्रमतिर्निरगात् ॥१६॥

केवलमपाङ्गदेशे योऽभूत्करिणां शरेण हरिसूनुः ।
निर्याणभावमथ तं विदधे सकले कलेबरे युक्तम् ॥१७॥

एकं त्वगस्त्यमुडुरूपधरं पुरैव
प्रासूत कुम्भ इति कुञ्जरमञ्जुकुम्भः।
तत्तारकौघमिह भूरि रुषा व्यसावी
द्भल्लोद्धतोत्पतितमौक्तिकसङ्गदम्भात् ॥१८॥

मुक्तौर्घान् भुवि निर्गुणत्वकथकान् सद्वृत्तशोभान्विता
नच्छिद्रानतिमानयन्ति शिरसा तान् कुम्भिनीवल्लभाः।
तादृक्षा वयमप्यमूनिह वहामो मूर्धनीति द्विपाः
बाणान् वारयितुं किमुद्धृततिरोवल्गत्करा रेजिरे ॥१९॥

In Public domain. Digitization Muthulakshmi Research Academy

संवर्ताद्भुतभैरवोद्भटरटद्दंष्ट्राकरालक्रमै
र्बाणौघैः सुरराजपुत्रपृतनाकुक्षिं वितक्षन् रुषा ।
लोकव्यत्ययकृन्महोग्रभयकृड्ढक्काभटीस्पर्धिनं
चक्रे सिंहरवं प्रभिन्नककुभं चित्राङ्गदायास्सुतः ॥२०॥

तदनन्तरं प्रद्युम्नस्सौजन्यप्रथितोऽप्यसौजन्यप्रथितो बलाभिरूपोऽप्यबलाभिरूपः जराभीरुरप्यजराभीरुर्विधुतनयोऽप्यविधुतनयो गजाश्वबलाक्रान्तोऽप्यगजाश्वबलाक्रान्तस्सन्नुच्चावचैर्नाराचैर्विपक्षान् क्षुन्दान आस्कन्दने विजयनन्दनमविजयनन्दननियोगे न रुरोध ॥

परस्परजयेषणौ पठितवीरसम्भाषणौ
विपक्षजनपेषणौ विबुधसुन्दरीतोषणौ ।
नियुद्धकृतिरोषणौ निशितविक्रमोन्मेषणौ
व्यशोष्यतरघोषणौ व्यलसतामुभौ भीषणौ ॥२१॥

तनुजस्तदैव मनुजाशनद्विषो घनवाहपौत्रधनुवान्तमार्गणैः ।
विवशो बभूव रविशोभिविक्रमः पविनाचलेन्द्र इव नाकिनां प्रभोः ॥२२॥

तदनु तदनुगतामवस्थां स्वस्थानतोऽवलोकमानान् यौवनाश्वनीलध्वज हंसध्वजसात्यकिकृतवर्मणोऽत्यन्तीनान् दन्तीनां चितानदैन्येन सैन्येन चानश्वराजिभिरश्वराजिभिरभिमिलितानरीन् भञ्जय सुरी रञ्जय धृतिं धारय रिपुमतिं दारय परभुजबलं खण्डय स्थिरनिजकुलं मण्डय कीर्तिं पालय परस्फूर्तिं कालय शस्त्राणि वारय शत्रून् मारय द्विषः स्तम्भय रुषमुत्तम्भयेत्यन्योन्यं शब्दनानब्दनादान् तिग्मशिखैर्विशिखैर्दुस्त्रासदैरस्त्रासारैः स्थावराविशेषान् विधाय पाण्ड्यभूमण्डलाखण्डलोऽर्जुनपदगेषु पञ्चास्य इव वञ्चकेषु सञ्चारं किञ्चिदुदञ्चयाञ्चकार ॥

In Public domain. Digitization Muthulakshmi Research Academy

अभ्रं विभ्रमयन् गिरीन् तरलयन् कूटान् हठात्पाटयन्
सेनामानमयंश्चखं मुखरयन् शत्रूनतित्रासयन् ।
लोकान् व्याकुलयन् रसां विरसयन् सत्पालिमुत्पातयन्
जम्भध्वंसिसुतात्मजस्य समभूद्धेरीरवः कर्कशः।।२३।।

सम्पिपादयिषुराहवे यशः कश्चिदप्यथ भटो न हीति न ।
कश्चिदप्यमरसुन्दरी जनो नो वृणीत इति मानसेन न ।।२४।।

तदानीं वृषकेतुः।।

विवस्वानिव तत्पौत्रस्सत्पत्ररथसारथिः ।
चकासेऽत्र प्रांशुधृतिरतिरोहितविग्रहः ।।२५।।

काण्डीरान् शाक्तीकान् याष्टिकान् प्रासिकान् जघान शरैः ।
नैस्त्रिंशिकान् पुरस्थान् पारश्वथिकान् स फल्गुनौरस्यः ।।२६।।

रक्तप्रवाहयुक्तापि रराज रणभूः पुनः ।
रक्तप्रवाहयुक्तैव राधेयार्जुनभूशरैः।।२७।।

सङ्ग्रामरङ्गे ह्यसृजान्तरङ्गे मग्ना बभूवुः पदगास्तुरङ्गाः ।
कुम्भद्वयाधारतयेव तत्र शुम्भद्गजौघास्तु न संममज्जुः ।।२८।।

बम्भज्यमानौ मिहिरेन्द्रपौत्रौ रोरुध्यमानौ त्रिजगद्विजैत्रौ।
जोघुष्यमाणौ रविकल्पनेत्रौ चङ्क्रम्यमाणौ विदलत्तनुत्रौ ।।२९।।

गिरी इव स्थिरौ खरौ रणक्रमं प्रचक्रतु
र्विराजमानसत्वरौ विराजमानसत्वरौ ।
पराशिपत्रजैत्रशस्त्रवेत्रपत्रिभिः परैः।
सुरेशसूरसूनुजौ हरी इवातिरावणौ ।।३०।।

In Public domain. Digitization Muthulakshmi Research Academy

प्रतिपदरचितसमितिसमुचितघननिनदयुतौ
खरतरशरपरशुपरिघवररणकरणचणौ ।
व्रणगणसरदुरुरुधिरवलयवलयितवपुषौ
नगखगवदवनिगगनधृढवसतिचरणधरौ ।।३१।।

पाण्ड्यक्ष्मापदि तं वृषध्वजशिरः पार्थस्य पादाम्बुजे
गोविन्दाच्युत माधवाब्जनयनेत्युच्चैः पपात ब्रुवत् ।
धावं धावमदःकबन्धमित आगच्छच्चपेटेन तं
मूर्छां प्रापयति स्म सोऽपि बुबुधे सङ्ग्रामरङ्गे चिरात् ।।३२।।

कबन्धकरघातेन बभ्रुवाहनभूमिराट्।
रामोऽपि लक्ष्मणोऽप्याजौ मूर्छितोऽभवदद्भुतम् ।।३३।।

अक्षरैश्च महाप्राणैर्युक्तस्सन्नपि हांसिभूः।
चैत्राङ्गदेयेन हतो बताल्पप्राणधारिणा ।।३४।।

अभियातीनभ्यमित्र्यान् लक्षीकृत्यार्जुनात्मजः।
तदनु प्राप्तपञ्चत्वान् लुनाति स्म शरेण तान् ।।३५।।

घनङ्घनाघनस्वनात्मरावभूतभीतियु
ग्धराधराधराष्टवारणेश्वरप्रधावनात् ।
चलाचलाचलं ददर्श बभ्रुवाहनं नर
स्सुरासुरासुराजिडोलिकागुणप्रदायकम् ।।३६।।

भ्रात्रीयात्ययरोषरूषितमुहुः प्रस्पन्दरूक्षाधर
प्रेक्ष्यस्फाररदक्षतोत्थरुधिराचक्षुष्यवक्त्रोऽर्जुनः ।
लोकश्रोत्रकठोरचक्रनिनदैर्गन्धर्वभुर्भुर्स्वनै
स्स्थास्नुं स्यन्दनमारुरोह विमतप्राणोऽप्यगात्स्यन्दनम् ।।३७।।

In Public domain. Digitization Muthulakshmi Research Academy

प्रत्यर्थिबाणैश्छातेभ्यो हृदयेभ्य इवाहवे ।
चित्रं भटानां कीलालं नयनेभ्यस्समापतत् ।।३८।।

सुरराजपुत्रकुरुराजपुत्रयोर्बलयोर्बभूव चलयोरणस्तथा
ज्वलदुत्क्षुधोऽपि कलहान्धसो मुनेर्गगने स्थितस्य विघसो भवेद्यथा ।।३९।।

अचलान् पुरा विपक्षान् चक्रे बलसूदनस्तदात्मजनिः।
विशिखैरद्य विपक्षानचलानतनुत बत क्षितौ पार्थः ।।४०।।

प्रहरणदातविग्रहपरस्परयोर्भटयो
रुपगतयोर्नवीनसुरयोस्समलालसया ।
तदुभयमुष्टिकृष्टकुचयाप्सरसाऽपि कया
प्रथनमनेन तेन च मिथस्समकारि दिवि ।।४१।।

अर्जुनः।।

तिष्ठ क्षत्रियपांसनाहवमतिं मुञ्च प्रपञ्चे रतिम्
दोः कण्डूं तव खण्डयत्यरिजयस्तम्भो मदीयो भुजः ।
क्रुद्धोऽयं यदि बाणकीलवलयैः कुर्यात् क्षणं भस्मसात्
त्रैलोक्यं कुपितं कृशानुनयनं चाराधयेदीश्वरम् ।।४२।।

तदनन्तरम् ।।

कोपायतात्मीयकुमारबाणधूपायितस्वापघनःकिरीटी ।
गोपायितारुन्तुदशातदिग्धरोपायुतं तं प्रति संससर्ज ।।४३।।

तदानीम् ।।

अहो वचोभिर्द्युसदां सुरीणां हन्तारवैर्व्याप्तमभूदनन्तम् ।
हाहाकृतिस्यूतमुदीक्षितॄणामभूतपूर्वं शरयुद्धमेतत् ।।४४।।

In Public domain. Digitization Muthulakshmi Research Academy

अर्जुनस्स्वमनसि ।।

सर्वक्षत्रियकन्दकर्तननटद्दोर्गर्वभर्गप्रिय।
च्छात्रस्फूर्तिनिरोधमेदुरभुजो भीष्मो महोष्मायितः।
संवर्तोऽग्रनिटाललोचनतटीनिर्गत्वरासृत्वर
ज्वालप्लुष्टपितामहाण्डनिकरो रुद्रोऽपि नैतादृशः ।।४५।।

तादृशि रणे निरर्थीभूते बाणगणे ।।

मुखे विकारसहितः स्वीयाह्वय इवाभवत् ।
मुखे विकारसहितो विजयः पुनराहवे ।।४६।।

तदानीम् ।।

द्यावाभूम्योस्स्फुलिङ्गैर्निरवधिचलितैर्ज्वालयन् गर्भगोलं
काण्डः पाण्ड्येशमुक्तश्शितरसितरवैर्लीढगाढेन्द्रधैर्यः।
धूमस्तोमैस्त्रिलोकीप्रलयसमयकृत्पूरुवंश्याग्रगण्यं
ग्रीवायामग्रहीद्वाजनिचयमरुतापूर्यदिक्चक्रवालम् ।।४७।।

पाण्ड्यक्ष्माभृदनल्पमार्गणगरुद्धूतोऽग्रवातोधराम् ।
धूनोत्याशु विधूनयत्यपि दिशः कुध्रान् धुनोति द्रुतम् ।
अब्ध्योघं प्रधुनाति खं विधुवति ब्रध्नं धवत्यञ्जसा
त्वित्थं स्वःपुरमानशेभयभरारावो नभश्चारिणाम् ।।४८।।

जित्वा शत्रून् स माध्यन्दिनदिनमणिवद्विभ्रमादभ्रशौर्यो
हर्षोत्कर्षादकार्षीत्कुरुनृपतिसुतो रंहसा सिंहनादम् ।
आकण्ठोत्कण्ठकण्ठीरवरवतुलितध्वाननिध्यानमात्र
त्रस्तध्वस्तात्मचेतो दिगिभनिपतनव्यस्तभूप्रस्तराग्रम् ।।४९।।

तदानीं बभ्रुवाहनोऽनुयातवरूथिनीकः कृतविमतहृत्पुटभेदनस्य स्वमत-पुटभेदनस्य हस्तिनखमात्रमागच्छन्नवरोधादनवरोधं निर्गत्य हा नाथ हा प्रियेति

In Public domain. Digitization Muthulakshmi Research Academy

क्रोशन्तीभ्यां शोकदहनशिखामषीरेखायमाणकज्जलात्तबाष्पबिन्दुभिर्नीलायित मुक्ताहाराभ्यामागताभ्यां भवत्तनयो भीमस्समागमिष्यति तमन्तर्मनसं सान्त्वयेति हृत्पवनं बलान्निष्कासयन्तीभ्यामिव त्वत्सदृशनामानं धनञ्जयं त्वमप्यनुगच्छेति मरुतं हठादुद्घाटयन्तीभ्यामिव हृदि ताडयन्तीभ्यां निजकमनस्य शापदायिनीं त्रिपथगां जेतुं प्रतिनदीमुत्पादयन्तीभ्यामिवास्रमुत्सृजन्तीभ्यां चित्राङ्गदोलूपिकाभ्या मनुसृतः पुनरपि रणभुवमेत्य विमात्राज्ञप्तः जीवमणेराहरणाय साहसेन वाहसेनलोकं प्रविवेश ।।

हे आशुगाशनाममाशुगाशनं मा भवत न जीवरत्नं दास्यथ यदि पृथाकुमारकस्योज्ञीवनाय पृदाकुमारको भवेयं दीयते चेत्पन्नगेन्द्रस्यापन्नगेन्द्रो भवितास्मीत्यभिहितानामपि तदनभिमतानां जिह्मगानामजिह्मगैराहेयमाहेयं विकलीकृत्य लब्धजीवनरत्नः सरभसमेत्यागतं सकुन्तीभीमं नागारिपत्रं नगारिपौत्रो नत्वा मणिं ददौ ।।

परासुरविरोधीन्द्रस्तत्सूनुस्त्वमिहाभवः।
परासुरविरोधी किं मनोजवसतेप्सया ।।५०।।

इति दोदूयमानेन क्रन्दन्तीं मनसा हरिः।
चित्राङ्गदां प्रियाङ्कस्थां तदाश्वासयति स्म ताम् ।।५१।।

अनुलोमविलोमाभ्यां यस्याख्यै कैवतञ्च मदनदमम् ।
तादृक्षो दनुजनुदश्चेतसि भक्त्याऽस्मरत्परया ।।५२।।

उपादानं सर्गस्थितिलयततेस्सर्वजगताम् ।
शिवश्चेत्तस्यानुग्रहसरणिगोऽहं यदि दृढम् ।
अयं जीव्यात्तूर्णं विजय इति कृष्णेन मणिना ।
स संस्पृष्टः प्राणीत्सह वृषपताकेन महता ।।५३।।

In Public domain. Digitization Muthulakshmi Research Academy

देवकीशालिनं वीक्ष्य देवकीशध्वजस्तदा ।
यशोदायातमब्जाक्षं यशोदायकमानमत् ।।५४।।

बीभत्सुजायायुगलस्य यावान् कुन्त्याश्च भीमस्य किरीटिसूनोः।
आनन्दबाष्पप्रकरो बभूव ततश्शतांशाधिक एव जिष्णोः ।।५५।।

तदा नन्दो नन्दजातोऽपि कृष्णो गन्धवहो गन्धवहजातोऽपि भीमो जिष्णुर्जिष्णुजातोऽपि विजयश्च सकलैः परिवृताः दुन्दुभिधिन्धिङ्कारेषु काहलीभाम्भाङ्कारेषु शङ्खानां भम्भं रवेषु हेषानिनादेषु बृंहितेषु भटक्ष्वेलार्भटीषु यौगपद्येन दिवमुद्दलयत्सु प्रविश्य पुरं मात्स्यपुरे यं भीमो दर्वीकरोऽभूत् युधिष्ठिरस्तु कुण्डलीन्द्रो भवितुं यततेऽर्जुनो नागकन्यापतिरिति प्रसिद्ध एवैतेषां गरुडध्वजे स्नेहसत्ताहो वैचित्रीति सर्वेषु भोगिलोकेषु विलक्षेषु सत्सु पञ्चदिनानि तत्र सुख मनुभवन्तिस्म ।।

मातृद्वन्द्वमथानिलात्मजमसौ पैतृष्वसेयं हरिः
कुन्तीञ्च प्रजिघाय हस्तिनगरीं चित्राङ्गदोलूपिके ।
सैन्यैः पाण्ड्यमहीपतेरिपुचमूफालैर्नृपालैर्वृतः
कंसध्वंसियुतश्च रत्ननगरं प्रत्युद्ययौ फल्गुनः।।५६।।

इति श्रीमद्भूमण्डलसरः पुण्डरीकायमानसुरपुरसरिवृढ
श्रीमद्राजाधिराजकोसलवेङ्कटक्षमारमणकरोद्धृतान्दोलिकापार्श्वभागेन
चत्वारिंशदवधानसमयैतत्प्रभुग्रथितवज्रमौक्तिकस्थगितबिरुदघण्टामणिशोभित
करेणान्ध्रप्राकृतसंस्कृतकर्णाटादिभाषाकवित्वमहत्वशोभितनागेश्वरसुधीन्ध्र
तनुजेन भास्करविपश्चिदनुजेन वेङ्कटशास्त्रिणा कविसार्वभौमेन विरचिते
युधिष्ठिराश्वमेधचम्पूप्रबन्धे सप्तमस्तबकः।।

In Public domain. Digitization Muthulakshmi Research Academy

श्रीरस्तु

श्रीहयग्रीवाय नमः

श्री युधिष्ठिराश्वमेधचम्पूप्रबन्धे अष्टमस्तबकः

शरदारम्भविलोलशुभ्रजलदव्रातान्तरेषु स्फुर
द्धरिनीलप्रतिमानसूक्ष्मजलमुक्पुञ्जाः परं जज्वलुः।
कलशाम्भोनिधिवर्धितेषु विपुलेषूर्मिव्रजेषु स्थिता
रमणीया इव वारिजासनगुरोस्स्यामा अभिव्यक्तयः ।।१।।

किं वर्षाप्ततटिद्व्यालमुक्तनिर्मोकराशयः ।
किञ्चित्किञ्चित्तत्र तत्र मलिनाश्शारदाम्बुदाः ।।२।।

उच्चैश्श्रवोऽभ्रमुपती धवलौ मघोनो
द्वे वाहने वयमपि श्रुतवाहनानि ।
अस्मास्वयुक्तमिति नैल्यममी बभूवु
र्धाराधराः परिगृहीतवलक्षभासः ।।३।।

शरदवनिभृते समुद्धृतास्ते पटनिलया इव भान्ति शारदाब्दाः।
उदधिविरहजातदेवगङ्गागुरुतरपाण्डिममण्डलानि वाऽभ्रे ।।४।।

वरगन्धर्वमुखाञ्चितो ग्रहपतिर्मासे शुभे बाहुले
समभूद्विष्णुरिति प्रमोदभरितैर्बर्हिर्मुखैस्सत्वरम् ।
अवदातानि पटानि शोषयितुमुद्धौतानि गङ्गाम्भसा
परिकीर्णानि दिवीव संरुरुचिरे पाथोभृतश्शारदाः ।।५।।

राजाऽसौ परिणीय दास्यति शरत्कान्तां वसूनां ततिं
निश्चित्येति शुचिद्विजा इह समागच्छन्ति सन्मानसात् ।
स्वर्णश्रेणिकृते तदस्य भृतकीभूतौषधीसञ्चये
रास्तीर्णास्तरणानि वा शरवणान्युद्रेजिरे सर्वतः ।।६।।

In Public domain. Digitization Muthulakshmi Research Academy

तस्यां शरदि यियक्षमाणेन मयूरध्वजेन राज्ञाज्ञप्तस्तत्सुतस्ताम्रध्वजस्त्वाश्वमेधाश्वमनुगम्य मन्त्रिणा नकुलध्वजेन निवेद्यमानयौधिष्ठिरतुरगागतिस्तमवष्टभ्य सैन्यमर्धचन्द्राकृत्या नियोजयामास ॥

इतः ॥

सैन्यं गृध्रमिवारचय्य च गले साल्वानुजं पक्षयोः
कन्दर्पं सुतमस्य दृष्टियुगले तौ नीलहंसध्वजौ ।
चञ्च्वोः कर्णकिरीटिजौ शिनिसुतं भोजं ससाम्बं पदे
बीभत्सुं हृदि यौवनाश्वमकरोत्पृष्ठे हरिर्भैमिजम् ॥७॥

वीरावेशवशाद्भृशं तदुभयं सैन्यं तदैकोपरि
ह्येकं नाकिकुलेऽतिविस्मयगते दुद्राव रौद्रं तथा ।
भाराद्भूगतभूमिभृत्प्रकषणात्सञ्जातमूर्धोन्नम
द्रवन्ज्वालकलापदग्धवदनस्सर्पाग्रणीस्स्याद्यथा ॥८॥

तदानीम् ॥

सुरसुपथि कुब्जकुब्जान् सस्त्रीकानुन्नतोन्नतानमरान् ।
पुरतःपुरतःपश्चात्पश्चात्कृत्वा हरिर्ददर्श रणम् ॥९॥

यो यस्सुरापस्सन् युद्धे धैर्यस्थैर्यकृतेऽभ्यगात् ।
स स प्रतीपगमन* श्चित्रं शत्रुशरैरभूत् ॥१०॥

पादैर्बृंहितरावैर्भिन्दन्तं कमपि कुञ्जरप्रमुखम् ।
स्वाद्यन्तवर्णवाच्ये कश्चित् स्तम्बेरमो रुरुधे ॥११॥

निषादं नो धृत्वा जगति च निषाद्याह्वयभृतो
भवन्तोऽप्येतान्नश्शिरसि परिनिघ्नन्ति सृणिभिः।
इतीवालोच्य स्त्रागुपरि वसतो हस्तिपवरान्
क्षितौ कर्तुं स्वाङ्गं दुधुवुरपरे मत्तकलभाः ॥१२।

---

*पाठान्तरम् - गमनं नीतश्चित्रमरीषुभिः - अथवा - गमनं प्रापितोरिपुसायकैः।

In Public domain. Digitization Muthulakshmi Research Academy

साम्नो भवामेति हि सामजा वयं दानस्थितेर्दानिन इत्यभूमहि ।
धर्तुं ह्युपायांश्चतुरश्च वारणादण्डं करे भेदमरौ च के व्यधुः ॥१३॥

तदानीमुभयोस्सेनयोस्तुमुलमभूत् ।

तत्रोत्पन्नरजोम्बुदेषु चपलायन्ते स्म कौक्षेयकाः
वातूलालितिरोनिपातितपयो धारायमाणाश्शराः।
मुक्तावारणशस्तमस्तगलिता वर्षोपलन्ति स्म ताः
कृत्ताः क्रव्यकणाश्चलन्त उषितास्ते शक्रगोपा इव ॥१४॥

तुरङ्गिराट् कश्चन सांयुगीनः परान् वितक्षन्नथ तान् विविक्षन् ।
सुजाग्रतं कश्चिदुपापतन्तं गजाग्रियं ह्यश्वयति स्म चित्रम् ॥१५॥

तदात्वे सव्यकरं वामकरेण गृह्णन्तः क्षुरिकाभिघातेन बहिः पतित-मन्त्रपुञ्जमञ्जसा पुनरन्तर्निस्सार्य कच्छपुटेन निबध्य सद्यः पूर्ववद्युध्यमानाः केचित्केचिदूर्जस्वलाः हृदयनिमग्ने प्रासे पश्चान्मुहुरुत्क्रामति सत्यभिगत्य प्रत्यर्थिनः कदलीलावमलाविषुः केचिदुरस्वन्तः रक्तसङ्कुलपङ्किलायां भुवि स्खलितपादतया निपत्य शताङ्गचरणगमनत्रुटितैकजानवोऽप्येकपातोत्प्लवनेन रिपूणां पिषन्ति स्म परस्परातिवेगाभिघातचूर्णीभूतरथतया भुवमुत्पनीपत्यन्ते स्म रथिकाः - अन्योन्यदन्तघट्टनेन पश्चात्पनीपततां गजानामधस्तात्पिण्डीचर्कर्ति स्मात्मानं कश्चिद्योधवारः किञ्च - छिन्नशीर्षैर्लूनहस्तैः छातोरुभिः वृक्णपादैश्छितमध्यैः दितांसैर्दातकर्णैः कृत्तनासिकैर्भटैः शोणितामिषकरोटिकङ्कालमस्तिष्कैश्च भूयिष्ठा रणभूर्व्यद्योतत ॥

अथ मुदा रणमीक्षितुमागतास्सरभसागमघर्मजलं चलम् ।
दिवि सदागतयोऽपि तदामराः ध्वजपटीजनुषा मरुताप्यधुः ॥१६॥

In Public domain. Digitization Muthulakshmi Research Academy

युद्धप्रेक्षणसम्प्रबुद्धनिजदृङ्नद्धाद्दिवौको व्रजात्
सम्पेतुर्मकरन्दबिन्दुभसलव्याप्ताः प्रसूनालयः।
*स्वर्गीयैणदृशां हृदीव विचलत्र्युटच्यत्सरप्रस्खल
द्वैडूर्येन्द्रमणीन्द्रमौक्तिकचया नव्यैस्सुरैराहृते ।।१७।।

रथकरितुरगभटस्य प्रतिबिम्बो युधि ललास रुधिरेषु ।
सृष्टं चतुरङ्गबलं भुवेव योद्धुं तदीयभाररुषा ।।१८।।

रक्तसिक्तायुधं चर्मसैनिकैरूर्ध्वमुद्धृतम् ।
तद्धुजौजश्शुचेरासीच्छिखावद्धूमचक्रवत् ।।१९।।

शरघातबिलेभ्य आन्त्रकालि
च्छलमूलेषु बहिर्गतेषु सत्सु ।
हृदयस्थितधैर्यभूरुहोऽभूत्
क्रमशश्शुष्कतरोऽथ सैनिकानाम् ।।२०।।

केतुदण्डपटवातपातितास्स्फीतमौक्तिककुलातिशोभिताः।
वारिदा इव सुरीरिता पतत्कोरकात्तमधुपा रयाद्भुः।।२१।।

अन्योन्येभकराग्रवर्तिलगुडव्रातोद्धतैरानतै ।
स्स्वर्वारम्बुजलोचनाः प्रति तदा शीघ्रं प्रतिष्ठासुभिः ।
ताभ्यो दातुमनुत्तमाः पृथुतरा मुक्ता विचेतुं किमु ।
क्षिप्त्वात्युन्नतकुम्भयोर्निजकरौ संस्थीयते हस्तिपैः ।।२२।।

तस्मिन् भयङ्करे रणविजृम्भणे ।।

स्मरात्मजस्तावदरीननेकान् शरैर्नरेन्द्रान् समरेऽभिगन्तॄन् ।
धरानुषक्तान् विरचय्य पूर्वं पश्चाच्चकाराप्यधरानुषक्तान् ।।२३।।

---

*पाठान्तरम् - स्वर्गीयैणदृशां हृदो नवसुराकृष्णात्सरेभ्यः पतद्वैडूर्येन्द्रमणीन्द्रमौक्तिकचयभ्रान्ति प्रदाः पश्यताम् ।।

In Public domain. Digitization Muthulakshmi Research Academy

अभ्यर्णे पृथुलेषु सत्स्वपि तदा कुम्भेषु युद्धाङ्गणे
वाहिन्या उदरे निषादिनिचयैर्यैस्संविलिल्ये मनाक् ।
अन्यत्राधिकविप्रकृष्टसरणौ तैरप्सरस्स्वद्भुतं
धृत्वा प्रत्नकुचच्छलेन कलशान् सत्वादुदस्थीयत ॥२४॥

दुर्ज्ञानप्रबलौ शिखिध्वजसुतप्रद्युम्नपुत्रौ समौ ।
क्ष्वेलास्फालितदिक्तटौ मिथ उभौ विध्वादधातां रणम् ।
एकस्तत्र महानहीनबलमप्येकं जिगायाशुगैः
कर्तृत्वं प्रथमं द्वितीयमगमत्कर्मत्वमत्यद्भुतम् ॥२५॥

युद्धेऽपि नाक्यभिख्यो विधुरविलोचनयुतो रुषा शस्त्रैः ।
वृषकेतुरच्छिनद्द्राक् स दानवानां पुरं शरासभृताम् ॥२६॥

किञ्च ॥

मार्गणंगरहितं परिकल्प्य द्वेषणेषु वृषकेतुरथादौ ।
मार्गणंगरहितं पुनरेतेष्वेव सङ्गरतले कुरुताहो ॥२७॥

भटाननान्यस्त्रनिपातितानि लुठन्ति दन्ताञ्चितमुन्मिषेण ।
कुक्षि स्थितौ मातृजनेन भुक्तां साक्षाद्वमन्तीव मृदं स्वसक्ताम् ॥२८॥

तदात्वे ॥

क्रुद्धस्येद्धस्य युद्धे सरभसमसकृत्कर्णसूनोः कलम्बैः
कृत्तात्मस्यन्दनानां शतकमतिरुषा वीक्ष्य ताम्रध्वजोऽयम् ।
क्षत्रासत्रेनमाजौ खरशरपटलीदूतिकानीतमुर्च्छा
योषाश्लेषातितोषात्परवशहृदया चञ्चलं सञ्चकार ॥२९॥

तत्रान्तरे ॥

स्वयं प्रभिन्नानपि वारणांस्तान् पुनः प्रभिन्नान् प्रविधाय बाणैः।
रणे प्रमोहानपि वैरिवर्गान् पुनः प्रमोहान् विदधेऽनुसाल्वः ॥३०॥

In Public domain. Digitization Muthulakshmi Research Academy

तदा सदा सधीरधीरधीस्स्वतोऽतिवेगवा
नरातिजातघातुकैश्शरैः खरैर्वरैस्स्वरैः।
शिखिध्वजस्य नन्दनं मखाग्र्यवाजिबन्धनं
क्रुधा रथोपरि स्थितं व्यधाद्युधीर्मशोभितम् ॥३१॥

ताम्रकेतोः करहितः पृषत्कस्समराङ्गणे ।
अनुसाल्वस्य शौर्याग्निलेशे करहितोऽप्यभूत् ॥३२॥

तदात्वे ॥

यश्शूरेषु प्रमुखस्तद्वद्यस्याह्वयः सदा प्रमुखः।
सोऽयं प्रद्युम्नो द्राक् संयोद्धुं ताम्रकेतुनारभत ॥३३॥

किञ्च ॥

प्रद्युम्नं धनिनं मत्वा संश्रिता मार्गणास्ततः।
नकारस्मरणेनेव तन्नाम्नुद्ययुरञ्जसा ॥३४॥

प्रद्युम्नस्य महाघोरे विपाठस्समरे द्विषाम् ।
अधिकण्ठं जगामाशु स्ववाचक इव स्वयम् ॥३५॥

पराजितेनारुणकेतुभूभुजा पराजितस्सन् खलु पल्लवायुधः ।
पराजितस्वाह्वयसङ्गलज्जया पराजितो दूरमगात्तदद्भुतम् ॥३६॥

शम्भुर्बम्भरगुणमिव जम्भारिः कुम्भिनीधराग्र्यमिव ।
कुम्भभवोम्बोधिमिवास्तम्भ यदरिदम्भमम्बकैस्साम्बः ॥३७॥

साम्बः पुरा समदहत्किल राजमौलि
र्गोजातवह्निशिखया सुहृदं प्रकामम् ।
साम्बो यमप्यदहदद्य तु राजमौलि
र्गोजातवह्निशिखया सुहृदं प्रकामम् ॥३८॥

In Public domain. Digitization Muthulakshmi Research Academy

रणे सुरगणेऽपि विस्मृतिगते स ताम्रध्वजः ।
फणीश्वरफणामणीदलनचुञ्चुचञ्चद्रथम् ।
द्विडङ्ककडङ्गरप्रकरशूर्पदस्त्रं शरै
रपातयदुपागतं तदनुजाम्बवत्यात्मजम् ।।३९।।

तदानीम् ।।

ताम्रध्वजस्य पाणावुद्युक्ते तूणमार्गणायेषत् ।
वैवस्वतस्तदासीदुद्युक्तः प्राणमार्गणाय भृशम् ।।४०।।

पुरस्तात् पार्थपुत्रस्याभवत्प्रत्यर्थिमण्डलम् ।
क्वचित्क्रमेण च वशं व्यत्यासेन क्वचिद्वशम् ।।४१।।

तस्मिन्समये ।।

रणस्स केषां कलहायितृणां रणं न सम्पादयति स्म सैंहम् ।
क्षणस्स कासां सुरसुन्दरीणां क्षणं न चोत्पादयति स्म चित्रम् ।।४२।।

अरुणध्वजोऽपि तावच्छरकीलैरभ्यमित्र्यताभाजाम् ।
चापे शरताञ्चक्रे शरेऽपि चक्रे शरव्यतामाजौ ।।४३।।

तदात्वे ।।

नृपाणां सहस्रं द्विपानां सहस्रं भटानां सहस्रं झटित्याशुगाग्रैः।
रथानां सहस्रं पृथासूनुसूनुर्हयानां सहस्रं व्ययात्तं चकार ।।४४।।

चुम्बं चुम्बं कपोलौ वरसुरसुदृशामोष्ठपीयूषपूरं
पायं पायं स्वकण्ठद्वयसमपि भटा नव्यदिव्या भवन्तः।
श्लाघं श्लाघं स्वहन्तॄन् सुमततिममितां संविगृह्याग्रजाग्र
त्स्वर्गौकः पाणिमध्याज्झडिति ततमुदश्शत्रुसार्थेष्ववर्षन् ।।४५।।

वरावरायष्मदनागमेन स्मरोऽद्य नस्ताडयतीति कामम् ।
शरान् तदीयानिव दर्शयन्त्यस्सुराङ्गनाः खाद्ववृषुस्सुमानि ।।४६।।

In Public domain. Digitization Muthulakshmi Research Academy

तदामरीकापि सदोः प्रतापं पदातिमेकं समदोपगूह्य ।
जहौ रतिं तावदहो विचित्रं सहैव मत्याशु मुहूर्तमात्रम् ।।४७।।

तदानीं सौनन्दकधार्यनुजोऽप्यसौ नन्दकधार्यनुजस्सात्यकिर्विभेदकैरप्यविभेदकैश्शरैररीन् कृत्वादौ निमीलिताक्षाननन्तरमनिमीलिताक्षान् विरचय्य रणे नित्याख्यातेष्वपि प्रत्याख्यातेष्वात्मीयेषु तदसूर्क्षणं तत्क्षणेन लक्षीकृत्य विपक्ष मृगतरक्षुणा रथिकानामाहोपूरुषिकां सादिनामहम्पूर्विकां योधानामहमहमिकां यौगपद्येनोद्दलयता स्वनाम्नीव मुखेऽपि ताम्रध्वजेन ताम्रध्वजेन जीवामुक्तैरपि जीवासक्तैराशुगैः पश्चाद्गलहस्तिकया निष्कासित इव यौवनाश्वादिभिर्युक्तस्सन्निज स्कन्धावारपर्यन्तमपासरत् ।।

तस्मिन् दुर्दर्शे रणरङ्गे ।।

अग्नौ मग्नतरा यथा युधि भटा मा मा म्रियध्वं वृथा ।
शिष्यध्वं सुतदारबन्धुजनतातुष्ट्यैव शिष्टायुषः।
एतस्मै किरते किरीटितनुजायाह्नाय वह्निं शरैः
कस्तिष्ठेत रुषाभिषेणनयुतश्शेषस्तु शेषो भवेत् ।।४८।।

इत्थं जोघुष्यमाणः कुरुवरतनयो वामहस्तेन चापम् ।
गृह्णन् हस्तेन तूणीमुखतलकलितेनान्वहं दक्षिणेन ।
आकर्णान्तं विकृष्टैरनवरतमरं मार्गणैस्ताम्रकेतो
र्भिन्दानस्स्यन्दनानां दशशतमथ तेनाशुगैः पातितोऽभूत् ।।४९।।

पराभूतिः पूर्वं सकलनृवरेभ्योऽर्जुनसुतं
समापद्यामुष्याधिकसुखकरी तूर्णमभवत् ।
इदानीं सा चैव प्रथनभुवि ताम्रध्वजनृपा
त्समेत्यैनं तं द्रागबत किल बभूवासुखकरी ।।५०।।

In Public domain. Digitization Muthulakshmi Research Academy

तदानीं रणचण्डः पाण्डवो यं दानशौण्डप्रकाण्डेनेव पुनर्निकटमुपतिष्ठमानेषु मार्गणेषु नमीभूतेन तत्सात्कृत्य लोलजीवमात्मानं तेषु गतेषु ते हृष्टा वा न वेति द्रष्टुमुद्ग्रीविकामुद्वहतेव मुहुर्मुहुर्दीर्घेण गाण्डिवेन निष्ठ्यूतेन काण्डकाण्डेन धैर्यशौर्याभ्यां समवर्तिलोकं समवर्तिलोकं निनाय्य घनवाहान् घनवाहसकाशं प्रापयित्वा संयमन्यादविष्ठस्य मार्गणस्यातिवेगलङ्घनाय जवमभ्यसितुकामेष्विव दूरदूरं पलायमानेषु केषुचिद्रिपुषु निराकरिष्णुस्सन् निजतुरङ्गतरङ्गानुयायिरथ तरणिवेगोत्कूलिताभियातिमानुष्यकगल्यः परवाहिन्यां सम्बभ्राम ॥

पुरस्कुर्वन्तस्तान् विजयविशिखान् भूतनिचया
यियासन्तीमानि प्रसभमिह वर्षाणि समितौ ।
वयं पञ्चप्राञ्चो न शरसहिताः पेष्टुमवनौ
न शक्ष्यामस्तेषामिति किमु जहुर्भूतनिवहाः ॥५१॥

अथोभये वीरभटाग्रगण्याः प्यधुःकबन्धैर्वसुधां समन्तात् ।
विश्वम्भरे कर्षति हन्त चापं विश्वम्भरा चापमकर्षदन्तः ॥५२॥

चिक्रंसुष्वहितेष्वथाव्ययपदं केचिद्धताश्शौरिणा
मोक्षं प्राप्य मनोरथेन सहिता आसन् हि युक्तं किल ।
केचित्तेषु निबर्हिताः कुरुपतेः प्रक्ष्वेडनैस्संयुगे
स्वःप्राप्यात्तमनोरथास्समभवन् चित्रं न चित्रं त्विदम् ॥५३॥

क्वचिच्च ॥

पादोद्भवास्य शौरेश्शरधारापरसमुद्रशर्मकरी ।
अद्य तु करसम्भूता शरधारापरसमुद्रदुःखकरी ॥५४॥

अन्यत्र च ॥

प्रभूतपञ्चता तत्र युध्येकाभजदञ्जसा ।
प्रभूतपञ्चता ह्यन्यात्यजत्पार्थहतान् रिपून् ॥५५॥

In Public domain. Digitization Muthulakshmi Research Academy

क्वचिच्च ।।

अरिवीरजनो नियुध्य घोरं हरिणा दारितविग्रहो रणाग्रे ।
प्रविधातुमिवाशु वैरशुद्धिं हरिदेहं गगनाङ्गणे बिभेद ।।५६।।

कुत्रचित् ।।

कृष्णेन तेन दशरूपभृता नियुध्य
शत्रुक्षितीशरथिका युधि कौतुकात्ताः।
तस्माद्बुभूषव इव ह्यधिकास्तदानीं
ते सत्वरं त्रिदशरूपभृतो बभूवुः।।५७।।

अपूर्वैर्जिह्मगश्रेष्ठैर्नरेन्द्रो बर्हिकेतुभूः।
व्यधादक्षिगतान् युक्तं पृथुकान् भूरिमोहितान् ।।५८।।

एकैकपुष्पं सौरागाः दत्वैकैकभटायते ।
दुर्विधत्वं गतास्तस्मादन्यथैच्छन् स्वपञ्चताम् ।।५९।।

दत्वा दत्वा नित्यमत्यन्तपुष्पं स्वल्पः कल्पो जल्पति स्माप्यनल्पः।
युष्माकं या कामना तां ददामि मा याचध्वं प्राणतुल्यं प्रसूनम् ।।६०।।

त्वं कामधेनुरसि किल विश्राणनतस्समस्तकामानाम् ।
तस्माद्देहि सुमानीत्यमरी काप्याह सविधविबुधगवीम् ।।६१।।

तदनु ताम्रकेतुः निजनिवासभूतान् दशशतरथान् पिष्टातनिभान् कुर्वाणमक्षौहिणीसैन्यमन्यत्र जनिमनुकरिष्यमाणं शरैर्विदधानं सप्ताहोरात्रान् समविक्रमं कलहायितारं धनञ्जयं मर्माविद्भिर्नाराचैस्तदनीकहर्षेण साकं प्रथमावस्था पथादवतारयामास ।।

अहर्निशं वीक्ष्य समीकमूर्ध्वलोका दधुस्सप्तशिरस्सु कम्पम् ।
एकोऽपि वीणामुनिरात्तहर्षो नाके दधौ सप्तशिरस्सु कम्पम् ।।६२।।

In Public domain. Digitization Muthulakshmi Research Academy

तत्र तावत्समरतले हरिनिषङ्गाद्बहिरेत्य शराः भक्तोऽयं तव ताम्रकेतुरेनं चिकर्तिषाम इत्याज्ञां पिपृच्छिषन्त इव पुराणपुरुषबुध्या कर्णजाहमागताः स्वस्मिन् बधिरत्वारोपणादिव कुपितेन कृष्णेन दूरं निष्कासितास्सन्तः यथाऽस्य श्रोत्रमपत्यात्ययेनान्तर्मनोभवेत्तथा दिशो विदलयाञ्चक्रुः ॥

तावन्मात्रेणासङ्कुचितरोषेण भीषणवेषेण कौस्तुभभूषेणाष्टाभिः काष्ठाभिस्साकं बम्भ्रम्यमाणस्य चण्डकरमण्डलावधीरणाधुरीणस्य सुदर्शनस्य स्फुलिङ्गेषु शात्रवंशताक्षौहिणीसैन्यं बहुतृणमासामास ॥

पूर्वा यात नवीनदेव निकरैर्मानातिगैरादरा
दाक्रान्तास्वखिलासु सौरतरुणीष्वालोक्य सर्वाक्षिभिः।
तावत्कृष्ण हते त्रिविष्टपगते सैन्ये शताक्षौहिणी
सङ्काके मथनं पुनर्जलनिधेरैच्छन्मुहूर्तं वृषा ॥६३॥

तदा ललाटन्तपोऽर्क इवारुणकेतुरेष रोषादुपगम्य तोषाच्छेषाङ्गशायिनं पदयुगमेकेन करयुगलमन्येन करेण गृहीत्वा यत्रार्जुनस्तत्र प्राक्षिपत् ॥

कृद्वृत्तेः प्रकटयितुं तद्धितवृत्तेर्हरिर्बलीयस्त्वम् ।
बार्हिध्वजिना विजितो नो चेन्मेरुर्जितो भवेदणुना ॥६४॥

तदनु कुलकेतुमपि नकुलकेतुं मन्त्रिणं पुरस्कृत्य गदाग्रजमप्यगदाग्रजं कृष्णं विकर्तनपौत्रयुतमप्यविकर्तनपौत्रयुतं गाण्डीवधन्वानञ्च जित्वारुण-केतुरनेकपारिजातपदातिशोभितं रणरङ्गमुज्झित्वैकपारिजातपदातिशोभितं स्वर्गं गन्तुमनभिलाषुकतयेव चिरं विलुठ्य विलुठ्य म्रियमाणैः कैश्चिद्भटैर्नाजिबाधां सहामहे दिग्गजान् प्रतिययियासामो देहि मार्गमिति भुवं नत्वा प्रार्थयमानैरिव लूनाग्रोरुतया क्षितावामूलमग्रदन्तैर्गजैः गच्छन्ति चत्वारि भूतानि मयापि न

पाठान्तरम् - प्रकटयितुं कृद्वृत्तेस्तद्धितवृत्तिर्बलीयसीतिहरिः ।
बार्हिध्वजिना विजितश्शाब्दिकफणिसार्वभौमभोगशयः ॥६४॥

In Public domain. Digitization Muthulakshmi Research Academy

स्थातव्यमिति पवित्रं मुखमध्यारूढेन पञ्चमभूतेनेव मृल्लोष्टेन विकृताननैरश्वैः प्राणेषु मोहाम्बुधौ निलीनेषूद्गतैर्बुद्बुदैरिवोर्ध्वोद्धतैर्नयनगोलकैः पतितैः कैश्चिद्योधैः दुष्करबलाशुष्कतुरुष्कभटन्यसनाय सञ्जीकृताभिस्समाधिवेदिकाभिरिव छातोरुशिरोधितया पतितैरुष्ट्रपृष्ठैः भटोत्पादनसमये दत्तमात्मतत्त्वं यावत्तावत्तदानीं जिघृक्षन्त्या भुवा परिमातुमानीतैर्मानविशेषैरिव निषङ्गैरपूर्वासु विरोधिसम्पादितासु कीर्तिकान्तास्विदानीं भुवि पतितास्वप्यपूर्वासु सतीषु लक्ष्यमाणैर्वक्षोजैरिव दुन्दुभिकुलैस्स्वप्रतापातिरेकोष्णोपगमशुष्कीभूतवाहिन्यन्तरदन्तुरैः कमठैरिव खेटककूटैर्बन्धुरां वसुन्धरामन्वीक्षमाणः एकस्माद्भानुमण्डलादेकदैवानेक-वीरसमागमनाय विलम्बितयाति वृषस्यन्तीनामप्सरसां प्रमदनाय विधात्रा विधेधीयमानैरनेकरविमण्डलैरिवाभ्रंलिहध्वजाग्रेषु राराज्यमानैः कलशैर्बाभास्यमानै-स्स्यन्दनैर्मदबन्धुरैस्सिन्धुरैर्गन्धवहबान्धवैस्सैन्धवैरणवृत्तिभिः पत्तिभिश्च परिवृतः प्रविश्य निजपुरीं गजपुरीशस्योदन्तमाद्यन्तमुद्यन्तमभाणीत्सभासीनं नत्वा स्वजनकं मयूरकेतनं दयानिकेतनम् ॥

इति श्रीमद्भूमण्डलसरः पुण्डरीकायमानसुरपुरपरिवृढ
श्रीमद्राजाधिराजकोसलवेङ्कटक्षमारमणकरोद्धृतान्दोलिकापार्श्वभागेन
चत्वारिंशदवधानसमयेतत्प्रभुग्रथितवज्रमौक्तिकस्थगितबिरुदघण्टामणिशोभित
करेणान्ध्रप्राकृतसंस्कृतकर्णाटादिभाषाकवित्वमहत्वशोभितनागेश्वर
सुधीन्द्रतनुजेन भास्करविपश्चिदनुजेन वेङ्कटशास्त्रिणा कविसार्वभौमेण विरचिते
युधिष्ठिराश्वमेधचम्पूप्रबन्धे अष्टमस्तबकः॥

In Public domain. Digitization Muthulakshmi Research Academy

श्रीरस्तु

श्रीमहागणपतये नमः

श्री युधिष्ठिराश्वमेधचम्पूप्रबन्धे नवमस्तबकः

मन्दं मन्दमधोक्षजस्स्वनयने उन्मील्य पाण्डोस्सुतम्
स्पर्शं स्पर्शमितस्ततोऽर्जुनकदात्वं मूर्छितोऽस्याहवे ।
जल्पं जल्पमिति द्रुतं सकुहनामर्त्यो बलं चाखिलम्
प्रापय्य प्रकृतिं जगाम स पृथासूनुर्विविक्तं ततः॥१॥

एष पद्माधीश उपैकादशानि रूपाणि धृत्वेदानीं बाडबरूपं जिघृक्षत्यहमपि पद्माधीशो ममाप्युपैकादशानि रूपाणि सन्त्येवेति रविस्स्वयमपि बाडबरूपं जिघृक्षन्निव प्रतीचीनेऽम्बुधौ निममज्ज ॥

तदनु कृष्णः फल्गुनस्य पौरवैचित्रीं दिदर्शयिषुस्स्वीकृतवृद्धाग्र जन्मभूमिकस्तमन्तेवासिनं विधाय पुरमषडक्षीणालोचनया प्राविक्षत् ॥

नित्यं पलाशनाशो विप्रवराग्रेसरोऽपि सन् मिहिरः।
सायं वारुण्याप्तस्तस्मात्पतितद्विजत्वमुपभुङ्क्ते ॥२॥

कुवलयपीडाकरणात्सद्राजः कुप्यतीति तद्भीत्या ।
विद्रवतोऽर्कस्याङ्गाद्दिवि विगलितमुत्तरीयमिव सन्ध्या ॥३॥

इने देशान्तरं याते पद्मिनीपङ्कजानना ।
अन्तर्नददलिस्वानच्छलेन व्यलपद्भृशम् ॥४॥

आयास्यन्मृगलाञ्छनस्मरणतो भीतैस्ततश्चञ्चले ।
स्सौकर्येण पलायनाय निभृतं तैस्तैस्तमिस्रोत्करैः।
पद्मेषु स्वसपत्नवैरिषु शिशुव्यूहा इवारक्षितुम् ।
निक्षिप्ता विविशुश्चिरेण मधुपव्रातास्समेता रवेः ॥५॥

In Public domain. Digitization Muthulakshmi Research Academy

कुमुदमभितः स्फुरन्ती भृङ्गीमाला विराजतिस्मतराम् ।
कुमुदिन्य विरलविरहज्वलनसमुद्भूतधूमरेखेव ॥६॥

कबरीं समाचिकीर्षोः प्राक्सुन्दर्या विसृष्टमिव कैश्यम् ।
आयास्यतीति राजा तमसां निकरो व्यराजदल्पीयान् ॥७॥

अस्ताद्रौ हरिदश्वसैन्धवखुरत्राणप्रघातोद्भव
ज्वालभ्रान्तिदसान्ध्यरक्तिमभरं विद्योतमानं तदा ।
दृष्ट्वा भल्लुकवल्लभाभययुता द्राग्वह्निमत्तां गिरौ
मत्वेतस्तत आपतन्त इव संरेजुस्तमोराशयः ॥८॥

तस्मिन् समये कासुचित् कान्तास्वन्यगृहदीपिकाभ्यो दीपान् परिगृह्य वातशङ्कया हृदयावकुण्ठनपटानामन्तर्निगूह्य निजगेहमागच्छन्तीषु ते स्वमातृकावियोगमसहमाना नायाम इति सूचयन्त इव तिरःकम्पितशिरसो व्यराजन्त ॥

कुत्रचित् ॥

गृहात्स्वगेहं प्रतिगामिनीनां स्त्रीणां पटान्तर्व्यरुचन् प्रदीपाः ।
क्षिप्ता इवार्कस्य करा गृहीताकरैस्स्वकीये स्तनकोकतुष्ट्यै ॥९॥

अन्यत्र ॥

प्रसूनगुच्छभ्रमतोऽलिनो नः परापतेयुस्स्तनयोरितीव ।
धृतानि हस्तैरिव चम्पकानि पटेङ्गनानां व्यलसन् प्रदीपाः॥१०॥

मत्वा स्वनाथस्य रवेरभावं शोकात्कृशागात्रविसर्जनाय ।
छायेव दीपज्वलने पतन्ती रेजे तदग्रासितधूमरेखा ॥११॥

राहोर्भिया तरुण्यास्यस्वरूपमधरच्छशी ।
तमोदेहभृतस्तस्य शिरोरत्नानि दीपिकाः॥१२॥

In Public domain. Digitization Muthulakshmi Research Academy

रणक्षणविलोकनागतनिलिम्पशम्पातनू
कुचस्थलरुचिच्छटाच्छुरितहारमुक्ता इव ।
जवान्नवदिवौकसां प्रपरिरम्भसङ्घर्षतोऽ
भितो निपतिता बभुर्विरलतारका व्योमनि ॥१३॥

कुमुद्वतीमुद्वहतीति राजा निशातरुण्याम्बरनीलचेले ।
क्षिप्ता जलार्द्राच्छसुमुद्गदालीपिष्टस्य खण्डा इव भानि रेजुः॥१४॥

केचिद्ध्वान्तपयोनिधावुडुगणं तद्बुद्बुदालीं जगुः
केचिद्व्योमरमाशिरोजपटले कुन्दावलीमूचिरे ।
अभ्रंविष्णुपदाह्वयाञ्चितमतस्तारा गणव्याजतो
राराजन्नखदीप्तिकन्दलकुलं तस्मिन् विजानीमहे ॥१५॥

रात्रौ वार्तां परिज्ञातुं गच्छता कर्मसाक्षिणा ।
आत्मीया इव निक्षिप्ता जज्वलुर्ज्योतिरिङ्गणाः॥१६॥

ततः कृष्णार्जुनयोः कामुकव्यापारान् दर्शंदर्शं गच्छतोस्सतोः। कश्चन भुजङ्गशेखरोऽनुभूतचरीं काञ्चित्कान्तामेवमभाणीत् ॥

वाणीक्षुरसद्रोणीपाणी राराजदम्बुजश्रेणी ।
श्रोणीविनमत्क्षोणीवेणी ते मदनमोहनकृपाणी ॥१७॥

नेत्रं कुवलयमित्रं गात्रं कुसुमास्त्रकरकनकवेत्रम् ।
मध्यस्त्वनुमिति साध्यः पारे वाचां कुचद्वयं भाति ॥१८॥

कुत्रचित्कस्यचिद्विटस्य प्रेयसीं प्रतिवचनम् ॥

चपलाक्षि चकास्ति कुङ्कुमाढ्या तव सीमन्ततटी मुखेन्दुगीर्ण्यै ।
चिकुरात्मतयागतस्य राहोश्शिरसो रत्नरुचिर्मुखोद्गतेव ॥१९॥

In Public domain. Digitization Muthulakshmi Research Academy

ताटङ्करूपमणिशाणतलाग्रसीम
न्युत्तेजितास्तव कटाक्षशरास्स्मरेण ।
तस्माद्धि माद्दशहृदन्तरभेदशक्ति
स्तेषां सदा करतलामलकीबभूव ॥२०॥

हृत्स्थितमदनस्य पुरो विनिहितखेटकसुवर्णकलशवरौ ।
बहिरुद्गताविव कुचौ खड्ग इवाभाति रोमराजिस्ते ॥२१॥

नासोपरि कनन्नीलं कुङ्कुमं सखि भाति ते ।
गन्धफल्यग्रसंलग्नमूर्च्छल्लोलम्बशाबवत् ॥२२॥

अधरच्छविभीरक्तं नासिकालम्बि मौक्तिकम् ।
विरहाग्न्युज्ज्वलच्छ्वासाघातात्तप्तमिवास्ति ते ॥२३॥

तरुणि तव चलद्भ्रूचापदण्डे सुमेषौ
तिलकफलसमेतं नासिकाचम्पकेषुम् ।
रचयति विसरन्तस्तद्गुणीभूतभृङ्गा
भयभृत इव तिर्यग्भान्त्यहो त्वत्कटाक्षाः ॥२४॥

वीक्षणे मृगशाभाक्षि विष्णुत्वं प्रेप्सुनी तव ।
वैसारिणाकृतिं प्राप्य श्रुतीरात इहानिशम् ॥२५॥

मुखकैरवनायकद्युतिं गलदघ्नं परिपीय तत्कणान् ।
अवदातकटाक्षकैतवाद्वमतस्तेऽक्षि चकोरकौ प्रिये ॥२६॥

कुत्रचित् स्थले -

ग्रहचारभयमिदानीमिनजैवातृक निवारय मदीयम् ।
भव मेऽभिमुख इतीव स्त्री काप्याहात्मनायकं रुष्टम् ॥२७॥

In Public domain. Digitization Muthulakshmi Research Academy

श्लेषभाषया मुदितस्सन् कान्तः -

ओष्ठश्चेदरुणो मुखं शशधरोऽङ्गी लोहिताङ्गौ दृशौ ।
सौम्याभे गुरुरुज्वला कटितटी भास्वत्कवी ते कुचौ ।
मन्दस्तुत्यगते तमोऽतुलकचे छत्रान्वितस्सन् ध्वज
स्सेवामातनुते पदे सखि कुतो जातं ग्रहाणां भयम् ॥२८॥

कुत्रचित् ॥

सङ्केतं प्रति कामिनी निशि यियासन्त्याननं दर्पणे
कान्त्युत्कृष्टमवेक्ष्य गारुडमणीभृत्पत्रपाश्यां मुखे ।
आरुण्यं त्वधरस्य वीक्ष्य विलसद्वैडूर्यमाबिभ्रती
घ्राणे चम्पकमालिकां कुचतटे तत्याज भीतिं तदा ॥२९॥

काचिन्नायिका नायकं प्रत्येवमाह ॥

सर्वदैवात्मनस्तेऽस्ति न भयं पौरुषात्सखे ।
स्त्रीत्वात् ममैव हि भयं तस्मादायामहं शनैः॥३०॥

नायकः ॥

भूभृद्वेषावुरोजौ कचततिरनिशं कृष्णवर्त्मा भ्रुवौ चेत्
धर्माकारे दिगीशाकृतिमितवति ते विग्रहः कर्बुरात्मा ।
दीव्यज्जङ्घे अधो भावितशरधिवरे दृष्टिरेषाशुगोऽयम्
कण्ठश्शङ्खेट्सुरोमावलिरपि च महाकालमूर्तिः कुतोभीः॥३१॥

काचित् ॥

बिसभ्रान्तिकरौ स्वीयौ प्रवेष्टौ वीक्ष्य भामिनी ।
उत्कीर्णकेशपाशा सत्या ययौ प्रेयसो गृहम् ॥३२॥

पूर्वशब्दस्य योगेन रात्रिशब्द इव क्वचित् ।
कापि कान्तस्य योगेन पुम्भावं सहसा ययौ ॥३३॥

In Public domain. Digitization Muthulakshmi Research Academy

तदात्वे ।।

तारावर्त्मनगोडुकुट्मलचयं प्राच्याः कुरङ्गीदृशो
गृह्णत्याः करमुन्नमय्य हृदयात्स्रस्ते तमिस्राम्बरे ।
काश्मीरद्रवचर्चितः कुच इवारक्ताकृतिश्चन्द्रमा
जातोऽभूददसीयचूचुकतटीवाङ्को मृगाङ्के बभौ ।।३४।।

आदौ रविर्मां परिगृह्य पश्चाद्रागी प्रतीचीमुपगूहतीति ।
प्राच्यादिशो रोषकषायिताया मुखं यथेन्दू रुरुचेऽरुणाङ्गः।।३५।।

आकाशव्याजयुक्ते पृथुतरफलके भूरि मष्या विलिप्ते
सायं बालो व्यलेखीत् खगनिनदमिषाद् वाचयन् वर्णराजीः।
इन्दोरुस्राम्बुमर्शाद्गलितनिपतिता तन्मषीवान्धकारः
क्षित्यां स्मायाति तारास्तत इत उषितास्तत्र शेषाक्षराणि ।।३६।।

तदानीमारुह्यौ जायमाने सत्यभ्रं शुभ्रांशौ ।।

हरशिरसि स्फुरदम्बरसरिदम्बुनि चिरनिवासतो जाता ।
जलनीली किल पालिर्नलिनारेर्हृदयसीम्नि परिकलितः।।३७।।

रोदोन्तरालगर्गर्यां ज्योत्स्ना दण्डाहतोपरि ।
नवनीतमतिं तन्वन् व्यद्योतत सुधानिधिः ।।३८।।

नभोगृहान्तच्छदिषीन्दुकैतवान्निशाख्यलूताकृतसूतिकालयात् ।
कलङ्करन्ध्रात्परिपातिनोऽभितः तदण्डवारा इव तारका बभुः।।३९।।

आसायं नलिनीव नालिषु कृषिं कृत्वा प्रतीच्यम्बुधौ
स्नात्वा शीतनिवारणाय दहनं प्राप्ते रवौ कर्षके ।
तज्जग्ध्यै निहितेऽभ्रभाजनवरे ज्योत्स्नाच्छतक्राञ्चिते
रेजे शुभ्रपलाण्डुवद्विधुरयं ताराः पुलाका इव ।।४०।।

In Public domain. Digitization Muthulakshmi Research Academy

काचिद्विरहिणी चन्द्रं निर्वर्ण्य सखीं प्रति ।।

हरिपादलोलुपांस्तान् द्विजराजान् विद्विषन् स्वयं तादृक् ।
जैवातृकस्स्वदेहे तद्दोषं लक्ष्मरूपतो धत्ते ।।४१।।

विधुन्तुदस्त्वां द्विजराजरोषाद्गिलन् तदैवोद्वमति प्रभीत्या ।
त्वन्नामभाजो गरुडस्य वैरमाम्रेडितं स्यादिति मन्यमानः।।४२।।

कृशानुचन्द्रौ सलिलात्मजातौ बिभेति पूर्वो जनाकाश्रितेभ्यः।
परःखलस्स्वर्थिदशाविशेषे सीमातिगं हन्त गुरुं करोति ।।४३।।

सखी ।।

एकत्र जातयोरेक एव गुण इति न नियमः ।।

कुतः ।।

अग्नीषोमौ प्रसिद्धौ जलजननभृतौ लालनात्फालदृष्ट्याम् ।
लीनः पूर्वस्तु रक्षः क्षपणनिपुणतामेति वामार्धजानेः।।
अन्यस्तस्याधिशीर्षं चिरतरवसतिं प्राप्य सोऽयं कृतघ्नो।
दाक्षायण्यास्यशोभां बुधकविकलितां वर्धयत्यर्धदेहः।।४४।।

प्रियां वहन्नप्यनपायिनीं शिवां
सुधानिधे तारकराजशेखरः।
कदाऽपि दौष्ट्यं प्रकरिष्यसीति वा
सदोपकण्ठे दहनं तवाक्षिपत् ।।४५।।

दुष्टं कुवलयेशं त्वां दृष्ट्वा मीलति सारसम् ।।

सखी ।।

युक्तं सखि त्वयोक्तं हि वचनं श्लेषगर्भितम् ।।४६।।

In Public domain. Digitization Muthulakshmi Research Academy

घनेषु पदताडनान्नयनहीनता स्यादिति
प्रजोक्तिरिह निश्चिता खलु भियैस्वबालावलेः।
यतोऽत्रिजसुहृग्जने सपदि पादपीडाकृते
विलोचनतयालसत्यपि परम्परालोकभाक् ।।४७।।

त्वं शीतलोऽपि मलयाद्रिभुजङ्गरङ्ग
दाशीविषात्तसकलाङ्गतया तितीक्ष्णः।
तस्मात्समीरणजगत्त्रयजीवदस्सन्
कामक्षतेषु दशमीं वितनोष्यवस्थाम् ।।४८।।

समीर न घ्नन्ति सरीसृपेशाश्शक्ता अपि त्वां शिवभूषणानि ।
पत्युस्त्रिलोक्याः परमेश्वरस्य नाम्नोऽष्टमूर्तेरवमानभीत्या ।।४९।।

उमापतिर्मूर्त्यभिमानवर्जितोऽभवन्तमात्माहितचित्तभूरथम्।
पटीरगिर्यग्रकुटीतटोरगीस्फटाच्छटासु प्रसभं क्रुधाऽक्षिपत् ।।५०।।

नायिका सखीं प्रति ।।

सुधानिधिव्याजपटोपकार्याङ्गतस्स्मरः क्षोणिपतिर्जिगीषन् ।
आयाति तस्याद्य विलोक्य धाटीं प्राणोऽभ्यमित्र्यत्वमुपैति मे द्राक् ।।५१।।

नायिकां प्रति सखी ।।

सद्भ्रूरूपधनुर्धरं तव मुखं वीक्षाविपाठोत्करैः
कान्ते नेत्ररुचिच्छटामयलसन्मौर्वीजवोत्पातितैः।
सान्द्रं चन्द्रमसं कलालिभिरमुं क्रोधाद्बिभेद ध्रुवम्
तस्मात्तद्वपुराश्रिताश्शरचयाः कुर्वन्ति लक्ष्मभ्रमम् ।।५२।।

नायिका ।।

काम त्वमस्यन्तिमवर्णधारी महेश्वरस्त्वादिमवर्णधारी ।
तस्मादसौ त्वामदहत् स्पृशन्तमित्येतदुक्तं खलु युक्तमेव ।।५३।।

In Public domain. Digitization Muthulakshmi Research Academy

सखी मन्मथमुद्दिश्य ।।

सखी भोगिवेणी पीकीरम्यवाणी शरच्चन्द्रहासास्फुरत्स्वर्णनासा ।
मरुत्स्यन्दनस्त्वं स्फुरत्पल्लवास्त्रस्सरोजेषु पुञ्जो द्विरेफात्तशिञ्जः।।५४।।

नायिका -

निशापतिश्शम्बररञ्जनोऽसौ रतेःपतिश्शम्बरभञ्जनोऽयम् ।
प्रभञ्जनोऽधःकृतशम्बरोऽस्ति मैत्री कथङ्कारमभूत्त्रयाणाम् ।।५५।।

सखी ।।

सोमस्त्वयं परमहंसमधो विधाता
कामो विराजति हि खण्डितविप्रयोगी ।
वातो घनालिपरिधूननकृच्च तेषां
मैत्रीनिसर्गजनिता खलु युक्तमेतत् ।।५६।।

तावदेतादृशीं नायिकां नायको निष्कुटान्तरं दूत्या निनाय्याह ।।

सखि तव विरहाग्निं संवरीवृद्ध्यमानं
परमहमिह मन्ये त्वद्गले विस्फुरन्ती ।
मसृणविधुकराभा मालिका मौक्तिकानां
भवति निजसमाख्या वैपरीत्यान्विता यत् ।।५७।।

सखि ।।

पूर्वं चण्डतरोऽयमेव पवनस्सद्योऽनवद्यो मुहुः।
सौरभ्याप्तिकृदस्ति शीतल इदं चित्रं चरित्रं कुतः ।।५८।।

विटः ।।

यावत्पांसुलतायुतस्स च भवेत्तावत्कठोरः परम् ।
सोऽयं धर्मगताशयैव सहितश्चेज्जायते शीतलः।।५९।।

In Public domain. Digitization Muthulakshmi Research Academy

गलिततनिपतच्चर्मानिर्मानकान्तिमुचं त्वचम्
दधदिह जले रम्भास्तम्भो विभाति वसन् सदा ।
सखि तव मनागूरुस्तम्भोपमानमगामिनी
र्मुहुरपि तनूस्त्यक्त्वायुक्ताङ्गमद्य वहन्निव ॥६०॥

द्विजानां स्थगयत्याभामधरस्सन्नपि स्वयम्।
इति तन्व्योष्ठमात्मीयैः क्लिश्नाति स्म रदैर्विटः॥६१॥

अन्यत्र ॥

स्वरतिसुखं वद कान्ते कियदित्युदिता प्रियेण काप्याह ।
हे मुग्ध स्वरतिसुखं जनो न शक्नोति शक्नुयाद्वक्तुम् ॥६२॥

कुत्रचिद्वियुक्तां प्रति चेटी ॥

आस्येनाद्य पराजितो हि मकरो वर्णस्य हानेर्मुखे
जातोऽयं मकरो जितः प्रसृतया वर्ण क्षयेण क्रमात् ।
ऊरुभ्यां विजितः करोऽपि दयिते भूत्वायि निष्कस्थिते
रस्सम्भूय रतीशमार्गणमुखद्वारा दहत्याशयम् ॥६३॥

ऊरुभ्यां तव तन्वि साम्यकलने भूयोऽवरीणीकृतो
हस्तो मत्तगजस्य कम्पिततनुस्सन् तत्कृपालिप्सया ।
मुक्तागुम्भितकुम्भयुग्ममधरन्मूर्धोपदायै ध्रुवम्
भूत्वापीत्थमलब्धवाञ्छिततया गृह्णाति चान्तर्विषम् ॥६४॥

द्विपेन्द्रशुण्डानिकरश्शुभाङ्गि तवोरुकीर्तिं नहि याति युक्तम् ।
दानैर्द्विजांस्तानपि तर्पयन्तं नैति प्रतिष्ठा मलिनात्मभाजम् ॥६५॥

कान्ते त्वदाननमिषेऽम्बुरुहा करेऽस्मिन्
सन्नैगनिग्यकपटस्फुटवीचिकानाम् ।
सङ्घट्टनैस्तटगतेव हि शैवलालिः
पुञ्जीकृता लसति कुन्तलसन्ततिस्ते ॥६६॥

In Public domain. Digitization Muthulakshmi Research Academy

तनुकान्तिप्रवाहे ते नाभ्याख्यं चर्मयन्त्रकम् ।
रोमालिदाम्नाकृष्योर्ध्वं बबन्ध स्मरनाविकः ॥६७॥

प्रस्फुरन्तौ नितम्बौ ते पुलिने एव निश्चयः।
यस्मात्पद्मपलाशाक्षि वेणीमध्यविराजितौ ॥६८॥

पद्मम्रदिम्नः किसलारुणिम्नः कूर्मोच्छ्रयात्सारचतुर्थभागं ।
सङ्गृह्य पादावकरोत्तवाजस्तस्मादिमौ सार्थकनामधेयौ ॥६९॥

कटाक्षच्छविसंयुक्ते चलन्नेत्रे तवाञ्चतः।
जलान्तरगतप्रङ्खच्चकोरी भ्रान्तिकारिणी ॥७०॥

कुत्रचित्काञ्चित्कान्तां प्रति चेटी -

निश्श्वासोच्छ्वासभारैस्तव विरहवशात्सङ्कुचन्तौ स्फुरन्तौ ।
वक्षोजातौ शरीरच्छविसरसि लसच्चोलजालं विधाय ।
कामव्याधेऽद्य रोमावलिकपटयुजा प्रग्रहेण प्रकर्ष
त्युड्डीनोद्योगभाजौ रथपदविहगावित्यहं तर्कयामि ॥७१॥

अन्तर्निक्षिप्य शृङ्गाररसं मारोऽकरोत्कुचौ ।
स एव दृश्यते तन्वि बहिश्चूचुककैतवात् ॥७२॥

उत्तिष्ठन्त्या मुखं दृष्टं स्तनयोरन्तरात्तव ।
मध्याच्छिखरिणोर्लक्ष्यो मृगाङ्क इव शोभते ॥७३॥

मुखचन्द्रसुधाबिन्दुबृन्दमन्तः पथाच्युतम् ।
वेण्या राहोरिवाभाति कुन्दगुच्छस्तदग्रगः॥७४॥

त्वन्नाभीसरसीह रोमलतिका नाले हि वक्षोरुहौ ।
दीप्राम्भोरुहकोरकौ मुखसुधासूतिप्रभामीलितौ ।
नोचेच्चूचुककैतवादुपगतौ लग्नौ द्विरेफौ कथम्
हारव्याजविराजितो मधुरसासारः कुतो दृश्यते ॥७५॥

In Public domain. Digitization Muthulakshmi Research Academy

लोकोत्तरं तव मुखं विरचय्य धाता
पद्माशयाभसलसन्ततिरत्र माभूत् ।
एवं विचिन्त्य वरगन्धफलीं तदानीं
नासामिषेण समधत्त हि कोमलाङ्गि ॥७६॥

पूजायै मुखचन्दिरस्य मदनेनोष्ठच्छलौ पल्लवौ
रेखाचारुतृणैर्निबध्य पुटके न्यस्तानि कुन्दानि किम् ।
दन्तास्तन्मकरन्दपूरनिचयः किं मन्दहासप्रभा
तत्पानार्थमुपागता मधुलिहः किं ते कटाक्षाः प्रिये ॥७७॥

पीत्वा दोहदजं धूमं लिकुचद्वयमद्यते ।
कुचौ भूत्वा फूत्करोति तं चूचुकरुचिच्छलात् ॥७८॥

गरीयान्त्वत्तोऽहं ध्रुवमिति गरीयस्यहमिति
क्रुधा मेरुर्भूमिः कुचकटितया त्वामभजताम् ।
विरोधं संहर्तुं स्वकुलजलसन्मूर्तिदयया
तयोर्मध्ये वासाद्वियदिह हि मध्याख्यमभवत् ॥७९॥

कुत्रचिद्वेश्यावाट्याम् -

कुध्रेण सह युध्वाभूत्कुचद्वन्द्वं सकञ्चुकम् ।
तत्स्वीकृत इव प्रासो रेजे रोमलता तव ॥८०॥

पृथुकुचयुगभारं ते मध्यः कृशतरतया वहेन्नो वा ।
तत्साहय्यकृते सखि काञ्चीकलनं न चाङ्गशोभायै ॥८१॥

वलग्नभागेन पराजिते खे स्थातुं न सम्भाव्यमिहेति ताराः।
त्वदङ्घ्रियुग्मेऽपि नखा बभूवुस्तस्मादवापुस्सहसार्थवत्ताम् ॥८२॥

विधौ क्रुधा साम्यभुवा तवाननम् रदच्छदोद्दंशनमातनोत्खलु ।
तदात्वसम्मर्दभरोद्गतं सुधा पृषद्ध्रुवं सुन्दरि नासिकामणिः ॥८३॥

In Public domain. Digitization Muthulakshmi Research Academy

त्वत्पाणिजानां सुमुखि तारकाणां समानता ।
न सम्भवति पूर्वास्तु नखरास्ताः पराः खराः ॥८४॥

नाभिस्फुटावटजरोमलतातिकुब्ज
सन्नारिकेलशिखरे तव कोमलाङ्गि ।
वक्षोजयुग्ममदसीयफलद्वयं हि
सत्यं न चेत्कथमुपैति पयोधरत्वम् ॥८५॥

लताङ्गि भास्वद्वसुरेखयोज्ज्वलं
विलोक्य नीरेजमभूत्करस्तव ।
किरन्नमर्षं निजरक्तिमच्छला
त्स्वयञ्च भास्वद्वसुरेखयोज्ज्वलः ॥८६॥

पुष्करोर्मिकाकङ्कणैर्युतं पुष्करं समं प्रेक्ष्यतेऽधुना ।
हस्तपल्लवोऽप्यम्बुजाक्ष्यधात्पुष्करोर्मिकाकङ्कणावलिम् ॥८७॥

वक्त्रश्रोणिगलोपमानसरसीरुट्चक्रशङ्खान् कृधा
धिक्कृत्याकुरुथास्स्वहस्तवशगां रेखाममीषामिति ।
तारुण्यद्रुममुख्यसत्फलदुरोजद्विट्कलश्यो भिया
सेवन्ते चरणद्वयीं रमणि ते रेखात्मना सर्वदा ॥८८॥

तौल्येन स्वकुचद्वयस्य महतीं मान्यां प्रतिष्ठां क्षितौ
सन्धात्रा कुधरेण शात्रवविधात्री वज्ररेखेत्यरम् ।
तां रेखां पदयोरधो वितनुषे तारुण्यलीलाञ्चिते
तस्मात्साऽत्र सदाशयोपकुरुते कल्याणराशिं तव ॥८९॥

In Public domain. Digitization Muthulakshmi Research Academy

हासैश्शुभ्रतरौ तथाधरमणीभासारुणौ ते कुचौ
भातस्सुन्दरि भारती रुचिभृतां शुद्धद्विजानां पुरः।
तारुण्याख्यनृपाज्ञयाङ्कपटे नूत्नालये स्थापितौ
चूर्णाक्तौ निहिताक्षतौ च कलशौ पुण्याहयोग्याविव ।।९०।।

गृह्णीयातां यदि तव कुचावेधमानावभीक्ष्णम् ।
द्रागन्योन्यस्थलमतिभरात्कामिनि श्रोणियुग्मम् ।
व्यत्यस्तं स्यादिति करुणया मन्मथेनेव क्लृप्ता ।
सीमारेखा विलसतितरां रोमराजिस्त्वदीया ।।९१।।

नर्तनालये -

गतिः पुन्नागेड्या वचनरचना चैव ललिता
तनुर्गौरी सच्छ्रीश्श्रुतिरतुलसारङ्गनयने ।
कटिर्भूपालिस्ते मतिरिति वरालिश्च भवती
परं कल्याण्यप्याश्रिततिषु रागं न कुरुते ।।९२।।

कुत्रचिन्नायकः -

नश्यन्ति तन्वि नखरा मम त्वत्कुचकर्षणात् ।

नायिका -

अत एव भवन्त्येते सुन्दराङ्ग पुनर्भवाः ।।९३।।

कुत्रचित् -

स्विन्नस्तनयुगमध्यात्स्यन्नं काश्मीरजन्म भाति सखि ।
कामानलविद्रुतनिजहेमाकल्पप्रसारिधारेव ।।९४।।

माधुर्यतो विजितमिक्षुमपास्य सद्यो
मुक्तालयस्तव सुधाधरमाश्रयन्त्यः।
तच्छाययैव हृदयङ्गमनूत्नवेषा
अत्रासमिन्दुमुखि सन्ति रदच्छलेन ।।९५।।

In Public domain. Digitization Muthulakshmi Research Academy

त्वत्कुचयुग्मं प्रेयसि धुतभूभृत्स्मयमुपात्त बहुचक्रम् ।
इनकरसौख्यं लब्ध्वाप्यतनुरणे विगतकञ्चुकं कस्मात् ॥९६॥

समुद्रे प्रक्षाल्य स्वकतनुगतं पङ्कमखिलम्
हरेः प्राप्तोऽभ्यर्णं विहितजलपानादपि तपन् ।
कुसम्पर्कं त्यक्त्वा न गलतुलनां कम्बुरभज
द्यतः पृष्ठावर्तो रमणि जठरे कल्मषमभूत् ॥९७॥

नायिकां प्रति सखी -

बाले मानससारसाकरतले वृद्धेऽभिवाञ्छोदके
प्रेयोब्दागमकारणेन गलितास्तत्र स्थितास्संमुदाम् ।
हंसीनां बहिरागता स्तनयुगक्रौञ्चाद्रिरोमान्तर
च्छिद्रेभ्योऽण्डचया इव त्वदुरसि व्याभान्ति मुक्तालयः ॥९८॥

सर्वान्प्रतीकान्निर्माय धाता शीतकरानने ।
उपनेत्रे समुत्पाद्य मध्यं ते कृतवान् ध्रुवम् ॥९९॥

विटः -

श्यामे स्वर्णमृदासृजत्स्वगतया त्वां हेमगर्भः पुरा
सम्प्राप्ते वयसि प्रवर्धयितुमब्जेषुः कुचौ तावकौ ।
तत्ताद्दङ्गृदभावतः प्रतिदिनं गृह्णन्वलग्नेद्यताम्
तावेतौ परिलिम्पतीति करतो दृष्ट्वा च मन्यामहे ॥१००॥

कृत्वोपरि रतिं यान्ती कापि शातोदरी गृहम् ।
क्व यासीति वरारोहे पृष्ट्वा लज्जत केनचित् ॥१०१॥

हेमाङ्गिरोमालिशलाकया ते नाभीसरोऽङ्के खनता स्मरेण ।
निक्षिप्तमृद्राशिवदूर्ध्वभागे कुचद्वयं भाति रुचा द्वितीयम् ॥१०२॥

In Public domain. Digitization Muthulakshmi Research Academy

माधुर्यकान्तियुगलेन तवाधरस्य
निष्कासितं त्वमृतबिम्बयुगं सरोषम् ।
एकीभवन्मृगधरात्मतयास्यशोभां
लेभे दधौ विधुरतोऽमृतबिम्बयोगम् ॥१०३॥

जङ्घया तव मृगाक्षि तूणिका युध्यते च भजते पराभवम् ।
इत्यवैमि सशरत्वतो महावीर पश्चिमतले च वासतः ॥१०४॥

अन्यत्र -

काञ्च्यां नाभिसरस्तटे धृतसरोमध्यः स्मरार्चाबला
त्रापानन्तजभावमक्षियुगलं चास्मादपाङ्गप्रभाम् ।
कण्ठोऽप्यब्जकदम्बकाकृतिमगाद्भृङ्गीद्रुणित्वं कचो
वक्षोजो जितकन्तुकोमलतरश्चौष्ठो मधुस्नेहगः॥१०५॥

इन्दीवराम्बुजासनगिरीशतामापनयनवदनकुचम् ।
तस्मादेव हि तन्वि श्रीवाणी सर्वमङ्गलोपेतम् ॥१०६॥

मृगराजनागपूज्यं वीक्षणमुखगमनमध्यमं सुतनो ।
कमलधरचक्रवन्द्यं करवक्षोजातजघनकचबृन्दम् ॥१०७॥

अधरगतमधुरिमा ते गतिरलकामधुकरीडिता अभवन् ।
नखनेत्रवलग्नं सखि तारामार्गाभिवन्दनीयमभूत् ॥१०८॥

कश्चित्कञ्चित्प्रति -

गमने हस्तिनी योषा चित्रिणी कामकर्मसु ।
करयोश्शङ्खिनी दृष्टा पदयोः पद्मिनी बत ॥१०९॥

कुत्रचिद्विटोक्तिः -

दृष्टे सखि ते मध्ये हरिमध्यो द्रागुपेक्षणीयोऽस्ति ।
तन्मध्ये दृष्टे सति मध्यस्ते द्रागुपेक्षणीयो हि ॥११०॥

In Public domain. Digitization Muthulakshmi Research Academy

पञ्चशाखाञ्चितानां ते नखानां तन्वि तुल्यता ।
विशाखाकलितानाञ्च ताराणामुच्यते कथम् ॥११११॥

पल्लवशिरो ललामं पदयुगलं पल्लवैस्समानमिति ।
श्रुत्वा कविवचनं सखि नखरुचिदम्भेन हसदिवाभाति ॥११२॥

कुत्रचिद्रतिक्लान्तं विटं दृष्ट्वा कामपि काप्याह -

आद्यं रूपं हित्वा स्त्रीयोगाद्रूपमन्यदेति पुमान् ।

सखी -

अनुभूयेव हि पाणिनिरचतुरसूत्रे तदा पपाठेदम् ॥११३॥

कुत्रचित् -

प्रिये कन्धरायाः प्रशस्तिं न लेभे स्वयं कन्धरोऽप्यद्य शङ्खप्रवेकः।
सुवर्णाञ्चितायाश्च दुर्वर्णधारी कथं वोपजायेत साम्यानुसारी ॥११४॥

मन्दरागप्रशस्तोऽपि विलासिनि कुचस्तव ।
अमन्दरागं तनुते द्रष्टॄणामिदमद्भुतम् ॥११५॥

अम्बुजातमिव ते पदद्वयं हंसकान्तिकगतं यतोऽभवत् ।
तद्विरोधि शशिबालकान्नखव्याजतोऽङ्गुलिभटैरकर्षयत् ॥११६॥

आख्या दधाति हि निरन्तरमस्मदीया
पुम्भावमेकसमयेऽप्यगता वयं चेत् ।
मानक्षतिर्ध्रुवमितीव विचिन्त्य दाराः
पुम्भावमाजगृहिरे धनिनां गृहेषु ॥११७॥

कुत्रचिद्विटवचनम् -

अशेषलावण्यनिशामनार्थमशेषवाणीश्रवणाय तेऽद्य ।
अशेषबिम्बोष्ठसुधाञ्च पातुं शेषस्वभावं तरलाक्षि याचे ॥११८॥

In Public domain. Digitization Muthulakshmi Research Academy

कुत्रचित् -

कुशलं पिपृच्छिषन्त्यः काममृधे श्रान्तमात्मनः कान्तम् ।
परितस्तारा इव ते मुखचन्द्रं घर्मनिर्मलोर्मिकणाः ।।११९।

तदनन्तरं समरभुव्यायुधिककरकौशलीविशसितपरस्परकबन्धघटितपरस्पर मुखावेतत्पुरभटौ कौचिद्वृन्दारकवृष्टमन्दारकुसुममकरन्देन जीवितवन्तौ स्वस्वगृहं परस्परगृहञ्च गतवन्तौ सतीभ्यामेकत्र चुम्बितावन्यत्रालिङ्गितौ भवतश्चित्रमिदं पश्यैन्दवकुलीनेति कृष्णो जिष्णुमाचष्ट ।।

पार्थोऽपि भगवन्नारायण स्त्रीपुंसभावमाश्रित्य गन्धर्वनगरतुल्यं जगदुत्पाद्योच्चावचं त्वयि विहरति सति किं वा चित्रं किं वाऽचित्रमित्यवादीत् ।।

नरनारायणावित्थं नरनारीसुविभ्रमान् ।
परितो वीक्ष्य सल्लापैः परितोषं गतौ गतौ ।।१२०।।

तदानीं मदनेन परार्थ्यं सुन्दरीवशीकरणौषधं चिकीर्षुणा कोकवियोगानलस्योपरिष्टाद्रोदोन्तरालघटजठरे निक्षिप्तस्सन्नासायमाचोदयाददतितप्ततयोत्पतितः पारद इव शशधरातपो निर्ययौ - तद्रसप्रघातेन च्छिद्रितश्शुभ्रश्च दूरमुद्गतश्शराव इव सकलङ्को मृगाङ्को बभौ - इतस्ततः पतितानि द्वित्राणि रसखण्डानीव विरेजुः पृथूनि नक्षत्राणि ।।

ततः -

कोकीलोकवियोगवह्निपटलात्पूर्वाचलाभ्यन्तरे
पुञ्जीभूय तमिस्रकैतवलगद्धूमेन सञ्छादितात् ।
प्रातर्मेदुरमातरिश्वनिकराघातेन धूतेऽखिले
तद्धूमेऽर्चिरिवोत्थितं दिशि हरेः प्रादुर्बभूवांशुमान् ।।१२१।।

In Public domain. Digitization Muthulakshmi Research Academy

अर्धप्रबुद्धसरसीजमुखाद्बहिर्वि
निर्यत्प्रमत्तमधुपावलयो विरेजुः।
द्वारं विवृत्य निलयस्य विलोकयन्त्या
लक्ष्म्याः कटाक्षनिकरा इव सुप्रभाते ॥१२२॥

इनकरयुतिकृतशान्तेरिङ्गाला इव वियोगदहनस्य ।
कमलिन्याः कुसुमेषु भ्रमरा रेजू रजोऽपि भस्मेव ॥१२३॥

अस्माद्दक्ष इहोत्तमाङ्गवसतेस्सीमन्तिनीनां कचो
भूषां स्वर्णमयीं बिभर्ति हि मनागस्मद्बुभूषुः परः।
इत्यालोचनया द्विरेफनिचयास्तामेव भूषां सदा ।
स्वीकुर्वन्ति नचेच्छिरः कथमभूत्तेषां पिशङ्गप्रभम् ॥१२४॥

तदनन्तरं तौ मायाविप्रौ क्षिप्रं रविप्रकाशप्रतीकाशभासौ प्रभाते नृपप्रासादमासाद्य प्रतीहारेण प्रवेशितौ सभामभजताम् ॥

ततः -

प्रसरद्दण्डकलास्यश्शृङ्गाराढ्यस्सदोपलसदूर्मिः।
तत सानुरागसुमनाविप्रवराभ्यामवैक्ष्यत क्ष्माभृत् ॥१२५॥

ततः कुहनाग्रजन्मा स्वस्तिवादं विस्तार्य राजन्मयूरध्वज सर्वेषु पुरेष्वटाट्या प्रवणस्सन्नपि विशेषतो धर्मपुरे कृतसान्निध्योऽहं तव नगरागमनवेलायामुपशल्येऽस्मत्सुतस्सत्यलोकप्रसिद्धश्चतुरास्यः पञ्चास्येनाक्रान्तशिरा अस्ति त्वदर्धदेहेन प्रीतस्सोऽपि तं मुञ्चति तस्मात्सर्वशास्त्रप्रवीणेन सत्यसङ्गरेण विजयाभिधेनानेन शिष्येण साकमागतोऽस्मि तं दिदापयिषतु भवानिति सत्यवादकल्पमवादीत् ॥

पुनर्विप्रः -

त्वमिव सुदर्शनवर्धितविपुला सुरततिरुपात्तबलितेजाः।
राजन् सदानवारिस्त्वहमित्यूचे यथार्थमन्यार्थम् ॥१२६॥

In Public domain. Digitization Muthulakshmi Research Academy

लब्धविप्रोऽपि राजायं चिररात्राय भूतले ।
इदानीं विप्रलब्धोऽभूदहो कालविपर्ययः॥१२७॥

सोऽयं मयूरकेतनस्तयोश्शैष्योपाध्यायिकामध्यक्षयन् तद्वचनमुपनिषत्कृत्य तथेत्यङ्गीकृत्य तद्विप्रोक्तप्रकारेण स्वकुटुम्बिन्या कुमुद्वत्या सुतेन ताम्रध्वजेन च मध्येकृत्यात्मानं क्रकचधारया विकर्तितार्धमूर्धा सव्यदृङ्निष्क्रान्तं बाष्पमालोक्य रोदनपूर्वकं दानमदृष्टचरं तदसमञ्जसमिति क्षिप्रमुद्यान्तं विप्रग्रामण्यमाहूय भगवन् धरामरावतं सभवत्सात्कृतमर्धं सव्येतरद्वपुःपूतं नाहमित्येष वामभागो रोदितीत्याचचक्षे ॥

विजयस्तदात्मन्येवं विदाञ्चकार -

नृपोऽयमर्थिप्रकरोपकर्ता विराजतेऽमुष्य कृते विचित्रम् ।
प्रवर्तते सम्प्रति पद्मनाभः पकारयुक्तोऽप्यपकारयुक्तः॥१२८॥

ततो हृष्टः कृष्णोऽप्युत्सारितावहित्थ इत्थं स्वरूपमुत्थापयामास ॥

राजा -

र॥ कटितटपटुतरकनकदुकूलम् - चटुलालकयुतचारुनिटालम् - मणिगणशोभितमस्तकभूषम् - थणथणराजिततारकवेषम् - वनमालाञ्चितवक्षःफलकम् - घनतरमृगमदकर्दमतिलकम् - सिंहसंहननमंहोदूरम् - संहृतखलकंसादिकवारम् - तुंदतलस्थचतुर्दशलोकम् - चन्दिरखरकरचारुविलोकम् - नन्दनन्दनं नवनीतहरम् - कन्धरोल्लसत्कौस्तुभहारम् - शरणागतजनसेवित चरणम् - करुणाभरणं कलिभयहरणम् - कुण्डलयुगपरिमण्डितकर्णम् - पाण्डवमुखतः खण्डितकर्णम् - गोपिकावसनगोपनधीरम् - रूपविजित सुमचापशरीरम् - मधुरमधुरपरिमण्डितहासम् - विधुसन्नुतमुखविपुलविकासम् - धगधगराजितधवलकटाक्षम् - अगणितमुनिनिकरावनदक्षम् - निगमगोचरं नित्यानन्दम् - नगधरणचणं नतसुरबृन्दम् - भज रे श्रीवासुदेवम् - हे मानस भज रे देवादिदेवम् ॥

In Public domain. Digitization Muthulakshmi Research Academy

इत्थं सनातनममुं यदुसार्वभौमं
स्तुत्वा शिखिध्वजविभुः प्रणिपत्य सम्यक् ।
विन्यस्य रत्नफलके परिपूज्य सर्वं
वित्तञ्च राज्यमखिलञ्च ददावमुष्मै ॥१२९॥

राजाथ पुनरित्थमकथयत् -

हरिरपि करिवरदोऽभूस्त्वं मायां विधिमुखा विदन्ति न ते ।
वेत्त्येको गिरिशो यः पञ्चास्यस्सन् सदा गजाधीशः॥१३०॥

तव माया निगलति श्रीपते ज्ञानिनां हृदः।
अज्ञानिनामपि हृदस्सैवालं निगलत्यहो ॥१३१॥

आर्यानन्दनराजन् मयूरकेतो कुमारभूभृद्धन् ।
त्वं भूभृदरिकुमारं विजयं तं पालयसि युधि जयन्तम् ॥१३२॥

ततो राजा परिज्ञातशौर्याशयस्स्ववरूथिनीसनाथो जगन्नाथेन साकं वीरवर्मणो नगरसीमानमगाहत ॥

इति श्रीमद्भूमण्डलसरः पुण्डरीकायमानसुरपुरपरिवृढ श्रीमद्राजाधिराज कोसलवेङ्कटक्ष्मारमण करोद्धृतान्दोलिकापार्श्वभागेन चत्वारिंशदवधानसमयैतत्प्रभुग्रथितवज्रमौक्तिकस्थगित बिरुदघण्टामणिशोभितकरेणान्ध्रप्राकृतसंस्कृतकर्णाटादिभाषा कवित्वमहत्वशोभितनागेश्वरसुधीन्द्रतनुजेन भास्करविपश्चिदनुजेन वेङ्कटशास्त्रिणा कविसार्वभौमेन विरचिते युधिष्ठिराश्वमेधचम्पूप्रबन्धे नवमस्तबकः॥

In Public domain. Digitization Muthulakshmi Research Academy

श्रीरस्तु

पार्वतीपरमेश्वराभ्यां नमः

श्रीयुधिष्ठिराश्वमेधचम्पूप्रबन्धे दशमस्तबकः

तदनन्तरमुपसर्पन्तमर्वन्तमपसर्पैः प्रणिवेदितवार्ताः पञ्चवीरवर्मण स्सुतास्समाकृष्य पाण्डवानीकेन साकमयुध्यन्त ॥

ततः ॥

क्रोधप्रेङ्खत्स्फुलिङ्गप्रकरवलययुक्तीक्ष्णचक्षुःप्रचारः
फूत्कारोत्फुल्लनासापुटसुषिरगुहः प्रेतराड्दण्डपाणिः।
आज्ञप्तो वीरवर्मक्षितिपतिमणिना पाण्डुपुत्रस्य सेना
वेतण्डाल्यां व्यतानीत्कटुपटुरटनः प्रक्रियां तत्र सैंहीम् ॥१॥

स्वयं तदानीं हित्वापि कालधर्मं शराः खराः।
अनीनयन् रणे तत्र कालधर्मं परान्वरान् ॥२॥

अत्र ग्रन्थकर्तुः पुत्रो नृसिंहशास्त्रीत्थं गद्येन ग्रन्थं विस्तारयति -

तदानीं रणसमुत्कटा यमभटा आज्ञां दण्डपाणेर्मण्डयन्तश्शिरस्यापूरयन्तः क्ष्वेलारवैर्विध्यण्डमण्डलमाकर्षन्तो विद्विषां कचान् कुन्तैः कृन्तन्तो दन्तावलान् खण्डयन्तो भिण्डिवालैरश्वानभिघ्नन्तश्शतघ्नीभीरिपूनाविध्यन्तो रथान् विपाटयन्तश्चपेटैः करोटीर्हरन्तः परेषामसून् किरन्तो रुधिरं निपातयन्तः कृपाणिकाभिर्ध्वजान् तर्जयन्तो गर्जितैः प्रतिभटान् ताडयन्तश्शिरसि खाडयन्त उरसि विद्रावयन्तः परानुत्सृजन्तो दयामुल्लङ्घयन्तोऽन्तरिक्षं विच्छिन्दन्तो गात्राणि विस्रंसयन्तो नेत्राण्यवभिन्दन्तश्छत्राण्यपभ्रंशयन्तः पत्राणि भर्तृदत्तान्नकबलैरात्मम्भरित्वं विरचय्य तत्प्राणापहरणावसरेष्वधिरणरङ्गममुमूर्षन्तो भवन्तो गात्राणि गोपायन्ति तज्ञमघं

In Public domain. Digitization Muthulakshmi Research Academy

जन्मान्तरेऽप्यनुभावयितान्तक एव सोऽप्यद्य रणरङ्गमध्यास्ते तस्मात्तन्निकटमागच्छतेति गलहस्तिकयोत्पीडयन्तस्संशप्तकोऽयं स्वामिनामनृण एष भर्तृकार्ये सर्वंसहोऽसौ कबलदातुः क्षेमङ्करोऽयं राजद्वारि प्रियङ्करोऽयमसत्येवाचंयमोऽयमिति तान् प्रियंवदाय धर्मराजाय चित्रगुप्तलिखितमनतिक्रम्य विज्ञाप्य समर्पयन्तः किञ्च याचकभयङ्करोऽयमर्थिषूग्रम्पश्योऽयमकिञ्चनैर्वैरायमाणोऽयं स्वामिद्रोह्यय-मुपजापजीविकोऽयं कर्णेजपोऽयं पुरोभाग्ययमिति तान्कृतान्तस्य पुरस्तान्निरस्त-करुणं निक्षिपन्ति स्म ॥

भ्रूभङ्गभ्रमणेक्षणक्षणपरिभ्रस्यद्द्विषत्सैनिकः
कोऽयं निष्प्रतिमानशौर्य इति सम्पृष्टोऽर्जुनेनाच्युतः।
आचख्या वयमन्तकः प्रकटदोस्तद्वीरवर्मप्रभो
र्जामातेति तदागमद्रणभुवं द्राग्वीरवर्मा नृपः॥३॥

वीरवर्मतनौ तत्र विद्विषां चापचोदिताः।
विशिखाविमुखा आसन्नात्मनां वाचका इव ॥४॥

कठोरशतकोटिकप्रतिभटायमानैश्शरै
र्भटान्करिघटारटच्चटुलघोटकान् फल्गुनः।
विदार्य रुरुधे दृढप्रतिभटाब्धिमन्थाद्रिराट्
प्रथाश्रितमहाभुजं सपदि वीरवर्माधिपम् ॥५॥

स्वस्थान् शत्रून् पुनस्स्वस्थान् वीरवर्मा शरैर्व्यधात् ।
स्वस्थान् शत्रून् फल्गुनोऽसावस्वस्थानकृताद्भुतम् ॥६॥

In Public domain. Digitization Muthulakshmi Research Academy

तदात्वे गगनाङ्गणे कोऽपि सुरोऽमरीं रणं प्रदर्श्यैवमवादीत् -

याववत्क्लैब्यं नारी यावत्पुंस्त्वञ्च गाण्डिवे वेत्ति ।
तावत्पश्चात्प्रसरत्युपयाति च युक्तमेतदबलानाम् ।।७।।

ततश्च -

भ्रमन्मौर्वीघर्षोल्बणकिणितबाहुः क्षितिपतिः
पृषत्कैः कृत्वासौ प्रतिभटततिं दुर्भरतनुम् ।
सुतं भूभृच्छत्रोः प्रथनतलनिर्निद्रमुदित
भ्रमञ्चक्रे शक्रप्रमुखनुतकोदण्डनिगमम् ।।८।।

ततस्सपत्नजयप्रयत्ननूत्नचिन्तारत्नायमानं चापरत्नं करे बिभ्राणं विपक्षद्विपहर्यक्षं परवर्ममर्मनिर्मथनालङ्कर्मीणं वीरवर्माणं दुष्प्रधर्षमाकलयता हृषीकेशेनादिष्टः प्लवङ्गमभर्ताऽवप्लुत्य रथात्तद्रथं द्रोणाद्रिमिवोद्धृत्य गगने सञ्जातचङ्क्रमोऽभूत् ।।

सोऽपि सारस्वतपुरपरिवृढो दृढात्स्वारूढाद्रथादवप्लुत्य स हरिविजयं रथं करे कन्तुकीकृत्य द्युरङ्गे चिराङ्गीकृतजङ्घालभावः कृष्णमेवमाचष्ट ।।

क्षीराम्बुधौ चलदभङ्गतरङ्गशोभा
प्रस्पर्धिभिर्विरहपाण्डिमभिस्सितायाम् ।
पद्मालयानिभृतमुग्धकुचाग्रसीम्नि
त्वां क्षेप्तुमद्य मम माधव देह्यनुज्ञाम् ।।९।।

इत्यात्मनीनं भाषितं भाषमाणमपि वीरवर्माणमुरसि नरसखः पदेन ताडयामास-

तदा विश्वजनीनस्य भगवतस्त्रिलोकीं पुनानस्य पादस्याभिमर्शाद्धन्यं मन्यमानो नृपतिस्तं प्रणिपत्य तदभिमतेऽर्जुने समारोपितातिरिक्तमैत्रीकस्तौ घण्टापथेन निजभवनमानीय हरिमाराध्य पञ्चदिनानि परस्मिन्नहनि तेन समं कौन्तलपुटभेदननिकटतटमाटीकत ।।

In Public domain. Digitization Muthulakshmi Research Academy

तदानीं जिष्णुं वृष्णिकुलवर्धन इत्थमाचष्ट -

एतत्पुरवीरभटनिषूदितवैरियोधनिर्भिन्नहृदयान्तरालतया रुषा स्वक्लेशादि बीजस्यास्य पुरस्योपर्युत्पतितं प्रभाकरबिम्बमिव भीकरं पश्य दृश्यमस्य पुरस्य प्राकारं हिरण्मयाकारम् ॥

तदानीम् -

पारदशारदवारिदहासम् गौरधराधरचारुविभासम् ।
स्फारकृपारसपूरगभीरम् नारदमैक्षत वारिजनाभः ॥१०॥

तदनु मुनिः कृष्णमुद्वीक्ष्येत्थमुत्प्रैक्षत -

हृद्वारास्तव्यदयेव भक्तविशयं मार्ष्टुं बहिर्निर्गता
स्त्रीरूपेण रमामनोहर तव श्रीर्भाति वक्षःस्थले ।
एतस्याः कबरीव दीव्यति परं श्रीवत्सचिह्नं मह
ल्लीलायै मणिकन्तुको धृत इव प्रोद्भासते कौस्तुभः॥११॥

ततो मुनिरर्जुनं दृष्ट्वा चन्द्रहासनृपमुपश्लोकयति स्म -

चतुरकुमुदचन्द्रं चन्द्रहासं नरेन्द्रम्
रुचिरसुगुणसान्द्रं रुच्यभाषोरगेन्द्रम् ।
विमतनगमहेन्द्रं विष्णुभक्तावतन्द्रम्
वितरणगुणरुन्द्रं विद्धि शौर्यैररन्ध्रम् ॥१२॥

पुनर्मुनिः

तस्य क्ष्माधिपतेः प्रतापतनयो विद्विट्समाख्या लस
त्कन्यां निग्रहतोपहृत्य जनयामास द्वयीं पुत्रयोः।
एको मातृसदृक्षताञ्चिततनुश्चन्द्राभिधानं वह
त्यन्यस्तत्र सदा मनोजवसतामाक्रम्य सूर्याह्वयः॥१३॥

In Public domain. Digitization Muthulakshmi Research Academy

राज्ञस्तस्य भुजप्रतापदहने सन्ताप्य कौक्षेयकम्
तत्पाणिस्थितमापिपादयिषया तैक्ष्ण्यस्य तस्मिन् विधिः।
तेनापाययतोदकं रिपुमुखेष्वाजान तेजोमयम्
तस्माच्छुष्कतराणि तानि वदनान्यासन् कुरुक्ष्मापते ॥१४॥

तत्कीर्त्या विजितो रसोऽन्तिकगतस्तस्यानुकम्पाप्तये
तत्तेजोऽग्निभरान्नभस्युदपतत्तारास्तदीयाः कणाः।
पुञ्जीभूयत एव खे कतिपयाश्चन्द्रभ्रमं कुर्वते
केचित्तेष्वनिलात्क्रमेण गलिताः कार्श्यं विधौ तन्वते ॥१५॥

किञ्च वैणिकोपवीण्यमानकारुण्यं वीराग्रगण्यं दीनशरण्यं सुगुणमृगारण्यं हरिभक्तग्रामण्यं विरक्ताग्रण्यं धृतधनुरागमप्रावीण्यं पुषितब्राह्मण्यं प्रकटितनीतिनैपुण्यं कृतस्वपरजनदयासाधारण्यं रचितसर्वकलासामानाधिकरण्यं नृपवरेण्यं युधि निरुध्य तस्मै कस्तिष्ठेत रणप्रणयी तत्तेन सख्यं मुख्यमित्याचख्यौ ॥

तदनु चन्द्रहासो हरिचरणं स्वशिरः प्रापिपयिषुरद्य मे भागधेयान्मनोरथाः फलिता इति ससुतस्सबलः पाप्मानं चिकर्तिषुर्माधवं सिसेविषुस्सुपद्यया प्रपद्यतं प्रणिपत्य नरश्चालिङ्ग्य पुरमानीय भगवन्तमेवमुपश्लोकितवान् ॥

अप्रमेयमहिमन् त्वदीक्षणात्सुप्रजोऽभवदिदं पुरं मम।
त्वत्प्रसादकलनात्सुधर्मणां क्षिप्रमासमधिकस्सुमेधसाम् ॥१६॥

कृष्ण त्वत्पदयोरेव सदा भजतु मे मनः।
विलोमवर्णवाच्यं स्वमित्याचष्ट स राजघः॥१७॥

इत्थं शौरिं समाराध्य तेन पार्थेन चागमत्।
भूजानिराजाने यस्य पालने लोलनेत्रभाक् ॥१८॥

In Public domain. Digitization Muthulakshmi Research Academy

सीमन्तस्सैत्यततेस्सामन्तो दुर्गतप्रपञ्चानाम् ।
श्रीमन्तमेत्य बिभ्यत्कामं तत आजगाम हेमन्तः।। १९।।

तस्मिन्नृतौ तुहिनशत्रुरपि ग्रहेशो
जीवन् प्रधावति परं पुरतो हिमान्याः।
पादैस्सदा दश शतैरपि संयुतत्वा
त्तस्माद्दिनावलिरसौ तनिमानमागात् ।।२०।।

मण्डलनाथोऽपि भवन् वसुविसराप्तोऽप्यनन्तमणिरपि सन् ।
प्राप्नोति दक्षिणाशां रविरस्माद्भवति मन्दतेजस्कः।।२१।।

ततोऽजकदाल्भ्यस्याश्रममश्रमं प्राप्य तदाशीराशीकृतप्रमोदो जयद्रथपुरमेत्य दौश्शलेयं सौभागिनेयमप्यसौ भागिनेयं पार्थः पुरस्कृत्य तस्मात्कुसुमावती-पुरोपशल्यमभजत ।।

तदानीं चक्रपाणिरेवं गाण्डीवपाणिमभाणीत् -

अस्याः पुर्या राजनि सिंहध्वजनाम्नि दुर्लक्षबलसीम्नि भूरि महिम्नि वशीकृतवैरिधाम्नि पुरा सहस्रोनलक्षं वत्सरांस्तपस्यति सत्यवार्यकातर्येण गीर्वाणधूर्वहो रंहसा ब्रह्मसमीपमेत्य सकलमेतदजिह्मवचसा शिरोधृतसंहतलस्सन्नुपबृंहितवान्।।

दैत्योऽपि यदि तपस्यति लक्षं शरदस्स विष्णुपदराट् स्यात् ।
इत्युक्त्वाम्बुजयोनिश्श्रीपतिना साकमाप कैलासम् ।।२२।।

जटातटाग्रनानटित्तटन्यभङ्गवीचिका
च्छटालुठत्स्फटीशवल्लिवेल्लितोत्तमाङ्गकम् ।
कृपातरङ्गमङ्गलस्वपाङ्गभङ्गभङ्गिभिः
प्रपाल्यमानविश्वसृण्मुखं हिमाद्रिजासखम् ।।२३।।

In Public domain. Digitization Muthulakshmi Research Academy

प्रतिक्षणे क्षणप्रभावसृष्टरक्षिताहत
प्रजापतिस्फुटाण्डकाण्डमिन्दुखण्डमण्डनम् ।
चराचरान्तरस्थितं निरन्तरम् चिरन्तनं
परन्तपं हरं तमाशु केशवादयो जगुः।।२४।।

तदा स्वगुणस्तवपारायणे नारायणस्य धुरीणतां मन्वानो दानवाय वरस्य दिदापयिषाञ्च जानानस्सुधामधुरिमधौरेयीभिः फणितिभिराश्वास्यताञ्छरणागत-जनभरणकरुणावरुणालयो हरिणाङ्कशेखरो दैत्यान्तिकमगात् ।।

सवहरशङ्कर सत्सु वशङ्कर साधुशिवङ्कर सामरुचे
कलिमलहारक कामितपूरक कामनिवारक कान्तरुचे ।
फणिगणभूषण पण्डितपोषण पापविपेषण फालशुचे
जय जय हे त्रिपुरासुरभञ्जन नित्यनिरञ्जन साम्बशिव ।।२५।।

भवभयनिस्तुलशस्तसमस्ततमस्ततितिग्मगभस्तिधर
प्रथिततरप्रवचस्तुतदुस्तरदोस्थमहस्तलनास्तरिपो ।
गिरिश समेहि वरं मम देहि चिरं परिपाहि दयाम्बुनिधे।
जय जय हे त्रिपुरासुरभञ्जन नित्यनिरञ्जन साम्बशिव ।।२६।।

इत्यभिष्टूयाभिवादयमानाय निजोपासकाय वरानभीष्टान् तेन पृष्टान् वितीर्य बालकेन निधनो भविता तवेति गूढमुदीर्यान्तरधात् ।।

सोऽपि स्ववशे त्रिविष्टपमवष्टभ्य जिष्णुसहायेन विष्णुना नियुध्यते न वितीर्णवरःस्फायमानमना अमनाग्वर्तत इति ।।

तदानीम् -

पुरगौ तुरगौ दृष्ट्वा दनुजा मनुजाशनाः।
बध्वा युध्वा कौरवस्य सैन्यं दैन्यं तदानयन् ।।२७।।

In Public domain. Digitization Muthulakshmi Research Academy

ततश्चिराय नरादवरास्समरे करवालप्रिया अपि रिपुकुम्भिनीवराणां करवाल कर्तनमकार्षुरित्याश्चर्यम् ॥

तदात्वे -

गवोष्ट्रगोयुगं धन्वी नरः कश्चन कौशलात् ।
जघान गोभ्यां दैत्योऽहो धानुष्कोऽप्यश्वषड्गवम् ॥२८॥

ततः

पादातं रथकट्यामाश्वीयं हास्तिकं च दनुजेन्द्रः ।
वात्येवसमितितृण्यामुच्चिक्षेपातितिग्मनाराचैः ॥२९॥

अहो वैचित्री स तावत् सिंहध्वजस्ताम्रध्वजसूतं नकुलध्वजमप्यग्रे मितैर्जिह्मगैर्विवशीकृत्य वृषध्वजमपि कन्तुकीकृत्य युध्यहिनमप्यच्युतमहीनं विरचय्य पार्थमपार्थं विधाय बभ्रुवाहनमपि श्वेतवाहनवदारचय्य नीलध्वजहंसध्वजशिखिध्वजताम्रध्वज वीरवर्मचन्द्रहासप्रमुखान् विमुखान् विधाय सर्वान् शत्रून् तिलशः कणशो विदलय्य सकलवैर्यहन्ता हन्ता सन्नुदजृम्भत ॥

सकलेषु प्रवीणेषु कान्दिसीकेषु वैरिषु ।
एक एव प्रवीणोऽभूत् स्थिरस्सुरमुनिर्दिवि ॥३०॥

तदानीम् -

हरिं दिदृक्षुं वृषकेतुसूनुमादाय भीमो रणरङ्गमेत्य ।
दैत्याशुगेनाशु पपात भूम्यामुट्टङ्कितागङ्गस्सह कश्मलस्सन् ॥३१॥

विकटं शकटं दैत्यं केशवश्शैशवे यथा ।
बालस्तं लीलया बाणैः कालधर्ममनीनयत् ॥३२॥

वृषध्वजकिशोरस्य चित्रं सिंहध्वजाहतिः ।
इति सर्वे सुरा भूम्यामन्तरिक्षे मुदं दधुः॥३३॥

In Public domain. Digitization Muthulakshmi Research Academy

तदनन्तरम् -

सिंहध्वजे राक्षससार्वभौमे रणेऽत्र शब्दग्रहमात्रपात्रे ।
न केवलं रात्रिचरा अवीरा बभूवुरेषामपि सुन्दराङ्ग्यः ।।३४।।

ततश्शौरिस्सर्वैस्सह शोणितपुरीं निकषाभ्येत्य ।।

एनां पुरीमधिवसति दैत्येभ्यो दैत्येभ्यो महानजयनीयस्तेन सममायोधनं चेन्नैधनीयं त्वया परं त्रैयम्बकप्रसादेनाभ्युदयकीं धुरं वहत्यस्य शौर्यं न भिदेलिमंबन्धुरयमस्य भटानप्रयापयितव्या यमालयं तस्मात्सन्धिः प्रयापणीय-स्त्वयेत्यर्जुनं प्रतिदुर्जनारिर्निर्जरेशानुजो निर्जगाद ।।

तदात्वे -

शम्भुर्विष्णुमयस्तथा शिवमयो विष्णुस्तयोर्नोभिदे
त्याम्नायेन परैः पुराणवचनैस्सिद्धैकतास्यापि मे ।
तस्मात्त्वं गिरिजापतिं पशुपतिं सर्वज्ञमूर्तिं शिवं
लोकाध्यक्षमिहानयेति स हरिर्द्राङ् नारदं प्राहिणोत् ।।३५।।

तत आगतं त्रिणेत्रं कालत्रितयेऽप्यबाधितात्मानम् ।
नगराजकन्यकामपि कृष्णः प्रणमन् प्रहर्षमापेदे ।।३६।।

तावदेव सदा शरतयाप्यजिंहगतयापि सन्ततमार्गणतयाप्याम्नातबाणाभिधेयो विधेयश्शोणितपुराधिपो माधिपोमाधिपौ नमस्कृत्य पुरमानीय चिरमौत्सुक्योदन्वति निममज्ज ।।

ततो हरिस्स नरः कानिचिद्दिनानि शोणितपुरे स्थित्वा तस्मान्नगरान्निर्याय पर्यायेणेतस्ततो विजित्य फलेग्रहिभिर्वानस्पत्यैर्वनस्पतिभिरुत्कीलितस्योन्मिषित-नमेरोस्सुमेरोरुत्तरस्यां दिश्यात्मम्भरिभिर्बम्भरीभिस्सर्वान्नीनैरलीनैः पवमानमाणवा-न्दोलितलताच्यवमानप्लवमानरजोभिश्च गुम्भितान्युज्जृम्भितानि सरांस्युदीचीनानि प्रत्यक्षीकृत्य दैत्यराजकोटिधरं भोजकोटिपुरं समयाभिगम्य नारदमैक्षिष्ट ।।

In Public domain. Digitization Muthulakshmi Research Academy

तदानीम् नारदो मुरारिं प्रति तन्नगराधिपतेर्दुन्दुभेरित्थमोजो निजगाद॥

पूर्वं यो जामदग्न्यस्स्वधितिशरमयस्रुक्स्रुवाभ्यां हवींषि
क्षत्राणां शीर्षरूपाण्यविकलविसरद्विक्रमा वक्रवह्नौ ।
सच्छिन्नासामिधेन्या ज्वलति समजुहोत्कार्तवीर्यप्रमाथी
सोऽयं युद्ध्वा चिरेणासुरवरपतिनानेन साकं निवृत्तः॥३७॥

किञ्च -

दृप्यत्पौलस्त्यबाहास्मयचयमथनप्रोज्वलद्बाहुमूल
स्त्रैलोक्यैकप्रवीरः प्लवगपरिवृथो यस्य बाणेन कृत्तः।
सोऽयं काकुत्स्थवंश्यो निशिचरदमनः क्षत्रमूर्धन्यमान्यः
प्रस्थायैनं न जय्योऽयमिति निजगुरुप्रोदितस्सन् व्यरंसीत् ॥३८॥

दशकण्ठकण्ठकीकसकषणोत्तेजनशितास्त्रमुखभागः।
दाशरथिरित्थमासीत्तस्य रणे का कथाऽन्यवीराणाम् ॥३९॥

क्ष्वेलां कुर्वति दुन्दुभौ वितनुते शेषो दृशां मीलनम्
स्वेष्वासेषु शरान् वितन्वति पयो गावो न यच्छन्त्यलम् ।
नाराचान्निशितान् विमुञ्चति दिनं द्राक्सङ्कुचत्याहवे
घोटस्यन्दनपत्तिभिः प्रचलिते जिह्रेत्यलं काश्यपी ॥४०॥

यदाऽस्य दानवेन्द्रस्य कण्डूतिर्भुजयोर्भवेत् ।
तदैव पादयोर्मृत्योः कण्डूतिर्भवति ध्रुवम् ॥४१॥

अन्येद्युर्वीरवर्मा सौधीरकर्माऽच्युताज्ञया ।
आहूतवानाहवाय दुन्दुभिं दुन्दुभिस्वनैः॥४२॥

क्रोधप्रेङ्खोलितोऽग्रस्फुटकठिनमहाविस्फुलिङ्गोत्तरङ्गा ।
श्लक्ष्णैरक्ष्णां प्रतीक्ष्णैर्मुहुरुपवलनैः प्लुष्टकाष्ठान्तकुड्यः।
अहूतश्शात्रवेण स्वमकुटपटलीकल्पमेरूच्चशृङ्गो
युद्धायासौ प्रतस्थे पटुकटुरटनैर्बन्धुभिर्दुन्दुभिर्द्राक् ॥४३॥

In Public domain. Digitization Muthulakshmi Research Academy

षट्शतघोणागह्वरफूत्कृतिचक्राशुगोत्करैस्तस्य ।
ग्रन्थिलविटपकलापा बभ्रमुरभ्रे ह्यदभ्रभूमिरुहाः॥४४॥

वीरवर्मा -

रे आसुर तवाकारमिदानीमेव ह्रस्वीकरोमि ॥

आसुरः -

रे अक्षरशून्य आकारो न कदाऽपि ह्रस्वो भवति ॥

वीरवर्मा -

कथमक्षरशून्यत्वयोरेकाधिकरणनिष्ठता भवति ॥

आसुरः -

रे नरेन्द्र पश्य मे विक्रमम् ॥

वीरवर्मा -

रे दनुजनृपाल नर इन्द्रो भवेत्किम् ॥

आसुरः -

रे रे नृभक्षकस्य नृपालत्वं कथम् ।
इत्यन्योन्यमाक्षेपवन्तावभूताम् ॥४५॥

ततः प्रविश्यरणरङ्गं वृषकेतुः

वृषकेतुरहं धनुःप्रवीणो रणरङ्गे भवतोऽद्य गोचरो यः।
इति वादिनमाह दैत्यसंराट् वृषकेतो रुचितं हि गोचरत्वम् ॥४६॥

श्रुत्वाहसन्तदसुरा अलज्जन्त नरास्तदा ।
ननन्दुरीश्वरगणा बिभ्युर्दिविषदाङ्गणाः॥४७॥

वृषध्वजशरैस्तदा युधि परश्शतास्संहताः
परा निशिचरा नभस्यमरसुन्दरीस्तावतीः।
ययुःपलभुजा नरा अपि परस्सहस्रा हता
स्सुरीरगुरिहापरत्र च गुणाधिकत्वं भिदा ॥४८॥

In Public domain. Digitization Muthulakshmi Research Academy

ततः -

रक्षोऽध्यक्ष उपाध्यायो तदान्तेवासिनो रिपून् ।
पराजयप्रवचनं क्रमाद्युध्यध्यजीगपत् ।।४९।।

यो लोकेषु त्रिषु च विदितो विक्रमैरप्रमेयैः
ख्यातस्स्फीतास्त्रपमुखलिभीवल्लरीणां लवित्रम् ।
सप्तार्णोऽधिक्रमणविहृतौ प्राप्तजङ्घालभाव
स्सोऽयं दोष्मान्प्लवगवृषभस्तं रुणद्धिस्म दैत्यम् ।।५०।।

ततस्तारकसमीरणनन्दनयोरनयोः परस्परं प्रत्यालीढालीढसमपदविशाखमण्डलनामधेयेन स्थानपञ्चकेन कञ्चित्कालं रणप्रपञ्चं प्रपञ्चयतोस्सतोः।।

अत्र ग्रन्थकर्तुस्तनयो नृसिंहशास्त्रीत्थं वर्णयति ।।

हनुमान् -

रे नक्तञ्चर भवद्भुजकण्डूं क्षुणद्मि ।।

दुन्दुभिः -

रे शाखामृग भावत्कमखर्वं गर्वं भिनद्मि ।।

हनूमान् -

रे रे पललाशन तव मूर्ध्नां त्रिशतीं ।
भुजानां रिञ्छोलिञ्च शुष्कपेषं पिनष्मि।।

दुन्दुभिः -

भो वलीमुख वलशासनसूनुनैकटायने भवदुत्तमाङ्गं ग्रीवया सह विनच्मि-

किञ्च -

भवत्सहायं हय्यङ्गवीनलुण्ठाकं हिनस्मि तथा पौलस्त्यनिहन्ता भवन्नियन्ता सीताकान्तो युद्धमध्यास्ते यदि तमपि तृणद्मि वीराट्टहासैर्हिरण्यगर्भाण्डमण्डलं छिनद्मि।। इत्यन्योन्यं वीरालापान् कुर्वतोस्सतोः।।

In Public domain. Digitization Muthulakshmi Research Academy

कोपाद्दैत्योऽथरोपैः प्लवगकुलपतेः ग्लापयन् रूपधेयम्
तत्क्षिप्तानुत्तमाद्रीन् चणककणनिभान् संविधायाविधेयः।
शस्त्राभिस्तं गदाभिः कपिकुलतिलकं ताडयामास सोऽयम्
क्लिश्यत्कम्पिप्रतीकप्रकरमुपमृशन् द्राक्पलायाम्बभूव ।।५१।।

ततश्चिरं युध्यमानं नरं हरिं वानरवरञ्च नैरृतपतिर्गृह्णन्मध्येपयोधि पृथुलपृथुलोम्नो वदनगोलके प्राक्षिपत् ।।

ततः ।।

उपवीणयति मुनीन्द्रे वीणापाणौ निवेद्य रणचरितम् ।
आगत्य चन्द्रमौलिस्तं द्रष्टुं प्रायसन्निटालदृशा ।।५२।।

तदनु भण्डने तस्य खण्डने खण्डपरशोरखण्डप्रचण्डतररोषातिरेके समुज्जृम्भिते द्रुहिणाण्डभाण्डषण्डस्य पुनस्सृजनभीत्या पुण्डरीकासनस्समेत्य भगवन् परमपुरुष पाहि पाह्येनमिति शतशः प्रणिपत्य व्यजिज्ञपत् ।।

तत अयि ब्रह्मन् मत्सखं हरिं कौरव्यं प्लवङ्गमधौरेयञ्च मया पुरा दत्तं शूलं पाशुपतञ्च मह्यमेष यदा प्रत्यर्पयति तदानीमेनं त्यजामीत्युक्तवतश्शक्तिपतेर्भक्तवत्सलस्यानुमत्या नक्तञ्चरेशं युक्तिसक्ताभिरनुरक्तिसिक्ताभिस्सूक्तिभिर्धाता भीतमेतमाश्वास्य तरुणहरिणाङ्काभरणचरणसरोजमनैषीत् ।।

ततः -

दानवो दीनवाग्दत्वा शूलं पाशुपतञ्च तत् ।
स्वामिन्नायास्यति श्रीशस्सप्तमेऽह्नीत्यवोचत ।।५३।।

ततः प्रोष्ठी शेननिष्ठ्यूतः कृष्णस्सार्जुनाञ्जनेयस्तीरमेत्य शूलपाशुपतनिवर्तनेनेषज्ञयं यातुधानज्ञानानो गरुडरथेनाषडक्षीणागमनं दैत्यालयं प्रविश्य बद्धावहित्थो विप्ररूपेण त्रिसहस्रबाहुमवलोकयमायमानमवलोकयमानं किमप्यभीष्टमयाचत ।।

In Public domain. Digitization Muthulakshmi Research Academy

तस्मिन् क्रव्यादपतौ तस्य ब्रह्मवर्चसेन मोहिते तदभिहितप्रकारेण मज्जनाय सज्जीभवति सति ।।

तदानीं मायाविना माधवेन जलपात्रे स्थापितं चक्रमचरं सद्बुन्दुभेर्बन्धुराणां शिरसां त्रिशतीमलावीत् ।।

तदनन्तरं निरन्तरं निरन्तरायानन्देन नृपबृन्देन सह नन्दनन्दनेन्द्रनन्दनौ कतिपयदिवसैर्हस्तिनापुरीमेत्यानेकलताकायमानपताकायमानशाखालम्बि-जलरेखाचुम्बिमुनिगणशाटीसमाटीकनजातशीतलवातपोतजातपराभूतस्फीत-भूतलतापं त्रिपथगानूपसमीपं समधिवसन्तं वसन्तमिव स्फुरन्तं सन्तत-वेदान्तचिन्तनोपशान्तहरिविरहश्रमभारं धर्मकुमारं दूरादामोदेन नेमतुः।।

आनन्दसिन्धुमध्ये मज्जनभीत्येव धर्मभूस्तदनु ।
नकुलोद्धृतहस्ताग्रो मुरहरमेत्यालिलिङ्ग रयात् ।।५४।।

ततो धर्मतनयो हरिमेवमूचे -

वन्ध्याऽपि भक्त्या यदि पुत्रकाम्यति द्रागेव सा पुत्रवती भवत्यहो ।
विद्वायते मूर्खतरोऽपि तत्क्षणात् त्वदीक्षणात्किं न भवेद्रमापते ।।५५।।

निशासु बह्वीषु गतासु तत्र स सर्वरात्रः खलु पुण्यरात्रः।
संख्यातरात्रोऽपि बभूव कृष्णयुधिष्ठिरालापकलापयोगात् ।।५६।।

तदानीं -

अग्निरिव चित्रभानुर्विरोचनस्सन्ततारुणाभिख्यः।
काष्ठान्तमात्रतेजा अभवमितीवापमेषमुष्णांशुः ।।५७।।

तस्मिन् वसन्ततौं -

शुभे दिनेऽर्कांशुकमालधारिणि क्ष्माधरे पूर्वदिशि स्त्रिया सह ।
मुनीश्वराणाञ्च हरेरनुज्ञयाहवं विधातुं यतते स्म भूपतिः।।५८।।

In Public domain. Digitization Muthulakshmi Research Academy

भुक्त्वा हवींषि रचितानि वषट्कृतानि
